श्रीगणेशायनमः॥तमेवनिर्णयंन्यायैर्ग्रंथेभ्यःकर्तुमुद्यमः॥ ॥अनुनायमुद्यमःसफलः।कालस्यगगनकुसुमायमानत्वात्। तदेतत्परमदुरवगाहरहस्यमभिजानानःकपिलमहामुनिरनवद्यानिविवेकुकामःकालमुपेक्ष्यान्यान्येवपंचविंशतितत्त्वानिविविवेच। मूलप्रकृतिरविकृतिर्महदाद्याःप्रकृतिविकृतयः सप्तषोडशकश्चविकारोनप्रकृतिर्नविकृतिःपुरुषइति। नचैतेषुचतुर्विंशतितत्त्वेषुकालस्यांतर्भावोमुनिनाविवक्षितइतिशंकनीयं।त्वदभिमतस्यकालस्यचयोक्तपंचविंशतितत्त्वानांचपरस्परमत्यंतविलक्षणत्वात्। तथाहि।चिरक्षिप्रादिव्यवहारस्यासाधारणोहेतुःकालइतित्वदभिमतंकाललक्षणं।तत्त्वानांत्वन्यादृशानिलक्षणानि।सत्त्वरजस्तमसांगुणानांसाम्यावस्थामूलप्रकृतिः।महदहंकारपंचतन्मात्राख्यानांसप्तानांप्रकृतिविकृतीनामर्थोध्यवसायहेतुर्महत्त्वं।अभिमानहेतुरहंकारः।शब्दस्पर्शरूपरसगंधात्मकानिपंचतन्मात्राणि।श्रोत्रादिपंचमहाभूतानांएकादशेंद्रियाणांचैवंलक्षणविकाराणांलक्षणानिप्रसिद्धानि। अप्रकृतिरविकृतिःपुरुषश्चिदात्मकः।नह्येवंलक्षणकेषुतत्त्वेषुकालस्यांतर्भावःसंभाव्यते। नापिषड्विंशत्तत्त्वातिरंमुनिरनुमन्यते। कथंतर्हिमुनिप्रणितानितत्त्वान्यर्थाभिःसंगृह्णानःईश्वरकृष्णोबहिःकरणांतःकरणेर्विनैवकालंव्यवजहारःसांप्रतकालवद्यौक्तिककालमाभ्यंतरकरणमिति।परप्रसिद्ध्यापरोबोधनीयइतिन्यायेनायंव्यवहारोनानुस्वसिद्धांताभिप्रायेणेतिवदामः। अतएवेतदूचनंव्याचक्षाणावाचस्पतिमिश्रास्तत्त्वकौमुद्यामाहुः। कालस्त्वौपाधिकोभिमतएकोतीतानागतादिभेदंप्रवर्तयितुमर्हति।तस्मादयंनैरुपाधिभेदैरतीतानागतादिभेदभावंप्रतिपद्यते। संतुतएवोपाधयोव्यवहारहेतवःकृतमंतर्गडुनाकालेनेतिसांख्याचार्याः तस्मान्नकालरूपतत्त्वांतरमभ्युपगम्यते। अत्रोच्यते। भूतकालोवर्तमानकालोभविष्यत्कालइति। एवंत्रिष्वपिभूतादिष्वनुगतःकालप्रत्ययएकमनुगतंकालतत्त्वंतरेणानुपपन्नइति। तन्न। पदार्थप्रत्ययवदनुपपत्तेः। यथाभवन्मतेद्रव्यपदार्थेगुणपदार्थेकर्मपदार्थेसामान्यपदार्थेविशेषपदार्थेसमवायपदार्थेषट्सुभावेषुचतुर्षुभावेष्वभावेसप्तमेपदार्थेप्रत्ययोनुवृत्तइत्येकमनुगतंपदार्थमभ्युपेत्यांतरेणानुपपन्नः।तथाकालप्रत्ययःकुतोनोपपद्यते।तस्मान्नित्यंकालंनिर्णेतुंमहानयंउद्यमः।प्रेक्षावच्छिरोमणेर्माधवाचार्यस्यनकथंचिदनुपपन्नइतिएवंप्राप्तेब्रूमः।मनुष्यजन्मनश्चैवंनिरूढकालतत्त्वेयंप्रेक्षावत्सकस्मेहेतोरितिवक्तव्यं।किंकपिलमहामुनिनानिरूपितत्वात्, किंवा सांख्यशास्त्रप्रणीतेषुतत्त्वेषुसंगृहीतत्वात्,उतलक्षणाभावात्।आहोस्विन्मानाभावात्। अथवाप्रयोजनाभावात्। अथवातत्त्वगतपंचविंशतितत्त्वसंख्याभ्यासपाटवेनावसिद्ध्यत्वाज्जाड्यात्।नत्रथमः। कालनिरूपकसूत्रस्थमुनिनाप्रणीतस्यानुपलंभात्।नद्वितीयः।अतिप्रसंगात्। ऋग्वेदादिस्मृत्युक्तानांज्योतिःशास्त्रादीनांआयुर्वेदधनुर्वेदगांधर्वस्मृत्युक्तानामोषधिरत्नस्त्रयादीनांवासंगृहीतत्वेनतेषामपिभवतः प्रेक्षावत्त्वंकेनवार्यते। अथतेषांविशिष्टासंग्रहेपिसुखदुःखमोहात्मकत्वेसत्त्वगुणत्रयांतर्भावादत्रैवार्थांतरसंग्रहइत्युच्यते।तर्हिकालस्याप्यस्मिन्नदंडवारिनरूपितसृष्टिसंहारसाधकत्वं।कालस्यगुणत्रयपरिणामत्वेसावयवत्वंनित्यत्वंघटादिवत्प्रसज्येतेतिचेत्। नित्यनिरवयवकालतत्त्वाभिनिवेशेवतोवैशेषिकादेःपतत्यंजत्रप्रहारःशिरसिवेदवादिनांतुनकापिक्षतिः।कालस्योत्पत्तिसावयवत्वयोःप्रत्यक्षश्रुत्यनुपलभ्यमानत्वात्।नैमिरीयशाखायांनारायणीयेकालोत्पत्तिरुपलभ्यते। सर्वेनिमेषजास्तिरेविशेषाःपुनःपुरुषादधि। कलाःमुहूर्ताःकाष्ठाश्चाहोरात्राण्यर्धसर्वशः।अर्धमासामासाऋतवःसंवत्स

माधवीयकालनिर्णयारंभः

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

श्रीगणेशाय नमः॥ तमेव निर्णेयं न्यायैरेवाभ्यां कर्तुमुद्यमः॥ ॥ननु नायमुद्यमः सफलः। कालस्य गगनकुसुमायमानत्वात्। नदेतत्परमरहस्यमभिजानानः कपिलमहामुनिस्तत्त्वानि विवेक्तुकामः कालमुपेक्ष्यान्यान्येव पंचविंशतितत्त्वानि विविवेच। मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्तापेऽउष्टकश्चविकारेऽनप्रकृतिर्नविकृतिःपुरुषश्रुतिः। नचैतेषेवतत्त्वेषुकालस्यांतर्भावोमुनिनाविवक्षितइतिशंकनीयं। तदभिमतस्यकालस्यथोक्तपंचविंशतितत्त्वानांचपरस्परमत्यंतविलक्षणत्वात्। तथाहि। चिरक्षिप्रादिव्यवहारस्यासाधारणोहेतुःकालइतितदभिमतंकाललक्षणं। तत्त्वानांतुन्यादृशानिलक्षणानि। सत्त्वरजस्तमोगुणानांसाम्यावस्थामूलप्रकृतिः। महदहंकारपंचतन्मात्राख्यानांसप्तानांप्रकृतिविकृतीनामधर्मेध्यवसायहेतुर्महत्तत्त्वं। अभिमानहेतुरहंकारः। शब्दस्पर्शरूपरसगंधात्मकानि पंचतन्मात्राणि। श्रोत्रादिपंचमहाभूतानांएकादशेंद्रियाणांचैवंलक्षणानिप्रसिद्धानि। अप्रकृतिरविकृतिःपुरुषश्चिदात्मकः। नह्येवंलक्षणकेषुतत्त्वेषुकालस्यांतर्भावःसंभाव्यते। नापिषड्विंशत्तत्त्वांतरंमुनिरनुमन्यते। कथंतर्हिमुनिप्रणीतानितत्त्वान्यार्याभिःसंगृह्यानःईश्वरकृष्णोबहिःकरणांतःकरणेविनैवनूकालंव्यवजहार। सांप्रतकालबाह्यंत्रिकालमाभ्यंतरकरणमिति। परप्रसिद्ध्यापरोबोधनीयइतिन्यायेनार्यव्यवहारेऽनुसृतसिद्धांताभिप्रायेणेतिवदामः। अतएवेतदूचनंव्याचक्षाणावाचस्पतिमिश्रास्तत्त्वकौमुद्यामाहुः। कालस्तूपाधिकाभिमतएकोतीतानागतादिभेदंप्रवर्तयितुमर्हति। तस्मादयंपरैरुपाधिभेदैरतीतानागतादिभेदभावंप्रतिपद्यते। संतुतएवोपाधयोव्यवहारहेतवःकृतमंतर्गडुनाकालेनेतिसांख्याचार्याः। तस्मान्नकालरूपतत्त्वांतरमभ्युपगमइति। अथोच्येत। भूतकालोवर्तमानकालोभविष्यत्कालइति। एवंत्रिष्वपिभूतादिष्वनुगतःकालप्रत्ययएकमनुगतंकालतत्त्वमंतरेणानुपपन्नइति। तन्न। पदार्थप्रत्ययवदुपपत्तेः। यथाभवन्मतेद्रव्यपदार्थोगुणपदार्थइतिषट्सुभावेषुचतुर्षुभावेषुअपिसत्तेरेवपदार्थप्रत्ययमेकमनुगतंपदार्थमाश्रित्यमंतरेणानुपपन्नः। नत्वाकालप्रत्ययःकुतोनोपपद्यते। तस्मान्निस्तत्त्वंकालंनिर्णेतुंमहानयंउद्यमः। प्रेक्षावच्छिरोमणेर्भवतआचार्यस्यनकथंचिदनुपपन्नइतिएवंप्राप्तेब्रूमः। आयुष्मन्नेवमस्त्वेवंनिरूढकालतत्त्वेयंप्रेक्षावत्सकस्मेहेतोरितिवक्तव्यं। किंकपिलमहामुनिनानिरूपितत्वात्। किंवा सांख्यशास्त्रप्रणीतेषुतत्त्वेषुसंगृहीतत्वात्। उताहोस्वित्प्रमाणाभावात्। अथवाप्रयोजनाभावात्। अथवातत्प्रतिपंचविंशतितत्त्वसंख्याभ्यासपाटवेनावसिद्ध्यत्। आद्यंतावत्। नत्रयमः। कालनिरूपणस्यतत्रस्थमुनिनाप्रणीतस्यानुपलंभात्। नहितीर्थः। अतिप्रसंगात्। ऋग्वेदादिमोक्षानांज्योतिष्टोमादीनांआयुर्वेदधनुर्वेदगांधर्वमोक्षानामोषधशस्त्रस्त्रशस्त्रादीनांचासंगृहीतत्वेनतेषामपिभवतः प्रेक्षावत्त्वंकेनवार्यते। अथतेषांविद्यासंग्रहेपिसुखदुःखमोहात्मकत्रैगुण्यांतर्भावादत्रैवार्थेतत्संग्रहइत्युच्यते। तर्हिकालस्याप्यत्रैवांतर्भावइतिसुस्थितंसमाधत्त्व। कालस्यगुणत्रयपरिणामत्वेसावयवत्वेनित्यत्वंघटादेरिवप्रसज्येतेतिचेत्। नित्यनिरवयवकालतत्त्वाभिनिवेशवतोवैशेषिकादेःपतत्त्वयंवज्रप्रहारःशिरसिवेदवादिनांतुनकापिक्षतिः। कालस्योत्पत्तिसाध्यत्वंयोःप्रत्यक्षश्रुत्युपलभ्यमानत्वात्। तौनिरीक्ष्यक्षणादयोनानाप्रमाणमेकालोत्पत्तिरुन्नीयते। सर्वेनिमेषजास्त्रिरेवविशेषतुनःपुरुषादपि। कलासमूहतीःकाष्ठास्त्राहोरात्रास्त्रयस्सर्वेपिः। अर्धमासामासाऋतवःसंवत्स

कालमाधव २

रश्ववर्तनामिति। तस्यामेवशाखायां श्रुतेकेतुकवचनव्याख्याने सावयवत्वं श्रूयते। उक्तोवेषोवासां सिक्थकालावयवानामितः प्रतीचेषिति। इतोस्मादनुवाकात्प्रतीचीषुशस्त्रेषु श्रुतेकेतुकालावयवानामत्रत्यां धृतव्रतोवेषउक्तः वस्त्राणि चोक्तानीत्यर्थः। नित्यत्वनिरवयवत्वाभिधायिनोवैदिकादिशास्त्रस्यामूर्तादेवतामूर्तिवदंपेक्षिकनित्यतायामंतर्धानशक्त्युपेतमक्षराक्षसादिवत्संस्पर्शयोग्यावयवशून्यतायांचनात्यंतंवर्जनीयं। एवंचसतिविरोधाधिकरणन्यायोनानुगृहीतोभवति। तस्यचन्यायस्यसंग्राहकावेतौश्लोकौ॥ श्रौदुंबरीवेष्टितवासर्वलेषांस्मृतिर्मितिः। अमितिर्वेतिसंदेहेमितिःस्यादेककादिवत्॥ श्रौदुंबरीस्थूणाग्रेतिदितिप्रत्यक्षवेदतः। विरोधान्मूलवेदस्यानुमानादुमानतेति। अयमर्थः। अधरेमहावेद्यासदोनामकस्यमंडपस्यमध्येकाविदुंबरस्थूणास्तंभस्तेन निखातोभवति। तामुद्दिश्यवस्त्रवेष्टनंस्मर्यते। श्रौदुंबरीसर्वावेष्टमितव्येति। तत्रसंशयः। एषास्मृतिःप्रमाणंनवेति। तत्रपूर्वाधिकरणेश्रुतेकः कर्तव्याःस्मृतेर्मूलवेदानुमापकत्वेनप्रामाण्यमुक्तं। तेनैवन्यायेनसर्ववेष्टनस्मृतिः प्रमाणमितिपूर्वपक्षः। श्रौदुंबरीस्थूणेदंयगायेतिप्रत्यक्षश्रुतौस्थूणेविधीयते। नचासौसर्ववेष्टनेसत्युपपद्यते। तथाचसर्ववेष्टनस्मृतिर्मूलभूतवेदानुमानस्यप्रत्यक्षश्रुतिविरुद्धस्यकालात्ययापदिष्टत्वेननिर्मूलावेष्टनस्मृतिरप्रमाणमितिसिद्धांतयति। अथमन्यसेमहतातपसाऋषिणाभाष्यप्रणेत्रासादरलब्धसर्वश्रुतपदःकणादमहामुनिर्वेदतात्पर्यसम्यग्वेत्तीतिवेदस्यैवमंदमतिप्रतीतादर्थादर्थांतरंनेतव्यमिति। एवमपिमत्स्यप्रसादादयंसर्वज्ञतामलभतसएवऋषिरेमुख्यः सर्वज्ञइतितन्मतानुसारेणकणादमतस्यैवान्यथानयनमसंगतमुचितं। ऋषिरोहिसर्वधर्मेषुषड्विंशत्तत्त्वानिनिरूपयन्मूलकालतत्त्वेत्यपिनिर्मुक्तिरूपाधिकस्यमुख्यकालस्येति। तार्किकपक्षः। प्रत्यक्षश्रुतिभिर्बहीभिरनुगृहीतावह्नीषोमब्राह्मणस्मृतीत्रत्रयीकारणतामाचक्षते। सारस्वतस्मृतिस्त्वेकामूलहीनावेति

कल्पोदेवानामथाभावात्

श्रीगजानन

नेषणाया प्रहृत्तश्चिंतामणिमलभते ।सस्य वासिष्ठरामायणश्लोकस्याभाणकस्यतमेव विषयोभूत्। यतः साधर्म्यवैधर्म्यज्ञानाभ्यां निश्चित द्रव्याण्य
परत्वापरत्वसमवायि । मः।अवहारहेतुलंभूतकाल विशेषाणा आधारः स्वयंव्यवहारतीतोनित्योनिरवयवोमुख्यः कालोयःसपरमात्मे
व। तथाचश्वेताश्वतरश्रामनंति।कालकालोगुणीसर्वविद्यइति।आस्तांनित्यत्वनित्यत्वसावयवत्वनिरवयवत्वचिंता। सर्वथा
प्यस्तिसंख्यातत्वेघार्थिकःकालसंग्रहः।साक्षात्तुहाभावस्तुज्योतिष्टोमादिवत्कृतिपुरुषविवेकानुपयोगादित्यवगंतव्यं। तती
यश्चतुर्थपक्षोनुभवतोवैशेषिकुपस्वयंधोपिनास्तीतिप्रकटमतःवैशेषिकग्रंथेषुसर्वेष्वपिकालप्रकरणेतल्लक्षणस्यतत्साधका
नुमानस्यचप्रपंचितत्वात्।प्रमातरणितुकालसाधकानिश्रुत्यैवोपन्यस्तानि।तथाचअरुणकेतुकेमंत्रमामनंति।स्मनिःप्रजस्तमे नैतिरीया
नेतिह्यमनुमानश्रुतयः।एतैरादित्यमंडलंसर्वैरेवविधास्यते। तत्रस्मृतिरनुमेयश्रुतिमूलंमन्वादिप्रणीतं। प्रजपतेश्रोत्रोत्रोत्रोंकृत्रि
मोवेदाख्योवररत्रियोगित्रलक्षणोपनिषदाभिमतंसाक्षित्रलक्षंवा। ऐतिह्यमितिह्यासपुराणादिकंज्योतिश्शास्त्रस्यजनेभविष्यद्रूप नितः
यः।अनुमीयतेस्मृत्यूहमूलंस्मृतिवाक्यमनेनेत्यनुमानः शिष्टाचारः।तत्स्यचस्मृत्यनुमापकत्वमाचार्यैर्बहुस्थलेभिहितं। आ
चारश्चस्मृतिंज्ञात्वा श्रुतेश्चश्रुतिकल्पनेति।तदेवंस्मृत्यादीनांचतुष्टयंसंपन्नं। एतेश्चतुर्भिस्सर्वैरप्यादित्यमंडलंप्रतीयतइति त्य
मंत्रस्यार्थः।ननुस्मृत्यादीनिमंडलेसाधकत्वेनात्रोपन्यस्तानि।नतुकालसाधकत्वेनेतिचेत्।मैवं।मंडलस्यसौवर्जनीनत्वप्रत्य
क्षसिद्धत्वेनतत्रस्मृत्यनुपयोगात्। कालविवक्षयैवात्रकाल निर्वाहकेमंडलेतान्यनुपन्यस्तानि।तथाचमंडलद्वारकाल
स्तैःप्रमीयते।कालविवक्षातोनरमंत्रेश्वतिस्फुटं।तत्रानंतरमंत्र एवमाम्नायते। स्वेमहिम्नीतिमादत्तेसर्वस्मादुपनादृषिः। त

स्याःपाकविशेषेणस्वतंकालविशेषणमिति। तस्यायमर्थः।भुवनगतंसर्वभूतजालमपिस्वस्वरसतीर्यविषकादिभिस्तत्तद्रूप्या
हसमर्थमरीरिंसत्यर्थःस्वीकरोति।तत्स्वेनस्वभूतपाकविभेदेननिमेषादिःपरार्धपर्यंतःकालविभेदोस्माभिरवगंतव्यइति॥
कालप्रतिपादकानिचस्मृत्यादीन्युदाहरामः।तत्रमनुः।कालंकालविभक्तिंचैवस्थितिप्रकरणेकालंस्वयंजहार।चाक्षुषस्यापि। आधि
लाःप्रकीर्तितास्तुति।एवमन्यास्वपिस्मृतिषूदाहार्यं।श्रुतिष्वपि।कृतंमेदक्षिणेहस्तेविजितोनिकालइतिबह्वृचाः।अहमेवकालोकालो नाहं
स्मीतितैतिरीयाः।काचसंख्याकृत्संख्यामात्रंकालइतिसामगाः।योगशास्त्रेपि।संक्षयमविशेषाधारणाध्यानसमाधित्रयरूपा
योगिनोतीतादिकालंप्रत्यक्षतःपश्यंतीत्यभिहितं।तथाचपातंजलसूत्रं।परिणामत्रयसंयमादतीतानागतज्ञानमितिसाक्षित्रए
क्षेपि। अहमस्मिन्कालेनियतमीत्यनुभवस्यसार्वजनीनः।नचासौवाह्येंद्रियकृतः।कालस्यरूपादिहीनत्वात्।नाविमान
सः।तार्किकैस्तदंगीकारात्।नाप्यनुमानादिजन्यः।अपरोक्षत्वात्।अतःसामग्यभावेप्यपरोक्षत्वंदूरीनात्साक्षित्रत्वस्य
मतदित्यपनिषदामनंति। दूरंतिहासेपिभारतेपठ्यते। प्रहरोघटिकाचैवत्रहरोघटिकाधिके। कोसेलःकुतपोदैवयःपितृणांदत्तमक्ष
यमिति।पुराणेपि।अनादिरेषभगवान्कालोनंतोक्षरःपरः।क्षिपाकाष्ठाकलामात्रास्तस्यरूपे कालेआहिनैवुकसंज्ञकान्।स्वस्वकुलो इति।
चितान्दैवविशेषेभ्यःक्षीरहव्यादिसमर्पणादिकान्धर्मविशेषान्भानुवारादिकालविशेषेसमाचरंति।तदेवमनेकप्रमाणप्र
मितकालेप्रमाणाभावंश्रुत्यः पश्यःकथमाहंकथंते। नापिप्रयोजनाभावादितिपंचमःपक्षोनुज्यतेतार्किकैस्तावत्सर्वोत्पत्तिनि
मित्तकारणत्वसंग्रहोचितं।लोकेचकुंभादिषूपयोगःकालविशेषस्वरूपज्ञानादिभिर्व्यवह्रियते।गृहप्रवेशप्रमाणादिषूपयोगोपि

सूर्यादिग्रहप्रधानं सावनदिनाधारणी

ज्योतिःशास्त्रप्रसिद्धः श्रौतस्मार्तकर्मोपयोगस्तुसदृष्टिविष्यते। तस्मात्पूर्वाचार्यकृतस्तवप्रदेशदृष्टसंभवतः पक्षः परिग्रह्यते। तथाचपाणिनः स्वस्मृध्यपरार्धपुण्याहनिमाघमासार्धसमारोपमनुकुमाराधिक्षमासदंशुद्धि। तेदंकालस्यप्रत्यक्षानुमानगम्यत्वान्निर्णयोद्यमःसफलइतिसुस्थितं। ननुःकतरःकालोत्रनिर्णीयते। किंकेवलःकालःउतकालकालः। ननुकिमिलप्रसिद्धभाषयाभीमयसिनभीषयाम्यहं। किंत्वस्यैवकलयिभेदाकालेद्विधा येनप्राणिदेहादयोनीतवर्तमानादिरूपेणकलयितव्यःसकेवलःकालःसचतत्प्रकाशवचनेनदर्शयतिजगदेषकालेगतइति। तादृशःकालोत्पत्तिस्थितिविनाशकारिणावेनकलयितव्यःसकालकालइति। सचवासिष्ठरामायणेदर्शितःकालोपिकल्प्यतयेतिश्रुतिश्चभवति। सविश्वकृद्विश्वविदात्मायोभिःकालकालेगुणीसंसारोहास्थितिबंधहेतुरितिच। कूर्मपुराणेपि। अनादिरेषभगवान्कालोनंतोजनैःपरः। सर्वगत्वात्सतंत्रत्वात्सर्वात्मत्वान्महेश्वरः। त्रत्माणोबृहत्वेरुद्रःअन्येनारायणादयः। एकोहिभगवानीशःकालःकविरितिस्मृतः। अतोनारायणेशानांत्रयाणांत्राकृतोलयः। क्षीयतेकालयोगेनपुनरेवचसंभवः। परंब्रह्मचभूतानिवासुदेवोपिशंकरः। कालेनैवचसृज्यंतेसएवग्रस्तेपुनः। तस्मात्कालात्मकंविश्वंसएवपरमेश्वरइति। विष्णुधर्मोत्तरेपि। अनादिनिधनोरुद्रःकालश्चसंकर्षणःस्मृतः। कलनात्सर्वभूतानांसकालःपरिकीर्तितः। कर्षणात्सर्वभूतानांसतुसंकर्षणःस्मृतः। सर्वभूतक्षयेलब्धसरुद्रःपरिकीर्तितः। अनादिनिधनत्वेनसमहान्परमेश्वरइति। ज्योतिःशास्त्रेपि। भूतानामंगकृत्कालःकालोन्यःकलनात्मकइति। तत्रैवंसतिद्वयोर्मध्येकंकालंकालोत्रनतावन्निर्णेतथः। तस्यधर्मानुष्ठानेहेतुत्वात्। अनुपादेयत्वाच्च। यस्मिंतरोमास

परइतिध्यादिरूपः सोपिज्योतिःशास्त्रेसम्यङ्निर्णीतइतिउक्तमनयाकालनिर्णयप्रवृत्तेरितिशास्त्रे ब्रूमः। उभयमप्यत्रनिर्णेतव्यं। कालकालस्यजगदीश्वरस्यसर्वेषुकर्मारंभेषुस्मर्यतेअतएवऋषयःपुण्याहवाचनादौईश्वरमनुस्मरंति। सर्वेषुकालेषुसमस्तदेवेषुशेषकार्यार्थंपुनर्महेश्वरेश्वरः। सर्वैःस्वरूपैर्भगवान्नादिमान्ममास्तुमांगत्यविद्धर्यिहिः। यस्यस्मरणवाचनामोत्तसातपोयज्ञक्रियादिषु। न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतमिति। मासादिरूपभेदस्यतुस्वरूपेणनिर्णीतत्वेपिश्रौतस्मार्तकर्मविशेषेण सहकालस्यांगांगीभावोनिर्णेतव्यः। यथथसोहेमाद्रिभट्टादिभिर्निर्णीतस्तथाप्येकत्रप्रकीर्णत्वैकत्रसंग्रहाभावश्चलः क्रियतेतेदंचिकीर्षितस्यकालरूपोविषयःसंग्रहरूपंप्रयोजनंचास्तीत्यंग्रंथआरभ्यते। क्षिप्रोजघन्यश्चकालोहूर्तस्तयोराद्यःपरेश्वरः। सोवाङ्मनसगम्योपिदेहीभक्तानुकंपयेतिनित्यकालस्यपरमेश्वरत्वेपिप्रमाणपूर्वमेवोपन्यस्तं। परमेश्वरस्यचावाङ्मनसगोचरत्वेसर्ववेदांतास्तदनुसारिस्मृतिपुराणानिचत्वदनुभवश्चप्रमाणं। भक्तानुग्रहमूर्तिस्वीकारश्चतत्कर्तृकारणेसामवेदशाखाविशेषेकस्यांविद्याख्यायिकायामाम्नायते। तस्मात्ह्यायमेवमुक्तं। अग्निर्वायुरादित्योदेवाईश्वरानुगृहीताःसर्वंविजयमानाःस्वकीयमेवैतत्सामर्थ्यमितिमन्यंते। तान्बोधयितुमवाङ्मनसगम्यंपरमेश्वरंब्रह्महैमवतीउमांकांचिन्मूर्तिंधारयित्वाप्रादुर्बभूव। तमासहवादंकृत्वापिसाजसत्रि। आवयोरिवब्रह्मणस्तत्वंनैवबुबुधिरे। इंद्रस्तुसात्त्विकचित्तोबुबुधइति। वासिष्ठरामायणेपिशुक्रोपाख्याने। शुक्रंप्रतमवलोक्यतत्पिताभृगुःकृपोमास्वितामेकालंप्रबुबुधतः। तदाभीकालोनुग्रहीतुमीदृशेनरूपेणाविर्बभूवेतिपठ्यते। अथाकल्पितरूपोसौकालः कवलितप्रजः। आदिभीतोकमा

माधवकारिका- स्थापयपुर्मुनिमुपाययौ। खड्गपाशधरःश्रीमान्कुंडलीकवचान्वितः। ऋतुषड्भुजयोर्दारवक्त्रषड्भुजसमाहितः। मासद्वादशकोद्दाम
५ भुजद्वादशकोद्भटः। स्वाकारसममाचष्टाहृतः किंकरसेनया। सउपेत्यप्रणम्यादौकुपितंतुमहामुनिं। कल्पक्षुब्धाब्धिगंभीरसं
त्वद्वधंमुवाचह। त्वमत्यंततपाविप्रवयंनियतिपालकाः। तिनसंहृत्यसेहृत्यसाधोनेतरयेच्छया। मातपःक्षपयानल्पंकल्पकालम
हानलैः। योनदग्धोस्मिमेतस्यकिंतेशापेनधक्ष्यसि। संसारवलयेग्रस्तानिगीर्णारुद्रकोटयः। भुक्तानिविष्णुवृंदानिकेनश
स्मावधंमुने। भोकारोहिवयंग्रस्तान्भोजनंसुप्रदादयः। स्वयंनियतिरेषाहिनावयोरेतदीहितमिति। ववभक्तानुजिघ्रक्षयास्वीकृतान्
र्तिरीदृशेवेति कश्चिन्नियमोस्ति। सर्वात्मकस्यपरमेश्वरस्यभक्तचित्तप्रियायाः सर्वस्याऽपिमूर्तेः स्वकीयत्वात्। अतएव भ
गवद्गीतायां। योयोयांयांतनुंभक्तश्रद्धयार्चितुमिच्छति। तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहं। सतयाश्रद्धयायुक्तस्त
स्याराधनमीहते। लभतेचततःकामान्मयैवविहितान्हितानिति। विष्णुरुद्रादिचेतनमूर्तिवदचेतनमूर्तयोपितत्तत्कालवि
शेषाग्निरीश्वरूपेणोपास्याः। तदेतत्ऋग्वेदेसमाम्नायते। एतंवेधवबहवोमहत्युक्थेमीमांसंतएतमग्नावध्वर्यवएतंमहा
व्रतेछंदोग्याएतमग्न्याधेतंदिव्यंतंवामावेतमाकाशएतमग्न्वेतमोधीचेतंवनस्पतीचेतंचंद्रमस्येतंनक्षत्रेचेतंसर्वेषुभू
तेषिति। वक्ष्यतेचैनिनोपिमंडलब्राह्मणेनैतमग्निमित्यध्वर्यवउपासतइत्यारभ्यपठंतिविषमितिसर्पाः। सर्पदृतिसर्प
दृदः। ऊर्गितिदेवाऊर्यितिमनुष्याआयेत्यसुराः। स्वधेतिपितरोदेवमनइतिदेवयजमतिदोरूत्तमितिगंधर्वागंधइत्यप्सर
सस्तांयथाययोपासतेतदेवभवतीति। नन्विरीयाश्रयंतिक्षेमइतिवाक्षियोगक्षेमइतिप्राणापानावित्यादिपरब्रह्मारो

धर्म

DR BHAU DAJI

वितंयद्यावज्जगद्रूपमस्तितेनसर्वेणाप्युपास्तनाग्यपरमेश्वरोरूपवान्भवतीतिहिरण्मयाधिकरणमनोमयाधिकरणयोःप्रपं
चितं। एवंचसतियोयदायत्कर्मानुभेतसतदातत्कर्मोपभुक्ताकालात्मकस्येश्वरस्यमूर्तिमिष्टदेवतास्वेनानुस्मरेत्। अतएव
मंत्रशास्त्रेषुनानाविधानिध्यानान्युपदिष्टानिलोकेप्याबिदुरोगोपालंसर्वेद्विजनाएकैकांदेवतांस्वेष्टाभूजयंति। तदेतद्भ
गवानाह। यजंतेसात्विकादेवान्यक्षरक्षांसिराजसा। प्रेताभूतगणांश्चान्येयजंतेतामसाजनाः। तस्मादारभ्यमाणकर्मफ
लप्रदोनिजेष्टदेवतारूपोनित्यकालःकर्मारंभेष्वनुस्मर्तव्यःइतिसिद्धं॥ ॥अथजन्यकालंनिरूपयामः॥ ॥ननुकालस्य
जन्यत्वेसतिकथंप्रलयेकालव्यवहारः। प्रलयःकालःप्रलयोनीतःप्रलयोभावीति। कालनित्यवादिनस्तवापिसमोदोषः।
नित्यस्यकालस्यतपनपरिस्पंदरूपाधिभिःपरिच्छेदसत्त्वेतावान्कालइतिकालेयत्तावर्णयितव्यानचप्रलयेतदुपाधयः
संति। अतस्तवकथंप्रलयकालेऽमत्तानिर्ज्ञेयः। अथस्तकार्यवादाभ्युपगमेनोपाधयोविनाशनारूपेणसंतिनहिकालेपितत्स
मानं। नचैतावतानित्यत्वहानिः। उपाधिष्वतद्रंगीकारात्। अथमन्यसेऽयनारहितेपिप्रलयकालेसृष्टिकालेयत्तावास
नावर्णदियत्तावबोधीयतेतत्रोपाध्यायतादृष्टांतः। कश्चाकश्चिन्माणवकश्चिंत्रंदूर्णवयस्कारभ्येतुमुपक्रम्यसंवत्सर
मधीत्यासकृदुपाध्यायमाहादृष्टांतः। एकश्चित्रंदूर्णवयस्कोऽध्ययनरहितेपतीतेवयस्युपाध्यायंब्रवीति। तदूदि
यत्तावबोधः। एवंतर्हीनेनन्यूनेनकालरहितेप्रलयेकालव्यवहारःकिंनस्यात्। कालरहितंचप्रलयादिकंवस्तुनीतिमं

दूक्यादिश्रुतयोभ्युपगच्छंति। तथाचश्रूयते। यश्चान्यत्रिकालातीतंतदोंकारएवेति। प्रभाकरश्चोदूर्ध्वस्यकालत्रयासंस्पृष्टांकांचिदवस्था
माहुः। तस्मात्कालःसुखेनजन्यतां। सचसामान्यविशेषाभ्यांद्विविधः। तस्यचोभयस्येश्वरस्याज्ञानिमित्तात्कालादुत्पत्तिमतुरुध्यते। कालं
कालविभक्तिंचनक्षत्रग्रहांस्तथा। सृष्टिससर्जचैवेमांस्रष्टुमिच्छन्निमाःप्रजाइतिश्रुतेः। सामान्यकालः। सविशेषानुगततयात्। तद्
पेक्षयानिमेषग्रहगत्यादिभिरनुमेयोभूतोत्पत्तिनिमित्तकारणमितिताकिकज्योतिःकोविदयःप्रतिपेदिरे। तत्रज्योतिषाआहुः। प्र
भवविरतिमध्यहानबंध्यानितांतंविदितपरमतत्त्वायतेयोगिनोपि। तमहमिहनिमित्तंविश्वजन्मास्थयानामनुमितमभिवंदे
भग्रहैःकालमीशं। युगवर्षमासदिवसाः समंग्रहर्क्षतुचैत्रशुक्लादेः। कालोयमनाद्यंतोग्रहैरनुमीयतेक्षेत्रवृद्धि। कालविशे
षेषुचसंवत्सरंप्रधानभूतः। अन्येतुसर्वेगुणभूताः। तथाचारुणकेतुकेसमाम्नायते। नदीवत्रभवत्कालविदस्तुभ्यंस्वदतेयथा
तांनद्योभिसमाप्यंतिसोहः सतीर्निवर्तते। एवंनानासमुद्भवानाःकालाःसंवत्सरंश्रिताः। अप्पूर्वाश्चमहत्यश्चसर्वेसमवयं
तितं। सतैःसर्वैःसमाविष्टउक्तःसन्ननिवर्तनेनूति। अयमर्थः। भागीरथीगोदावर्यादिकानदीवायंकालः। कुतश्चिदुत्पत्तिस्था
नादुत्पद्यते। तथोत्पत्तिस्थानंसांख्योक्तप्रकृतिर्वाशैवागमोक्तमायावाश्रुतिस्मृत्युदितंनित्यकालात्मकपुरुषरोवाभविष्यति।
यथातांगंगादिकांनदीमन्याअल्पमेधोअभितःप्रविशंति। साचत्रविशंतेर्नद्यंतैःसहविस्तीर्णाप्रवहत्त्वाहासतीनकदाचि
च्छुष्यति। एवंनानाविधैस्तैःसमुत्पन्नाःकालभेदाः संवत्सरंप्रधानंकालमाश्रिताः। तत्रनिमेषाद्याअयनपर्यंताःका ६
लभेदाःसंवत्सरादणवःयुगाद्याःपरार्धपर्यंताःसंवत्सरान्महांतस्तेसर्वेतंसंवत्सरंसम्यक्त्रविशंति। अप्पूर्णामवचनेनश्रीगजानन

प्रवेशः। महांतुसंवत्सरावृत्तिनिष्पाद्यानामध्यक्षःसंवत्सरइतितत्रप्रवेशोभिधीयते। तथाचवेदांगेज्योतिषग्रंथेपठ्यते। पंचसंवत्सरम
यंयुगाध्यक्षंप्रजापतिं। दिनर्क्षयनमासांगंप्रणम्यशिरसाशुचिरिति। सचसौरेणभैश्चसर्वैःसमाविष्टोतिदीर्घःसन्नस्मिन्जगतिनोच्चि महद्वि
तरत्वंनिमेषपर्यवसितंतुमहत्तुपरार्धे। तथाचतयोरन्यतरस्याप्राधान्यमुचितं। तत्रकथंसंवत्सरस्यप्रधान्यमिति
चेत्। ईश्वरेणप्रथमंसृष्टत्वादितिब्रूमः। तथाचवाजसनेयिनःसमामनंति। सोकामयतद्वितीयोमआत्माजायेतेतिसमनसावाचा
मिथुनंसमभवत्। तद्यद्रेतआसीत्संवत्सरोभवदिति। तस्मात्संवत्सरंप्रधानं। अतएवसंवत्सरमारभ्यकालविशेषंनिर्णयामः। त
त्रसंवत्सरअयनमृतुर्मासःपक्षस्तिथिर्नक्षत्रमित्येवंविधाःकर्मकालाः। मत्स्यपुराणेतुमृत्युमार्कंडेयादीनांयुगादिप्राकल्पादि
परिमितःक्षेत्रैःस्मर्यते। तत्राविशतसंवत्सरायुषोमनुष्याःनाधिकृतधर्मशास्त्रप्रवृत्तेर्नयुगादिनिर्णयोत्रैयुक्तः। मनुष्याधिका
रत्वंचास्माभिःपराशरस्मृतिव्याख्यानेमनुष्याणांस्मृतंधर्मशास्त्रमनुनेप्रपंचितं। चेतुकलौपंचविवर्जयेदिलादयोमनुष्यध
र्मास्तेषामपिनयुगादिकंनिर्णेतव्यं। संदेहाभावात्। अत्रशतायुषाधिकारेकथंसंवत्सरसत्रश्रुतिरितिशंकनी
यं। तत्रसंवत्सरशब्देादिवसपूरकृतिषष्ठाध्यायसप्तमपादेनिर्णीतत्वात्। नचसंवत्सरवृत्तिसाध्यानंतव्रतादयस्तेषांनित्यसंव
त्सराधिकरणसिद्धत्वात्। नचकालस्यकर्मांगत्वेविवदितव्यं। सर्वयंजुहोतिप्रातर्जुहोतीतिवाक्यादंगत्वप्रतीतेःतत्रकर्मणस्तावदपूर्वविषयत्वात्प्राधान्यमभ्युपगंतव्यं। तथाचकालस्यगु
णत्वेनाभ्यर्हितपरिच्छेदोपपत्तेः। अथएवगर्गः। तिथिनक्षत्रयोगादिसाधनंपुण्यपापयोः। प्रधानगुणभावेनस्वातंत्र्येणनतेस्मार्ताः
इति। तस्मादंगभूतेषुनिर्णयेषुकालेषुयविलेनसंवत्सरंप्राग्भूतंतादल्पवक्तव्यतयास्वीकृताहस्थामनुसारात्रसएवा

॥ इतिमाधवीये प्रकरणेऽपोद्धृतप्रकरणं ॥ ॥ संवत्सरोनामाब्दवयवसुक्तोवयवीकालविशेषः सम्यक्वत्सलास्मिन्मुख्यमनुष्ठानं यत्र
मासाद्यमिति व्युत्पत्तेः। सचद्वादशमासात्मकः। द्वादशमासाः संवत्सरः। इतिश्रुतेः। मासानांतुचांद्रसावनसौराख्येनदिवसभेदेनत्रा
द्वादित्रैविध्यंवक्ष्यते। मासत्रैविध्येनसंवत्सरस्त्रिविधः। तद्भेदंब्रह्मसिद्धांते। चांद्रसावनसौरा णांमासानांतुत्रभेदतः। चांद्रसावनसौर।
स्युस्त्रयसंवत्सरा अमी ति। तत्रचांद्रः संवत्सरः। चैत्रशुक्लप्रतिपदादिः कार्य्यः। लग्नदर्शनतिः। सौरस्तुमेषादिसंक्रांतेः। सावनंषष्ट्युत्तर
शततमहोरात्रात्मकः। तेचत्रयः संवत्सराः केषुचित्कर्तव्येषुव्यवतिष्ठंते केषुचित्त्रविकल्प्यंते। तत्राचभविष्योत्तरपुराणे। संवत्सरसाध्यंति
लकव्रतप्रस्तुते। वसंतेकिंशुकाशोकचूतमंजरीसमन्विते प्रतिपत्तिथिः। शुक्लात्तस्यांप्रकुर्वीतस्नानं नियममास्थितः। ललाटपृष्ठेतिलकंकुर्या
च्चंदनपंकजं। तन्नूपुरध्वनिनिलकोलंकृतमुखं। ध्यायेत्संवत्सरंप्राप्तं। क्ष शिनेवनभस्तलमिति। तत्रसंवत्सरश्चांद्रोवगंत
व्यः। शुक्लपक्षप्रतिपन्नियमस्तल्लिंगलात्। नहिशुक्लकृष्णपक्षोप्रतिपदादितिथयश्चसौरसावनोपजीवनेनप्रवृत्ताः। यत्तुवर्षा न
णिपंचचेत्यादिसंवत्सरस्यानंतव्रताद्यंगत्वंस्मर्यतेतत्रापिचांद्रएवसंवत्सरः। शुक्लपक्षेचैसंवत्सरस्मरणेपेक्षलात्। अत
एवब्रह्मपुराणेभिहितं। चैत्रेमासिजगद्ब्रह्मा ससर्जप्रथमेहनि। शुक्लपक्षेसमग्रंतत्तदाप्तसूर्योदयेसति। प्रवर्तयामासतदाका
लस्यगणनामपि। ग्रहान्भागान्तथामासान्वत्सरानृतुभिःसह। चांद्रसौरसावनर्क्षैस्तुतत्रतत्रनिमित्तान्युच्यंते। चंद्रकला
वृद्धिक्षयप्रयुक्तप्रतिपदादितिथीनांषष्ट्यधिकशततमेननिष्पन्नोयःसचांद्रः। द्वादशराशिषुसूर्यसंक्रमणेर्निष्पन्नोयःससौ
रः। सावनशब्दोहोरात्रेपलक्षत्वात्। सोमयागेसदनत्रयस्याहोरात्रसंपाद्यलात्। तैश्चसवनैःषष्ट्यधिकशततयसंख्याकैर्निष्प
न्नोयःससावनः। एवंसतिवर्तमानभाद्रशुक्लचतुर्दशीमारभ्यआगामिभाद्रशुक्लचतुर्दशीप्राचीनेतिथिसमुदायेचांद्रसंवत्स श्रीगजानन
रस्यपुष्पलात्। अतएवब्रह्मपुराणेभिहितं। तत्रसावनोग्रहीतव्यः। चांद्रसौरोमीन
योस्तदनुष्ठानासंभवात्। तथाहिअहोरात्रसाध्यः कःसोमयागोवेदेऽहःशब्देनाभिधीयतेतादृशानांमहर्षिप्रेषाणांगणःषड
हःसचद्विविधः। अभिप्लवःषष्ठश्चेति। तत्रचत्वारोभिप्लवाःषडहाःएकएषांद्व्यःषडहइतिषडहपंचकेनएकोमासःसंपद्यते। ता
दृशैर्द्वादशभिर्मासैःसाध्यसंवत्सरसत्रं। तथाचसामवेनेवतत्सिद्धिः। तथाचांद्रस्यषड्विरहोरात्रैर्न्यूनतासौरस्यसपादैः पं
चभिरहोरात्रैरधिकतात्। ननुसंवत्सरायदीक्षिष्यमाणाएकाएकादशीदीक्षेरन्निति माघमासगतायामेकाद्श्यांचांद्रतिथौसत्रा

लमविरुद्धं॥ यज्ञतिरूपपशुबंधप्रकरणेश्रूयते। तेनसंवत्सरेसंवत्सरेष्यजेतेतिपशुनासंवत्सरेणातीयादितिचतत्रापिचांद्रएवद्रष्टव्यः।
सर्वान्लोकान्पशुबंधयाज्यभिजयति। तेनयक्ष्यमाणोमादास्यायांपौर्णमास्यांवेतिकल्पसूत्रकारैश्चांद्रतिथौतदनुष्ठानविधानात्॥
सौरस्तुसुजन्मादिप्रवृत्तादवधुज्यते। तद्ग्रहंविष्णुधर्मोत्तरेस्मर्यते। भगवन्सर्वकामानांकेनतीर्थेनोनजायते। क्लेशदेशेच
पुरुषस्तन्ममाचक्ष्वसुव्रत॥ मार्कंडेयउवाच। मेषसंक्रमणेभानोःसोपवासानरोनघ। पूजयेद्दुर्गवंदेवरामंश्चनत्यथाविधीसारभ्य
मीनसंक्रमणेमत्स्यंवासुदेवंचपूजयेदित्रिसंतेनग्रंथेनव्रतंविधायांतेनदुपसंहृतं। कृत्वाव्रतंसंवत्सरमेतद्दिष्टमेष्वपितिर्यक्ष्वपुनश्चापि
जन्मेति। तथास्कंदपुराणे। धान्यदानव्रतंवक्ष्ये। अथातःसंप्रवक्ष्यामिधान्यव्रतमनुत्तमं। अयनेविषुवेचैवस्नानंकृत्वाविधानतः
व्रतं वै
कृत्वारभ्यविधायैवमुपसंहृतं। एवंसंवत्सरेपूर्णेकुर्याद्यज्ञक्रियामिति। सावनस्यसत्रादावुपयोगः। तदप्युक्तंविष्णुधर्मोत्तरे॥
सत्राण्युपक्रमस्यान्यथसावनेनलोक्यंक्रियतेत्याद्यवहारकर्मेति। गोसत्रंसंवत्सरोयएवंविद्वान्संवत्सरमुपयंतिऋभुवस्तेवेतिश्रु
तेर्गवामयनस्यसत्रस्यसंवत्सरनाम्नाव्यवहारात्संवत्सरकालस्तदंगमितिप्रतीयते। तत्रसावनोग्रहीतव्यः। चांद्रसौरयोर्मीन
योस्तदनुष्ठानासंभवात्। तथाहिअहोरात्रसाध्यः कःसोमयागोवेदेऽहःशब्देनाभिधीयतेतादृशानांमहर्षिप्रेषाणांगणःषड
हःसचद्विविधः। अभिप्लवःषष्ठश्चेति। तत्रचत्वारोभिप्लवाःषडहाःएकएषांद्व्यःषडहइतिषडहपंचकेनएकोमासःसंपद्यते। ता
दृशैर्द्वादशभिर्मासैःसाध्यसंवत्सरसत्रं। तथाचसामवेनेवतत्सिद्धिः। तथाचांद्रस्यषड्विरहोरात्रैर्न्यूनतासौरस्यसपादैः पं
चभिरहोरात्रैरधिकतात्। ननुसंवत्सरायदीक्षिष्यमाणाएकाएकादशीदीक्षेरन्निति माघमासगतायामेकाद्श्यांचांद्रतिथौसत्रा

कालमाधव ८ यदीक्षा श्रूयते। ततश्चांद्रेणैव संवत्सरेणभवितव्यं। मैवं। उक्तस्यदीक्षाकालस्यापूर्वपक्षरूपत्वात्। तन्निरुक्तरणंहिश्रूयतेआग्नेयाएते संवत्सरस्याभिदीक्षंतेयएकाष्टकायांदीक्षंतइति। ननुपक्षांतरमपिचांद्रति थिमेवोपजीव्यश्रूयते। फाल्गुनीपूर्णमासेदीक्षेरन्नुखंवाएतत्संवत्सरस्ययत्फल्गुनीपूर्णमासइति। नैतस्यापिनिरुक्तत्वा त्। तस्यैकेवनिर्यातिहिनिरुक्तं। एकेवनिर्या। एकएवदोषइत्यर्थः। ननु सिध्यंतेप्येवंश्रूयते। चित्रापूर्णमासेदीक्षेरन्नुखंवा एतत्संवत्संयच्चित्रापूर्णमासोमुखंतएवसंवत्सरमारभ्यदीक्षंतेतत्स्यनकाचनानिर्याभवतिचतुरहेपरस्तात्पौर्णमासेदीक्षेरन् तेषामेकाष्टकायांक्रयः संपद्यतइति। कार्यं। अस्तेवमंगभूतेदीक्षोपक्रमेचांद्रतिथ्युपजीवनंतथापिप्रधानकर्मणिसाधन ग्रहेकोबाधः। ननवस्तिबाधः। तेषांपूर्वपक्षेसुत्यासंपद्यतइतिसुत्याख्येप्रधानकर्मणिचांद्रस्यशुक्लपक्षस्योपजीवनात्। उप जीव्यतांनामशुक्लपक्षः। तथापियथोक्तप्रकारेणकृत्स्नस्यप्रधानकर्मणः साधनमंतरेणानिर्वाहात्सएवात्राश्रयंते। अयमे वन्यायउत्सर्गेणामयनेकुंडपायिनामयनेतुरायणादेश्चयोजनीयः। तेषांगोसत्रविकृतित्वात्। यत्रतुचांद्रादिनियामकंना स्तितत्रेकिंकोविकल्पः। तथाहि। पिप्पलादशाखायामथर्वणिकभरद्वाजादीनांषडुसंवत्सरविद्याधिकारसिध्यर्थं तेनापिप्पलादेनातिदिष्टंसंवत्सरंवासमामनंति। अस्यएवतपसाब्रह्मचर्येणश्रद्धयावा। संवत्सरंवत्सप्रजयाकालंप्र श्नान्पृच्छेतेति। बह्वृचस्त्विएतमेवार्थंव्यतिरेकमुखेनामनंति। एताःसंहितानानंतेवासिनेप्रब्रूयान्नासंवत्सरंवा सिनमिति। तैत्तिरीयाश्चारुणकेतुकमग्निंचेध्यमाणंस्यादैत्रिभवणस्नानादिरूपंव्रतमामनंति। संवत्सरमेतद्व तंचरेदिति। एवंविधेषुप्रदेशेषुनियामकाभावाच्चांद्रादीनामब्दानामन्यतमइष्टयाग्रहीतव्यः। ननुसंवत्सरस्यचां श्रीगजानन

कटपयादिसूत्रमेव मतं

द्रसौरसावनभेदेनत्रैविध्यमेवांगीकृतंतत्स्वरूपविनियोगायुक्तो। तत्रैवंत्रैविध्यनियमेनयुक्तः। अन्योरपिनाक्षत्रर्क्षार्हस्पत्यो हिवि धयोसंवत्सरोविद्यमानत्वात्। तत्रैवंत्रैविध्यनियमेनयुक्तः। अन्योरपिनाक्षत्रबार्हस्पत्यो हिविधयोः संवत्सरयोर्विद्यमानत्वा त्तेनशाखायुर्वेदविदःपठंति। सौरंचहस्पतिसावनंचांद्रिकंनाक्षत्रिकाःक्रमेणस्युः। मणुलेपातालेतुलेविमलेवत्सरंगणि वासरः पंचेति। अस्यायमर्थः। गणकप्रसिध्यर्थंसौरसंज्ञयामानेतुलग्नंषंचषष्ट्यधिकशतत्रयमाचष्टे। तावद्दिवसपरि मितिः सौरसंवत्सरः। पातालग्नंएकषष्ट्यधिकशतत्रयमाचष्टे। तावद्दिवसमितोबार्हस्पत्यसंवत्सरः। अतुलग्न षष्ट्यधिकशतत्रयमाचष्टे। तावद्दिवसपरिमितःसावनःसंवत्सरः। विमलग्नंद्व्यनुःपंचाशदधिकशतत्रयमाचष्टे। तावद्दिवसप रिमितश्चांद्रःसंवत्सरः। वत्सरंगणंश्वनुर्विंशत्यधिकशतत्रयमाह। तावद्दिवसपरिमितोनाक्षत्रकःसंवत्सरइति। एवंतर्हिपंचसंव त्सरःपंचविधः। तत्रनाक्षत्रिकज्योतिःशास्त्रप्रसिध्याआयुर्दायादानुपयोगोद्रष्टव्यः। बार्हस्पत्यस्तुसिंहस्थहस्पत्यादिविशेषमुप जीव्यगोदावर्यादिस्नानादौविनियुक्तः। अनेनबार्हस्पत्यमानेनकदाचिदधिसंवत्सरेपिनिष्पद्यते। तदुक्तमुत्तरसौरे। गुरोर्म ध्यमसंक्रांतिहीनोयश्चांद्रवत्सरः। अधिसंवत्सरस्तस्मिन्कार्येष्वसवनत्रयं। वर्जनीयात्रयंतेनप्रतिष्ठासर्वनाकिनां। सूरसंक्रां तिहीनश्चेत्केचिदाहुरधिमासवदिति। मध्यमगणनायागुरोः संक्रांतिर्यस्मिंश्चांद्रवत्सरेनविद्यतेसोयमधिवत्सरः। तत्रहुतस्पति सवाहिकंनकार्यं। स्फुटगणनयासंक्रांतिरहितोयश्चांद्रोवत्सरस्तस्मिन्नधिमासवत्कार्यादिकंवदंत्यपितिकेचिन्महर्षयो मन्यंते। अथचांद्रस्यावांतरभेदानुच्यंते। संवत्सरःपरिवत्सरःइदावत्सरोनुवत्सरोद्वहत्सरश्चेतेपंचभेदाः। तदेतत्सामा

न्याकारेण संवत्सराणां पंचविधत्वं। सावित्रचयनगताग्निप्रशंसकमंत्रेषूच्यते। संवत्सरोसि परिवत्सरोसि इदावत्सरोसि इदुवत्सरोसि इदुवत्सरोसीति। इदुवत्सरेनुवत्सरइत्यर्थः। अतएवचानुमौख्यब्राह्मणेन तदधिष्ठानदेवताकृत्तेनैवंरूपेणोच्यते। अग्निर्वा संवत्सरः। आदित्यःपरिवत्सरः। चंद्रमाइदावत्सरः। वायुरनुवत्सरः। महेश्वरइदुवत्सरइति। अतएवर्त्तौ संवत्सरस्य प्रथमाहुती यःपरिवत्सरः। इदावत्सरस्तृतीयः चतुर्थश्चानुवत्सरः। इदुवत्सरःपंचमस्तत्संघोयुगसंज्ञकइति। तेषांपंचानांविनियोगोविष्णु धर्मोत्तरेपठ्यते। संवत्सरेतुदातव्यं तिलदानंमहाफलं। परिवर्त्तेतथादानंयदानाद्द्विजसत्तम। इदावत्सरेचवर्त्तव्यं स्त्रीधान्यानांचानुवत्सरे। इदुवत्सरेरजतस्यापिदानंचोक्तं महाफलमिति। तथानदधिष्ठातृदेवताभूतेजारूपेणाग्रतविशेषःसंपद्यते। संवत्सरः स्मृतोवह्निस्तथार्कःपरिवत्सरः। इदावत्सरस्तथासोमोह्यनुवत्सरः प्रजापतिः। इदुवत्सरश्चतथात्रोक्तोदेवदेवोमहेश्वरः। तेषांमंडलविन्यासः प्राग्वदेवविधीयते। प्राग्वत्स्थानपूजनंकार्यंहोमः कार्योयथाविधीति। प्रभवमारभ्यक्षयंतिषुषष्टिवर्षेषुद्वादश पंचकानि। तत्रैकैकस्मिन्वर्षपंचकेएकैककमेणसंवत्सरएत्योभवंति। तदेतत्सर्वंज्योतिःशास्त्रादवगंतव्यं॥ इतिसंवत्सर निर्णयः॥ ॥अथायनं॥ ॥अयतेयास्यनेनऋतवेणस्त्रोदक्षिणाशासुत्तरायणंचेतिऋतुत्रयमयनं। तथाचवाजसनेयिनः। पंचाग्निविद्यायांदक्षिणोत्तरमार्गयोःसमामनंति। यान्षण्मासान्दक्षिणादित्यएतियान्षण्मासानुदङ्नादित्यएतीति तथाछंदोगाअप्यधीयते। यान्षडुदक्षिणेतिमासांस्तान्याग्ष्डुदगेतिमासांस्तानिति। तस्मिन्नयनेऋतुत्रयंब्राह्मणेपठंति। तस्मादादित्यषण्मासान्दक्षिणेनेतिषडुत्तरेणेति। एवंचादित्यगतिमुपजीव्यायननिष्पत्तेःसौरमेवैतत्। अतएवविष्णुध

र्मोत्तरेसौरमानमधिकृत्योक्तं। ऋतुत्रयंचायनंस्यादिति। क्वचिदनुवादमानेनायनद्वयमभ्युपगच्छंति। मार्गशीर्षादिकैश्चित्रैर्ऋतु भिःकल्पितःकालःषण्मासात्मकोयनशब्दवाच्यः। ज्येष्ठमासादिकैर्दक्षिणायनमिति। तत्रायनंज्योतिःशास्त्रादवगंतव्यं। श्रौतस्मार्तकर्मानु ष्ठानेतुमकरकर्कटकसंक्रात्यादिकंएवायनद्वयकालइतियथोक्तश्रुतिस्मृतिभ्यामवगंतव्यमिति। उत्तरायणस्यागकर्मणिवक्ष्यमाणत्वात्प्रथमंदक्षिणा यनेश्राद्धंमाणपक्षस्यपुण्याहेदर्शेनुपसद्धतीत्यादि। चौलादीनामुत्तरायणकर्तव्यतांदृष्ट्वास्मृतिषुप्रसिद्धा। सत्सप्रतश्चदेव तात्रतिष्ठादीनामुत्तरायणदक्षिणायनयोर्विनियोगोविधिनिषेधाभ्यांह। देवतारामबाध्यादित्रतिष्ठोदङ्मुखइति। दक्षिणायनेमुखेकुर्वन्नतत्फल मवाप्नुयादिति। उग्रदेवतानांत्रतिष्ठादक्षिणायनेनकर्तव्या। तस्माच्चवैखानसंहितायामभिहितं। मार्गशीर्षेवाह्यनारसिंहत्रिविक्र माः। महिषाश्वरथंत्रीवृक्षाद्याश्चवैदक्षिणायनइति। एवंविष्णुधर्मोत्तराभिहितानिपरंतुमयूखनिबंधनकर्तव्यान्युदाहार्याणि। ॥ समनिर्णयः॥ ॥अथर्तवः॥ ॥ऋतुशब्दऋगतावित्यस्माद्धातोर्निष्पन्नः। ऋत्यतिगच्छतिअशोकपुष्पविकासादिअसाधारणलिं गमिति वसंतादिकालविशेषऋतुः। सचषड्विधः। अदोऽऋतवइतिश्रुतेः। मूलेहादशमासाःपंचर्तवइतितत्रहेमंतशिशिरयोरेकी करणंविवक्षितं। याज्ञिकेषुपंचसुयाज्यानुवाक्यामंत्रेषुहेमंतशिशिरयोरेकस्मिन्नेकेनैवपदेनैकीकरणोक्तेः। तथाहि। वसंतमृ तूंश्रीणामि। ग्रीष्ममृतूंश्रीणामि। वर्षाऋतूंश्रीणामि। शरदमृतूंश्रीणामिइतिचसुपर्णाख्यायाजानांचाग्नेयमग्नेमंत्र णमंत्राम्नायंतेपंचसुयाज्यासुमंत्रणमंत्रएवंश्रूयते। हेमंतशिशिरावृतूंश्रीणामीति। इमंदेवाअभिप्रेत्यचैवंकृत्वाश्रा मंत्र

रस्यषष्ठस्यातिमलात्। तेनानुमंत्रणीयस्यषष्ठत्रयाजस्याभावाच्च। तस्येवंचमेहेमंतेतंभीमोन्याय्यः। अतएवत्रयाजत्रात्मणेवसंतमेव
र्तूनामवरुंधेइत्यादिनाः चतुरःप्रयाजान्शास्त्यपंचमप्रयाजंकेवलनहेमंतेनत्रशंस्ता। स्वाहाकारंयजतिहेमंतमेवावरुंधेइति॥
अथनामयथानाप्यंचसंख्यायथोक्तस्वरूपेणतुषोढाभिद्यते। द्वादशमासात्मकेसंवत्सरएकैकस्यऋतोर्मासिद्वयात्मक
त्वेसतिएकादशद्वादशमास्ययोर्वक्तुंशक्यत्वात्। षष्ठर्तोरप्यगुणानविधानाच्चनत्रयोदशिष्टाद्वादशिष्यामः। मासद्वया
त्मकंवाग्निचयनेऋतव्येष्टकोपधानब्राह्मणेश्रूयते। द्वंद्वमुपदधाति। तस्माद्द्वंद्वमृतवइति। एकस्मिन्नृतौकयोर्मासयोर्द्वंद्वं
ग्रहीतव्यमितिचेत्। वसंताद्यनुक्रमेणचैत्रमासादिद्वंद्वमितिब्रूमः। नचैष्टकोपधानमंत्रेषुश्रूयते। मधुश्चमाधवश्चवासंति
कावृतू। शुक्रश्चशुचिश्चग्रैष्मावृतू। नभश्चनभस्यश्चवार्षिकावृतू। इषश्चोर्जश्चशारदावृतू। सहश्चसहस्यश्चहेमंतिकावृतू।
तपश्चतपस्यश्चशैशिरावृतू। एषुचवाक्येषुऋतूरितिहवचनंऋतवयवमासाभिप्रायं। अन्यथाषड्ढुतवइतिश्रूयमाणाषट्सं
ख्याबाध्येत। अवयविनऋतोर्वसंतादेरेकामकलंसौत्रामणीग्रहोत्रमंत्रेषुकथंचनव्यवहारोदृश्यतांतव्यं। वसंतेनर्तुना
देवाःग्रीष्मेणर्तुनादेवाऋतवादिहितत्रपठ्यंते। तथैवाधानब्राह्मणेश्रूयते। वसंतोवैब्राह्मणस्यर्तुर्ग्रीष्मोवैराजन्यस्यर्तुःशर
द्वैश्यस्यर्तुरितिक्रयमाणेषडृतवोघटीयंत्रघटवन्नेरंतर्येणावर्तंते। तथापिसंवत्सरोपक्रमरूपत्वेनवसंतस्याग्र्यंद्रष्ट
व्यं। एतदेवाभिप्रेत्यश्रूयते। मुखंवाएतद्ऋतूनांयद्वसंतइति। तथैवादाहृतेषुब्राह्मणेषुसर्वत्रवसंतोपक्रमपाठाच्चवसंत
स्याग्र्यत्वं। तेचवसंताद्यृतवोद्विधाः। चांद्रासौराश्च। चैत्रादयश्चांद्राः। तत्रोदाहृतंमधुश्चमाधवश्चेत्यादिना। नचतत्रैवैशाख ज्ञानन

वि

त्वादयोनोक्ताइति शंकनीयं। मध्वादिशब्दानांचैत्रादिपर्यायत्वात्। अतएवाहुः। चैत्रोमासोमधुःप्रोक्तोवैशाखोमाधवोभवेत्। ज्येष्ठमा
सस्तुशुक्रःस्यादाषाढःशुचिरुच्यते। नभोमासःश्रावणःस्यान्नभस्योभाद्रउच्यते। इषश्चाश्वयुजोमासःकार्तिकश्चोर्जसंज्ञकः। सहोमा
सोमार्गशिरःसहस्यःपुष्यनामकः। माघमासस्तपाश्चोक्तस्तपस्यःफाल्गुनःस्मृतइति। एतेषांचैत्राद्यात्मकानांवसंतादीनांचंद्रग
तिपरिकल्पितत्वाच्चांद्रत्वं। अतएवहोत्रमंत्रेष्वाम्नायंते। चंद्रमाःषड्ढोतासऋतूत्कल्पयति। तथासऋतुभिर्देवेभ्यस्सूर्यंचंद्रमसो
मरुत्सोमाम्नायेत। द्वापिपरंचरतोमायेतेतौशिशुक्रीळंतौपरियातोऽध्वरं। विश्वान्यन्योभुवनाभिचष्टेऋतूरन्योविदधज्जायते
पुनरिति। अत्रपुनर्जायतइतिलिंगाच्चविधातापंचदशइतिगम्यते। मन्वस्त्वंमध्वादीनांचांद्रधर्मसाम्यांवसंताद्यृतुत्वं। संस
र्पंत्यस्यत्रयोदशस्यचांद्रमासस्यकथमृतुनिर्वाहः। तन्मासस्सद्भावश्चर्तुग्रहब्राह्मणेमंत्रानुवादपुरःसरंसमाम्नायते॥
उपयामगृहीतोसिसंसर्पोहंस्पलायतेतिसोहास्तित्रयोदशोमासइत्याहुस्तमेवतत्प्रीणाति। तथाचवाय्यब्राह्मणेपि। अस्ति
त्रयोदशोमासइत्याहुःयत्रत्रयोदशंपरिधिर्भवतितेनैवत्रयोदशंमासमवरुंधतइति। तदुत्पत्तिप्रकारश्चास्माभिर्मलमासनि
र्णयेवक्ष्यते। विधातामेवंत्रयोदशोमासःतस्यकानुपपत्तिर्वसंताद्यृतुक्लृप्तिरितिचेदुच्यते। किमयंसप्तमऋतुःअहोस्विदुक्तेषु
षण्ण्वृतुभ्यःउतऋतुद्वयांतरालवर्तीकश्चिदन्यतुरूपः। नताद्यपक्षौक्षमौ। ऋतुर्ऋतुनानुधमानइतिऋतूनांनैरंतर्यश्रवणा
त्। नाद्यःक्षमः। षड्वाऋतवइतिषट्संख्यानियमात्। वसंतादिवत्संज्ञाब्राह्मणयोर्नमांतरश्रवणाच्च। नापिमध्यमः। मध्वादि
पाठात्। उच्यते। यथोमासयोर्मध्यमलमासोरभ्यंतरोऽस्तस्यांतर्भावः। तथाचासौषष्ठिदिवसात्मकोमलिन

शुक्लभागद्यात्मकरूतिमध्यादिशब्दवाच्येतेनोक्तेषु अंतर्भावान्नकाप्यनुपपत्तिः। सौरेषत्तुसंबोधायनेनमीनमेषयोर्मेषवृषयोर्वा संतइत्य
भिधानात्। मीनादित्वंमेषादित्वंचैवैकल्पिकंवसंतस्यागीकृतंतथानदत्तसोरणउनरश्मीत्यादयेपियथाश्रुतमर्थंविकल्पते। विनियोगश्चैषामस्तु
विशेषाणांश्रुतिस्मृतिपुराणेष्ववगम्यते। तत्रश्रुतिः। वसंतेब्राह्मणोग्नीनादधीत ग्रीष्मेराजन्यआदधीतशरदिवैश्यआदधीतेत्यादि।
स्मृतिरपिवसंतेब्राह्मणमुपनयीतग्रीष्मेराजन्यंशरदिवैश्यमितिं। विष्णुधर्मोत्तरेपि। पञ्चम्यांव्रतेवसंताद्यतुषुषट्सुपूजाविशे
षाःकथिताः। तथातत्रैववसंतेस्नानानुलेपनादिदानंग्रीष्मेपानकदानादिचोक्तं। देवीपुराणेवर्षासुतिलदानमुक्तं। तथाश
रद्धान्यदानं। हेमंतेग्निदानं। शिशिरेवस्त्रदानमित्येतानिविष्णुधर्मोत्तरेएवोक्तानिएवमन्यदप्युदाहार्यं॥ ॥इत्यृतुनिर्णयः॥ ॥अथ
मासनिर्णयः॥ ॥तत्रसकलसंतमासितिथादिपदिकंचंद्रवाचितस्यायंकालइतिमासः। तदीयत्वंचपंचदशानांकालानांवृत्ति
क्षयहेतुभूतेनवगंतव्यं। यदिदंमासत्वंसौरसावनयोरनुगतंतर्हियवमासुमासपरिमाणइत्यत्रमासशब्दः।
मास्यंतेपरिमीयंतेयावताकालेनचंद्रवृद्धिक्षयौसचांद्रोमासः। यद्वाचंद्रवृद्धिक्षयाभ्यांस्वयंमस्यतइतिमासः। तथाचसि
द्धांतशिरोमणौपठ्यते। मस्यंतेपरिमीयंतेस्वकलावृद्धिहानितः। मासएतेस्मृतामासास्त्रिंशत्तिथिसमन्विताइति। सूर्य
स्वरश्मिगतिर्यत्रपरिमीयतेससौरः। अहोरात्राणांसंख्यापरिमीयतेयत्रससावनः। तदुक्तं अस्मसिद्धांते। चांद्रंशुक्लादि
दर्शांतः सावनस्त्रिंशतादिमैः। एकरश्मेरविर्यावत्कालंमासंसभास्करइति। नक्षत्रभमितिमासंकेचिदिच्छंति। सर्वेषु ३१
मिवैतेषुनक्षत्रोमासउच्यतेइतिविष्णुधर्मोत्तरेभिधानात्। तत्रापिसप्तविंशतिसंख्यापरिमीयतेअनेनेतिमासशब्दो श्रीगजानन

योजनीयः। तत्रसौरमासस्यायंतोमेषादिरेवीनामायंताभ्यांअवस्थितोसावनेषुरूपेणादिनियामकः। नक्षत्रेनक्षत्रंनियामकं। चंद्रस्तु द
र्शांतत्वेनमासंतोविकल्पते। तथाचश्रूयते। अमावास्यायामासान्संपाद्याहरुत्सर्जंतिषडहैर्मासान्संपश्यंतीति। पौर्णमास्यामासान्सं
पाद्याहरुत्सर्जंतिपौर्णमास्यहिमासान्संपश्यंतीति। अस्यवाक्यस्यायमर्थः। अस्तिकिंचिदुत्सर्गिणामयनंनामसत्रं। तच्चगवामय
नविकृत्येतिः। अतोहादशमासाअनुष्ठेयं। प्रकृतावेकैकस्मिन्मासेत्रिंशत्स्तुत्युक्थसोमयागविशेषाणांत्रिंशत्तामनुष्ठेयत्वानकिंचि
दप्यहरुत्सर्जनंश्रूयते। तद्विकृतावपिमासेप्रतिमासमेकैकस्मिंस्तस्मिन्स्तोमयागपरित्यागोविधीयते। तत्रकतमदहरस्य
ज्यातामितिवीक्षायांनिर्दिश्यते। अमावास्यायामनुष्ठेयेनयागेनहर्षमासंपरिसमाप्योनरस्यादिरुत्तमहरस्यज्यातामितिविधायार्थ
वादेनसिध्यतिनाहिदृष्टेनमासस्यामावास्यांतत्वंसर्वेषांसममितितद्दृश्यते। एवंपौर्णमास्यांवाक्येविशेषोजूयेतिपौ
र्णमास्यंतेवेश्रुतेःकल्पेभूयान्योवैपूर्णमासिंचतीत्यादिनायेनयेनप्रत्यवरोहंतीतंतेनैवादप्रपंचेनसदृशंतान्यथा
तिरेकमुक्तेनप्रपंचितत्वात्। मनुनोदाहृतंयावत्क्यंमासाःसमास्यतिमानकंअतिप्रसंगात्। नचाहि। तस्यैवानुवाकस्यादौपठ्यंत
रमुपन्यस्तं। षडहैर्मासान्संपाद्याहरुत्सर्जंतिषडहैर्मासान्संपश्यंतीति तत्रापूर्वत्वेनषष्ठमहर्मासांतरूपेणप्रसज्येत। अथमन्य
सेषडहैरितिबहुवचननिर्देशात्पंचभिःषडहैरितिव्याख्यायांनकोपिविरोधइति। एवमप्यन्यत्रातिप्रसंगोदुर्वारः। तत्रापिवा
क्यांतरंश्रूयते। अर्धमासैर्मासान्संपद्याहरुत्सर्जंतिअर्धमासैर्मासान्संपश्यंतीति। अत्रैकैकार्धमासस्वीकारेपक्ष
स्यमासत्वप्रसंगः। बहूर्धमासस्वीकारेपत्वत्रयादेर्मासत्वप्रसंगः। किंचित्सर्वेषांकोप्यतिप्रसंगोदुःपरिहरएव। षडहैरित्य

त्रषडहपंचकस्वीकारेभवात्। एकैकस्यषडहस्यस्वीकर्तव्यत्वात्। उत्तरानुकेवोषडहेमासानुसंपाद्यमासत्तममहस्तस्मिन्
लुप्तजेयुरितिसप्तमत्वविशेषणात्। तस्मादतिप्रसंगहत्यप्रस्तावेननद्वेमासांतः। अत्रोच्यते। श्रुतिस्मृतिलोकप्रसिद्धिभ्यो
मासशब्दस्त्रिंशद्दिनसमूहेरूढः। श्रुतयः संवत्सरायनर्तुविषयाःपूर्वमुदाहृताः। तत्रसंवत्सरस्यद्वादशोभागोमासः। अ
यनस्यषष्ठोभागः। ऋतुपुनर्द्वयोर्भागयोरन्यतरः। स्मृतयस्तुमानेमासस्तुनाक्षत्रेसप्तविंशतिभिर्दिनैः। परिशेषेषुमासे
षुमासस्त्रिंशद्दिनैःस्मृतः। चांद्रशुक्लादिदर्शांतस्तुस्मादमलोकेप्यविद्वद्भिर्नागोपालंमासस्त्रिंशद्दिनात्मकंलभसिद्धं॥
एवंसत्यर्धमासैर्मासानित्यत्रमासशब्दोमासैकदेशंलक्षयति। षडहेत्यत्रषडहःपंचकविवक्षायांनकाविद्वत्तुपपत्तिः।
एकैकमषडहविवक्षायांपूर्ववदेकदेशलक्षणा। अतोतिप्रसंगाभावादुक्तवाक्याभ्यांमासस्यामथास्यांतत्पौर्णमास्यंतत्वंवि
कल्प्यते। तत्रप्रथमपक्षेशुक्लादिर्दर्शांतस्तुस्मृत्युदाहार्यैःशिष्टाचारबाहुल्यंचतत्रप्रसिद्धं। द्वितीयपक्षस्त्वापाद्यलक्षं.
श्रुतिलिंगंस्मृतिलिंगंच। आग्रयणिकाःसृष्टिकरणेसंवत्सरदक्षिणोत्तरायणसृष्टिमाम्नायमासपक्षसृष्टिमेवमामन
ति। मासोवैप्रजापतिःतस्यकृष्णपक्षएवरयिःशुक्लःप्राणइति। तत्रकृष्णपक्षस्यप्राथम्येपाठोलिंगं। सोमहालयप्रकर
णपठ्यते। अथसुकृकृष्णपक्षेनुश्राद्धंकार्यंदिनेदिनइति। तत्रयदिदर्शांतोमासोविवक्ष्येततदाभाद्रपदकृष्णपक्षादुत्त
रंतेनैवमुक्तं। आश्विनमासप्रवृत्तंतत्तल्लिंगमुच्यते। तच्चकृष्णपक्षादिपूर्णिमांतेसंभवति। आग्नेयंजयंतीप्रकरणे १२
स्मर्यते। मासिभाद्रपदेप्यकृष्णपक्षेर्धरात्रके। भवेत्प्रजापतेर्ऋक्षंजयंतीनामसामतेतिच। अत्रापिजयंत्याभाद्र श्रीगजाननः।

पदांतर्गतंलमासस्यपूर्णिमांतत्वंगमयति। शिष्टाचारविशेषादपिपूर्णिमांतत्वंद्रष्टव्यं। यज्ञीयधर्मप्रकरणेस्मर्यते। ऋतुसंधिषु
वापयेतिदे। तत्रयदिदर्शांतविवक्षास्यात्तदाहश्यस्थैवसंधिलातत्रवपनंकुर्युः। कुर्वंतितुपूर्णिमायां। तस्माद्दर्शांतपूर्णिमांतयोःसमो
विकल्पः। अनुष्ठानेतुतत्तद्वचनविशेषाच्छिष्टाचारात्सुव्यवस्थाद्रष्टव्या। अत्रनविशेषस्तुव्रतसिध्यंतेपठ्यते। अमावास्यापरिहि
तोमासःस्याद्यूनत्वेनस्वसंक्रांतिपौर्णमासीभ्यांतथैवव्यपदेश्योरिति। दर्शांतानांपूर्णिमांतानांनामासविशेषाणांचैत्रा
दिसंज्ञाप्रयुक्ता। यस्मिन्मासेपूर्णिमाचित्रानक्षत्रेणयुज्यतेससचैत्रः। एवंवैशाखादिष्वपिनेयं। चित्राविशाखादियोगस्योपल
क्षणात्। क्वचिच्चित्रादिप्रसंन्नत्वात्मुराधादियोगेपिचैत्रवैशा खादिसंज्ञानविरुध्यतेचैत्रादिश्रवणांतानांचित्रादिनक्ष
त्रहूंहूंप्रयोजकं। भाद्रपदाश्वयुजोस्तुश्रवणधनिष्ठेवत्यादिकं त्रिकं। कार्तिकादिमाघांतानांकृत्तिकादिहूंहूं। फाल्गुनस्तुपूर्वा
फाल्गुन्यादित्रयमितिविकल्पः। नक्षत्रावसंकर्षणकांडे। हेहूचित्रादितारणांपरिपूर्णेंदुसंगमे। मासाश्चैत्रादयोज्ञेयाः। त्रिकैः
षष्ठांतसप्तमादुतिश्रवणप्रांतोपान्त्रिभैस्तेयैर्फाल्गुनश्चत्रिभोमतः। एषांमासादिभाहूंमांकृत्तिकादिध्रुवस्थेति।
तत्रमासस्सामान्यकर्तव्यातिदेशिरीयाआमनंति। मासिमासिपितृभ्यःक्रियतेमासिमासिषष्ठान्युपयंतिमासिमास्य
तिग्राह्याग्रहंगृह्णंतीति। एष्टातिस्तोत्रविशेषाः। अतिग्राह्याग्रहविशेषाः। शुनासीरेपिकुंडपायिनामयनेमासमग्निहोत्रंजु
होतीतिमासविशेषानुपजीव्यकर्तव्यविशेषंकल्पसूत्रकाराःपठंति। अक्षय्यहवैचातुर्मास्ययाजिनःसुकृतंभव
तीति। फाल्गुन्यांपौर्णमास्यांचैत्रायांवावैश्वदेवेनयजेत। ततश्चतुर्ष्वमासेषुआषाढ्याश्रावण्यांवोदगयनेयवरुणप्र

वासैर्यजेत्तु सादिं स्मार्ताश्चपठन्ति पुराणोक्तगौरीव्रतादयश्चैत्रमासादिषु क्रमेण कर्तव्याः। तेचहेमाद्रौव्रतखंडेद्रष्टव्याः। तथाचविष्णुधर्मोत्तरे। त्रिलक्षदानाद्दीपिमाघमासादिषुकर्तव्यानितिनिबंधनरत्नेद्रष्टव्यानि। चांद्रसौरसावनमासानामध्येकस्यचिद्विधित्वशस्तत्रद्रष्टव्यं। तत्रकेज्योतिर्गणे। सौरोमासोविवाहादौयज्ञादौसावनःस्मृतः। श्राद्धिकेपितृकार्येचचांद्रोमासःप्रशस्यतेइति ॥ ॥इतिशुद्धमासनिर्णयः॥ ॥अथमलमासनिर्णयः॥ ॥तत्रसिद्धांतेब्रह्मस्वरूपंत्रुटयादिप्रलयसिद्धांतेभिहितं। चांद्रोमासोह्यसंक्रांतोमलमासःप्रकीर्तितइति। मलत्वंचकालाधिक्यात्। तथाचगृह्यपरिशिष्टे। मलंवदंतिकालस्यमासंकालविदोधिकमिति। कालाधिक्यंचविष्णुधर्मोत्तरेदर्शितं। सौरेणाब्दस्तुमानेनयदाभवतिभार्गव। सावनेनतुतदामानेदिनषट्कंनघट्यते। दिनरात्राश्चतेरामत्रीणिकाः संवत्सरेणषट्। सौरसंवत्सरस्यैतन्मानेनशशिनेनतु। एकादशातिरिक्तांतेदिनानिभृगुनंदन। समाद्वयेसाष्टमासेतस्मान्मासोतिरिच्यते। सचाधिमासकःप्रोक्तःकाम्यकर्मसुगर्हितइति। अयमर्थः। सौरसंवत्सरःषड्भिर्दिनैः सावनादतिरिच्यते। एकादशभिर्दिनैश्चांद्रादतिरिच्यते। तथाचचांद्रसंवत्सरद्वयात्सौरसंवत्सरद्वयंह्यविंशत्यादिनैरधिकंभवति। ततऊर्ध्वंसौरमासाश्चत्वारश्चांद्रामासाश्चकात्सार्धैः सप्तभिर्दिनैरतिरिच्यते। तथाचमिलित्वादिनाधिक्यूनोमासोभवति। सोयमधिकोमासइति। अवशिष्टदिनाधिक्यंचयथोक्तकलादूर्ध्वंषोडशभिर्दिनैः संपद्यते। अतएवसिद्धांतेभिहितं। द्व्यत्रिंशद्भिर्गतैर्मासैर्दिनैःषोडशभिस्तथा। घटिकाणांचतुष्केणपातितोधिमासकइति। कालाधिक्यमात्रेणमलत्वेतिध्वादिरपिमलत्वंप्रसज्येतेतिशंकनीयं। कलाधिक्येसतिनपुंसकत्वेनमलत्वांगीकाश्रीगजानन

एतत्। नपुंसकत्वंचज्योतिःशास्त्रेभिहितं। असंक्रांतोहियोमासःकदाचिन्निष्प्रतिक्षितः। कालांतरात्समायातिसनपुंसकउच्यतइति। पुरुषस्यसूर्यस्यतत्राभावान्नपुंसकत्वं। तदपितत्रैवोक्तं। अरुणःस्यैर्यभानुस्तपनश्चार्कोरविर्विभास्त्रिश्च। अर्यमाहिरण्यरेतादिवाकरोमित्रविष्णुश्च। एतेद्वादशसूर्याणामाद्यांघ्रिषुदयंतिमासेषुनिःसूर्याधिकमासोमलिम्लुचाख्यस्ततःपापःमासेषुद्वादशादित्यास्तपंतेहियथाक्रमं। नपुंसकोधिकोमासिमलंउलंतपतेरविरिति। मलिम्लुचत्वंचतस्यराक्षसैस्तत्करैरुक्तत्वात्। तथाहशातातपः। वत्सरंतर्गतःपापोयज्ञानांफलनाशकृत्। नैऋतैर्यीतुधानाद्यैःसमाक्रांतोविनाशकैः। मलिम्लुचैःसमाक्रांतंसूर्यसंक्रांतिवर्जितं। मलिम्लुचंविजानीयात्सर्वकर्मसुगर्हितमिति। अनुद्वात्रिंशद्द्विर्गतेमासेदिवसैर्नेनेमुंकालेयमोसाधयतनांतरेणरुध्यते। तस्माच्चकाष्ठकगणं। मासिमासेनसंक्रांतिःसंक्रांतिर्दमेवच। मलमासःसदित्येवमासेत्रिंशत्तमेभवेदिति। नायंदोषः। रूढेर्बलवत्त्वेनोक्तविषयत्वात्। ज्योतिःशास्त्रेत्रयोदशंमध्यमंमासमनमासंत्रिंशद्द्विरितिचसंज्ञया। यस्मिन्मासेरविर्नसंक्रामतिसोमलमासः। अनुमध्यममानप्रवृत्तोधिमासोज्योतिःशास्त्रव्यवहारेपयुज्यते। ननुश्रौतस्मार्तयोस्तस्यशुक्लप्रतिपदादिदर्शांतत्वंनीचमासंभवात्। नोद्वात्रिंशद्भिर्दिनैर्घटिकाचतुष्टयेनचोपेतेषुद्वात्रिंशन्मासेषुगतेषुसोधिमासोविधीयते। तत्रयदिदर्शांतामासाविवक्षितास्तदाकृष्णाद्वितीयामारभ्यशुक्लप्रतिपदादिदर्शांतोमासइत्येषनियमोनलभ्येते। श्रौतस्मार्तव्यवहारोपयोगिनिलधिकमासेत्वियंनियमः। तत्रान्यत्रपु

दर्शिता

हारीतः। इंद्राग्नीयत्रहूमेतेमासादिः परिकीर्तितः। मध्येसमासोपितसोमकोतमतिक्रम्यतुमदारविर्गच्छेत्कदाचन। आदोमलिम्लुचोत्तेयोहितीयःप्राकृतःस्मृतः। अस्यार्थः। दर्शपूर्णमासयाजिनाशुक्लप्रतिपदिदर्शेष्टिदेवाग्नीहूयेते। कृष्णप्रतिपदितुपूर्णमासेष्टिदेवाग्नयेवैष्णवेअमावास्यायांपिंडपितृयज्ञादोपितसोमकोतन्नैवंसतिशुक्लप्रतिपदादिदर्शनंनोभाग्यः। सकृन्निरहिनोधिमासोथोह्यभ्येतीति। तस्मान्मध्यमानगणनाश्रीतस्मार्तयोर्नेषयुज्यते। तथापिकालाधिक्यमलमासस्यस्मिन्नशेतदुहारणमित्यदोषः। शुद्धमासेत्रिंशत्तमेभवेद्दिसेदादृतंतत्रश्रौतस्मार्तयोरुपयुज्यते। सकृत्मानसिध्यतीतादृशंचाधिकमासमुदाहरेत्। अष्टपंचाशतशुक्लशतद्वयाधिकेषुवत्सरेषुगतेसतिसमनंतरभावीयोथमीश्वरस्तस्मिन्नश्रावणमासोधिकः। ततःपूर्वभावीयोभावसंवत्सरस्तस्मिन्फाल्गुनमासोधिकः। तयोःसंवत्सरयोर्मध्यवर्तिनीयोयुवधात्संवत्सरेनदाद्यास्तुत्रिंशतिमासाईश्वरसंवत्सरेषुवत्सरश्चैत्राद्याःतथासतियोकृष्णाल्गुनमारभ्यगणनायांवृथाकृश्रावणमासस्त्रिंशत्तमोभवति। अनेनन्यायेनषष्टिमासात्मकेषुपंचसुवत्सरेषुद्वानधिकमासोसंपद्यते। तदुक्तंमहाभारते। पंचमेपंचमेवर्षेहूमासावाधिमासकौ। तेषांकालाविरेकेणग्रहणान्नातिवर्तनं। अस्यधिकमासस्यकृत्रित्रिंशत्तमंत्यभिचरतिन्यूनाधिकसंख्यायाअपिदर्शनात्। तथाहि। यथोक्तेश्वरसंवत्सरोनरभाविनिचित्रभानुसंवत्सरेवैशाखमासोधिकः। नंदनसंवत्सरात्व्यवहितेविजयसंवत्सरेभाद्रपदमासोधिकइति। तत्राप्येकोनत्रिंशत्वं। तथादुर्मुखसंवत्सरेश्रावणमासोधिकः। हेमलंबिविलंबिविकारिसंवत्सरत्रयव्यवहितेविकारिसंवत्सरेज्येष्ठोधिकः। तथाचतत्रपंचत्रिंशत्वंसंपद्यते। तस्मान्मासेत्रिंशत्तमेभवेदिसेतदद्युकंभवति श्रीगजानन ७४

३ ततउत्तरभाविनिनारणसंवत्सरेव्यवहितेपार्थिवसंवत्सरेभाद्रपदमासोधिकः। तथाचतस्यैकोनत्रिंशत्वंसंपद्यते। तथाशरवरसंवत्सरेवैशाखोधिकोमासः

नायंदोषः। त्रिंशत्तमस्योपलक्षणत्वेनंगीकारात्। उदाहरणमात्रदर्शनार्थमेतदुक्तमित्यविरोधः। पुरुषमासविचार्यते। किमयमलमासःस्वतंत्रोहुत पूर्वस्यशुद्धमासस्यशेषः। आद्येसिद्धवत्स्यशुद्धमासस्यशेषइति। नचकाकदंतपरीक्षेयमनुष्ठानानुपयोगादितिशंकनीयं। प्रत्यक्षेकाम्येषु ज्ञानेतद्विचारस्योपयुक्तत्वात्। तथाहि। शुक्लाषाढशुक्लश्रावणयोर्मध्येयदमलमासस्तदातस्यस्वातंत्र्येतस्मिन्नयाधिकमेवंप्राप्नोति। पूर्वस्योत्तरस्यवाशेषत्वेनिमासेयत्नाधिकादितस्यमलमासेवनुष्ठानंप्राप्नोति। पित्र्यकार्याणिचोभयोरितिवचनात्। तस्मात्तार्थिकोविचारः। तत्रस्वातंत्र्यंतावदृष्यनिर्णयेनिरस्तं। पारतंत्र्येपिपूर्वशेषत्वंयुक्तमितिकेचिदाहुः। तत्रोपपत्तिकेचिदित्थं। तेषांपक्षेमेषादिसंक्रांतयश्चैत्रादिसंज्ञानांप्रयोजिकाः। यथाचज्योतिःशास्त्रेभिहितं। मेषादिस्थेसवितरिचैत्रोमासः प्रवर्तते चांद्रः। तत्राद्यःसवितृशेषः। पूर्तिर्हितेभिमासोत्थइति। यदासवितर्मेषकन्याख्येस्थेसतिदर्शेहूमंपूर्यतेतदानीमंत्यउत्तरपूर्णिमासकोमासोभिमासः। ततस्तत्पूर्णिमासकउत्तरार्थः। यदाशुक्लाषाढस्थबहुलचतुर्दश्यांदर्शेवाकर्कटसंक्रांतिर्भवति। शुक्लश्रावणमासस्यशुक्लपक्षेप्रतिपदिद्वितीयायांवाकर्कटसंक्रांतिस्तदाकर्कटसंक्रांतिशुक्लस्यशुद्धमासस्याषाढस्यशुक्लं। तदीयदर्शस्यकर्कटस्थरवावसितत्वात्। सिंहसंक्रांतिशुक्लस्यापिश्रावणत्वमुचितं। तदीयदर्शस्यसिंहस्थरवावसितत्वात्। तेनैवन्यायेनतथामेषतुलासंक्रांतिरहितमासस्यदर्शःकर्कटस्थएवस्यात्पूर्णतिपूर्वाषाढवेदितस्याषाढत्वमुचितं। अत्रोच्यते। मेषादीनांशुद्धमाससंज्ञाप्रत्येवत्रैवाजकर्तमलमासस्योत्तरमासशेषत्वस्मरणात्। तथाचज्योतिःपितामहः। षष्ठ्यादिदिवसेमासःकथितोबादरायणैः। पूर्वार्धंशुद्धदित्यस्यकर्तव्याउत्तरेक्रियाइतिअन्यत्रापिषष्टिदिनात्मकंमासं

प्रकृत्योक्तं। आद्यमलिम्लुचोज्ञेयो द्वितीयःप्राकृतःस्मृतइति। एवंषष्टिदिनोमासस्तदर्धंतुमलिम्लुचइतिच। ज्योतिःशास्त्रांतरेपि।
षण्मासाद्दिवसेमासःकथितोबादरायणैः पूर्वमर्धंपरित्यज्यउत्तरार्धंप्रशस्यतइति। अस्यवंसंक्रांतिरहितस्यमलमासस्यो-
त्तरशेषसंज्ञासंक्रांतियुक्तस्यतुकथमितिचेन्। उच्यते। प्रथमंतावत्तत्स्वरूपंनिरूप्यते। ज्योतिःशास्त्रेसिद्धांतेभिहितं। असंक्रां-
तिमासोधिमासःस्फुटःस्यात्द्विसंक्रांतिमासःक्षयाख्यःकदाचित्। क्षयःकार्तिकादित्रयेनान्यतःस्यात्तदावर्षमध्येधिमासद्वयंचेति।
अयमर्थः। स्फुटमानेनयोयमसंक्रांतःससंस्फुटोधिमासःतेनैवमानेनयोयंद्विसंक्रांतियुक्तःक्षयमासःसचकार्तिकमार्गशीर्ष-
पौषेष्वेवत्रिष्वन्यतमोभवति। नान्येषुमाघादिषुनवसु। एवंविधक्षयमासयुक्तेवर्षेक्षयमासात्पूर्वेषुत्रिषुसेसेषुमध्येकस्मि-
न्नधिकमासोभवति। क्षयमासादूर्ध्वमपिमासत्रयमध्येपरोधिमासः। तदेवंविधमेकवर्षस्यमलमासत्रयंविरेणकालेन
यदाकदाचिदायातिनलेकाधिमासद्वयंपुनःपुनःसहस्रसंख्यासुमायाति। तत्रैतद्योगममकालश्चसिद्धा-
तशिरोमणेरीरितः। गतोब्धिरंध्रेंदुमितेशककालेतिथौशेभविष्यत्यथभाद्रसेर्मेः। गजाग्निभूमिस्थयात्रायशोयंकु
वेदेंदुवर्षैकचिदूनकुंभेभिः। अस्यायमर्थः। संचनुःसप्तत्यधिकनवशतसंख्याकेवर्षैः परिमितेशककालेकश्चिदूनमास
त्रयोपेतोयत्संवत्सरोगतः। यथोक्तसंख्याबाध्यद्विरंध्रेंदुरित्यनेनपदेनविवक्षिता। अब्धयश्चत्वारः। अद्रयःसप्त। नंदानवाएत
त्संख्यात्रयगमकांकागणकप्रसिद्धासातिलोम्येनलिखितायथोक्तसंख्यायांपर्यवस्यंति। तिथीशेरत्रापितिथयःप
रदशरुद्राएकादशतत्रगणकेरंकेपुत्रक्षितेषुपंचसंख्याधिकशतयुक्तसहस्रसंख्यासंपद्यते। तावद्भिःशकवर्षैर्मितेकाश्रीगजानना।

MEMORIAL DR BHAU DAJI

शक

एकश्चिदूनमासत्रयोपेतःसंवत्सरः। अंगाक्षस्वर्यैरितत्रांगानिषट्"अक्षाणिद्वेद्रियाणिपंचस्वर्याहदश। तत्रांकप्रक्षेपेसतिषट्पंचाशद-
धिकशतद्वयोपेतसहस्रसंख्योपपद्यते। तावद्भिर्वत्सरैर्मितेशककालेयथोक्तमात्रेसेयोपेतःकश्चित्संवत्सरः। अस्यचोदाहरणं। इ-
वेदाहृतईश्वरवत्सरात्प्राचीनोभाद्रपदशुक्लमाषाख्यायाःकन्यासंक्रांतिस्तातऊर्ध्वमस्संक्रांतमेकमासमतीत्य
उत्तरोमासयोःक्रमेणतुलाद्यश्चिकसंक्रांती। ततऊर्ध्वमेकस्मिन्नेवमासेशुक्लप्रतिपदीनुःसंक्रांतिद्वैभिकरःसंक्रांतिः। ततऊर्ध्वं
कुंभसंक्रांतिः। अनंतरमासेद्वितीयतऊर्ध्वमेकंभसंक्रांतमासमतीत्यातरस्यांशुक्लप्रतिपदिमीनसंक्रांतिः। एवंसत्येकस्मिन्नेव
वत्सरेद्वावसंक्रांतीमासावेकोद्विसंक्रांतिमासस्तृतीयथोक्तमासत्रयंसंपद्यते। गजाग्निभूमिस्थितिरित्यत्रापिगजाःअष्टद्वयः स
प्तान्यत्रयः भूरेकातंत्रांकप्रक्षेपेसतिषष्टसप्ताधिकशतत्रयोपेतसहस्रसंख्यासंपद्यते। तावद्भिर्वत्सरैर्मितेशककालेकश्चिदू
नकविधःसंपद्यतेवत्सरः। कुवेदेंदुवर्षैरित्यत्रकुरेकोवेदाश्चत्वारःदुरेकस्तत्रांकप्रक्षेपेणैकचत्वारिंशत्यधिकशतसंख्याभव
ति। एतावद्भिर्वर्षैःकश्चित्तैत्तिरस्यमासत्रयोर्यवधानंभवति। गोकुभिश्चेत्यत्रभूपुंसकवचनेषुस्वराक्षरेषुगण्यमानेषो. *कश्मिन्नेषु
कारेणषमःसंपद्यतेकुरेकांतत्रांकप्रक्षेपेसतिएकोनविंशतिर्भवति। तावद्भिर्वत्सरैःकश्चित्तैत्तिरस्यःक्षयमासयोर्व्यवधान
भवति। अत्रद्विसंक्रांतियुक्तस्यक्षयसंज्ञामलुपपन्निरुच्यते। यदाघनुःस्थरवोदूरेनिसमास्तः। किंतुमकरस्थेअतःपोषमा
सत्वंसैतस्यसंपन्नं। तथाचमार्गशीर्षेस्थतत्रलुप्तत्वात्तस्यक्षयसंज्ञाशुक्ता। अतएवैकमासग्रासितादृहस्पःपापस्यतिरि
त्युत्पत्यासएवबृहस्पतिसंज्ञयापिनवद्दिश्यते। सर्वव्यवहारोर्वाग्दृस्तेज्योतिर्ग्रंथेदृश्यते। अस्मिन्मासेनसंक्रांतिःसंक्रांति

रर्णपूर्तिस्तदंतस्थमेषादिस्थचक्रेनमार्गशीर्षसंज्ञांतं। तत्रास्तिद्वेदाहृतेद्विसंक्रांतेमासेधनुःस्थरवौ ३

दृश्यमेवच। संसर्पोह्यस्तीमासावधिमासश्चनिंदितइति। तत्रक्षयमासात्पौर्वापर्येणोक्तोऽसंक्रांतोमासः ससंसर्पः। असंक्रांतस्तेनैतदधिकमासवत्कर्मनिर्हतायांप्राप्तायांतदपवादःकर्महाः सन्नसम्यक्सर्पतीतिसंसर्पः। तत्रकर्मानर्हत्वमाहुरेवंस्मर्यते। सिनीवालिंप्रतिक्रम्ययदासंक्रमतेरविः। रविणालंघितेमासेतुल्यमर्हःसर्वकर्मसुरिति। तत्पवादश्चैवंस्मर्यते। मासद्वयेवध्यमध्येतुसंक्रांतिर्नित्यदाभवेत्। प्राकृतःसत्रयुक्तःस्यादधिमासस्तथोत्तरइति। संक्रांतिरहितयोर्द्वयोर्मासयोर्मध्यःएकोसंक्रांतःसत्राकृतःशुभकर्मार्हतुल्यार्थः। अस्मिन्नेवार्थेज्ञाबालिः। एकस्मिन्नेववर्षेतुद्वौमासावधिमासकौ। प्राकृतस्तत्रपूर्वःस्यादुत्तरस्तमलिम्लुचइति। अतःसंसर्पत्वंतस्योपपन्नं। असंक्रांतमासद्वयमध्यवर्तिनःक्षयमासस्याहस्पतिलिंगनिरुक्तिःपूर्वमेवदर्शिता। तदुक्तमासविनोऽसंक्रांतस्यकालाधिक्यादधिमासत्वं। तएतेत्रयोपिज्योतिःशास्त्रप्रसिद्धेविवाहादौनिंदिताः। यद्योक्तप्रकारेणमासद्वयात्मकसंवत्सरेक्षयमासस्याद्यंतीयसंक्रांतिरनुक्तामासंभवेत्तर्हितुक्षयमासवत्त्वातंत्रान्नरेणैवरमासस्योपलक्षणंकावकाशः। मन्वेकाधिकमासेतिसंवत्सरत्रयोदशमासात्मकंसंयथातथाधिमासद्वयोपेतसंवत्सरस्यचतुर्दशात्मकसंप्राप्तं। नचतत्पुनस्त्रयोदशेतिश्रुतिरेवमासंचतुर्दशःकल्पिनेवदृष्टइतिवचनात्। नेषदोषः। असंक्रांतत्वेनाधिकत्वप्रसक्तिमुक्त्वायोद्वयोर्मध्येऽवस्याधिमासत्वनिषेधात्। उक्तंहिज्योतिःसिद्धांते। धटकन्यागतेसूर्येशुक्लेपाथधनिनि। मकरेवाथकुंभेवानाधिमासोविधीयतइति। अयमर्थः। वृश्चिकादिषुचतुर्षुमासेषुयदामलमासःप्राप्नोतितद्धासूर्येतुलाकन्ययोर्वर्तमानेसत्यसंक्रांतोविनाधिमासइतिधटकन्यागतइत्युपलक्षणं। यूर्वेषपिप्रसक्तोसंक्रांतोनाधिमासः। तदुक्तंब्रह्मसिद्धांते। चैत्रादर्वाङ्नाधिमासःपरतस्त्वधिकोभवेदिति। चैत्रादारभ्यापरितनेषुमासेषुयदायोकोविमासोवसंक्रांतोतदंतयो श्रीगजानन

रर्वाचीनःपूर्वोनाधिमासः उत्तरस्तुभवत्यधिमासः। नन्वेवमभूत्रयोदशमासतत्प्राप्तिःतथाप्येकादशमासतंमसजेतेत्यस्येवदोषः। तथाहि। दूरादशमासाःसंवत्सरस्तेषांनिसर्गसंक्रांत्यात्मासानुद्दिश्यप्रवृत्ता। अस्तित्रयोदशोमासइत्यत्रतुरसंक्रांतस्यकादाचित्कस्यपृथक्श्रवणात्। तंश्रावस्तीतिप्रकृतेक्षयमासेपतेत्रयोदशमासात्मकेसंवत्सरेद्वयोरसंक्रांत्योःपरित्यागेसतिअवशिष्टाःसंसंक्रांताएकादशैव। ततोनित्यवच्छ्रुतिविरोधः। नचदोषः। संक्रांतिद्वयमुक्तस्यक्षयस्यमासद्वयमलेनपरिगणनात्। नचाप्यसमर्थनं। तिथ्यर्धप्रथमेपूर्वेद्वितीयेपरतोत्तरे। मासावितिषुधैश्चिंत्योक्षयमासस्यमध्यगाविति। ज्योतिःशास्त्रेद्विसंक्रांतियुक्तक्षयमासादाद्यसंक्रांतेःपूर्वत्रबालनसंस्काराभावीयुक्तं। तथाचयदाबालनमस्तितदापूर्वस्यासंक्रांतस्यससंक्रांतत्वसंपादनाद्यंक्षयमासएकतयैवपरिगणनीयः। यदातुबालनंनास्तितदायथोक्तप्रकारेणमासद्वयात्मकसंवत्सरेक्षयमासस्याद्यंतीयसंक्रांतिरनुक्तामासंभवेत्तिसृषुमासेषुमध्यमासस्यक्षयत्वातंत्रान्नरेणैवरमासस्योपलक्षणंकावकाशः। मन्वेकाधिकमासेतिसंवत्सरत्रयोदशमासात्मकंसंयथातथाधिमासद्वयोपेतसंवत्सरस्यचतुर्दशात्मकसंप्राप्तं। नचतत्पुनस्त्रयोदशेतिश्रुतिरेवमासंचतुर्दशःकल्पिनेवदृष्टइतिवचनात्। नेषदोषः। असंक्रांतत्वेनाधिकत्वप्रसक्तिमुक्त्वायोद्वयोर्मध्येऽवस्याधिमासत्वनिषेधात्। उक्तंहिज्योतिःसिद्धांते। धटकन्यागतेसूर्येशुक्लेपाथधनिनि। मकरेवाथकुंभेवानाधिमासोविधीयतइति। अयमर्थः। वृश्चिकादिषुचतुर्षुमासेषुयदामलमासःप्राप्नोतितद्धासूर्येतुलाकन्ययोर्वर्तमानेसत्यसंक्रांतोविनाधिमासइतिधटकन्यागतइत्युपलक्षणं। यूर्वेषपिप्रसक्तोसंक्रांतोनाधिमासः। तदुक्तंब्रह्मसिद्धांते। चैत्रादर्वाङ्नाधिमासःपरतस्त्वधिकोभवेदिति। चैत्रादारभ्यापरितनेषुमासेषुयदायोकोविमासोवसंक्रांतोतदंतयो

र्मध्येतुमलसंमतः। तत्रतावत्सर्वयज्ञानामारंभश्चसमाप्तयइतिआरंभसमाप्तोरेवाधिमासेप्रतिषेधात्। आरंभसमा

सोमर्ध्यपातिन्यधिमासेकाम्यमनुष्ठेयं। अधिमासेनिपतितेह्येषएवविधिक्रमइतिस्मरणात्। काठकगृह्येसमाप्तिप्रतिप्रसववच
नप्रवृत्तेमलमासात्राकूकाम्यकर्मासमाप्तितं। आगतेमलमासेपितत्समाप्तिर्नसंशयइति। तत्सावनमानत्रस्नाकृच्छ्रचांद्रायणा
हीनसत्राद्विषयं। श्रौवकाम्येतुपलकाम्यंकर्मतन्मलमासेप्यनुष्ठेयं। तत्रप्रा।प्रक्रांतेमलमासेतत्रदर्शेषुदिनद्वयेषुदर्शदिकश्चिद्लो
ब्रह्मराक्षसादिनाग्रहेयंतदाराक्षोघ्नीःसद्यएवकर्तव्या। मलमासससमाप्तिप्रतीक्षायांबालादिमरणप्रसंगात्। सूत्रंचेष्टिःकाम्यका
उच्यते। अग्नयेरक्षोघ्नेपुरोडाशमष्टाकपालंनिर्वपेत्। यद्रक्षांसिसंचरन्त्यग्निमेवरक्षोहणंस्वेनभागधेयेनोपधावतिसए
वास्माद्रक्षांस्यपहंतीति। संचेरन्नमावास्यांपूर्णमासीवुरिति। यावत्। उपधावतिदेवतांप्रियेणहविर्भागेनातोषयति। अस्माद्रक्षोघ्न
हीनादिष्टिकर्तारक्षांस्याचिनयतीतितेथैवाभिचरतः। श्रूयतेचाभिचरतः। श्रूयते। आग्नावैष्णवमेकादशकपालंनिर्वपेत्। अभि
चरन्निति प्रतिवेशपुरस्तादभिचरंतमभिचरंतिहेतुरनुषाक्येयुरितिविशेषः। कालविलंबसहीक्षाशक्तिमभवति। बाधकेशीघ्रोपला
सन्नेसतितदेवाभिचारस्यकर्तव्यत्वात्। अतिचारस्यापिसएवकालः। एतथैवयजेतेत्यभिचर्यमाणइतिवर्तमानवाचिनात्। नच
प्रलंबितेनप्रत्यवायेनप्रतिचारकर्तुरभिचारसमकालत्वविशेषणात्। एवंसबलज्वररोगराजद्रोहादिनायुष्यमल्पंप्रसक्तं
तदापिसएवेष्टिः कर्तव्या। इष्टिश्रूयतेयोम्त्योर्बिभीयात्तस्माएतांप्राजापत्यांश्यामाकांश्यामांश्यामलांनिर्वपेत्। प्रजापतिमेव
स्वेनभागधेयेनोपधावतिसएवास्मिन्नायुर्दधातिसर्वमायुरेतीति। कृष्णलाःसुवर्णशतकलानियमत्रयपरिमितानि। ता
न्यशतसंख्याकानियस्यानिर्वपणीयानिसेष्टिःशतकृष्णला। उदाहरणमस्यार्थस्यनिमुष्यतिमलमासश्चागतस्तदाका
म्येष्टिकोभयजेततिविहितेष्टिर्नकालविलंबंसहते। एवंसामान्यतोवर्षावर्जमविवेकःसंपन्नस्तानिषेधकार्याकार्याणिकालादर्शकारःसंगृह्यसमुदाह

दाजहार। द्वादशाहसंपिंडांतकर्मग्रहणजन्मनोः। सीमंतपुंसवेआधानंद्वावेतोजातकर्मच। रोगेशांतिरलभ्येचयोगेआयुष्यतानिच।
प्रायश्चित्तंनिमित्तस्यवक्ष्यात्सूतेपरत्रच। अब्दादकुंभमन्वादिमहालययुगादिषु। आषंदर्शेषडहरहः आषमूनादिमासिकं। मलि
म्लुचान्यमासेषुमतान्तरं। आषमाब्दिकं। आषंतुपूर्वदृष्टेषुतीर्थक्षेत्रेषुयुगादिषु। मन्वादिषुचयद्दानंदानंनंदिनंचयत्। ति
लगोभूहिरण्यानामध्योपासनयोः क्रिया। पर्वहोमआग्रयणंसाग्नेरिष्टिश्चकर्मणोः। नित्याग्निहोत्रंहोमश्चदेवतातिथि
पूजनं। स्नानंचस्नानविधिनाअभक्ष्यापेयवर्जनं। तर्पणंचनिमित्तस्यनित्यत्वादुभयत्रच। अनित्यमनिमित्तंचदानंचमह
दादिकं। अन्याद्यैनाध्वरापूर्वतीर्थयात्रामरेक्षणं। देवरामतडागादिप्रतिष्ठामोजिबंधनं। आश्रमस्वीकृतिःकाम्यइष्टो
त्सर्गश्चनिष्क्रमः। राजाभिषेकःव्रतमःचूडाकर्मव्रतानिच। अन्नप्राशनमारंभोगृहाणांचप्रवेशनं। स्नानं विवाहोनामानि
तथोपनयनंमहोत्सवं। व्रतारंभंसमाप्तिश्चकाम्यकर्मचपाप्मनः। प्रायश्चित्तंतुसर्वस्यमलमासविवर्जयेत्। उपाकर्मोत्सर्जनंचपवि
त्रदमनार्पणंअग्रयेरुग्रहेमंतः सर्पाणांवलिकाः। ईशानस्यवलिर्विष्णोःशयनंपरिवर्तनंदुर्गेद्रिस्नापनोत्थानंचजिनः।
दर्शेव्रतप्रतिषिद्धानिपरत्राप्यब्दैविकमिति। अत्रहादशाहेत्यारभ्यनित्यसाधुभयत्रचेत्येतेनग्रंथेनकर्तव्यसंग्रहः। अनित्यमनिमि
त्तंचेत्यारभ्यकर्जनेदित्यंतेनवर्ज्यसंग्रहः। उपाकर्मेत्यारभ्यपरत्राप्यब्दैविकमित्येतेनमूलवर्जितानांसतांशुद्धमासेश्रवण
कर्तव्यतेनसंग्रहः। अत्रयस्यवंत्रसाक्षिवचनान्युदाहरामः। यमः। गर्भाधानिकेभक्तेश्राद्धकर्मणिमासिके। सपिंडीकर
णेनित्येनाधिमासंविवर्जयेत्। तीर्थस्नानंजपाहोमाथवश्रीहितिलादिभिः। जातकर्मौर्ध्वदैहिकमासिकेषुनवश्राद्धेतथैवच। भ
द्यात्रयोदशीश्राद्धंश्राद्धान्यपिचषोडश। चंद्रसूर्यग्रहेस्नानंश्राद्धदानजपादिकं। कामनिमलमासेपिनित्यंनैमित्तिकं श्रीगजानन

तथेति। मासिकेश्राद्धकर्मणिश्रमावास्याश्राद्धकर्मणीत्यर्थः। नित्येनित्यदाने। होमोनित्योपासनहोमः। अंत्यकर्मणिरहनोदकपिंडदाना
स्थिसंचयनादीनि। स्मृत्यंतरे। श्राद्धजातकर्मनामनिष्क्रमणान्नसंस्कारसव्रताः। मलिम्लुचेपिकर्तव्याद्वादशीःकाम्याश्चवर्जयेदिति। सं
स्कारान्नप्राशननिष्क्रमणादयः। सव्रताःस्युर्मासिव्रतादयः। एकोद्दिष्टंतुयच्छ्राद्धं। नैमित्तिकमुच्यतेबुधैः। तत्कार्यंदर्शमासेस
त्येकादशाधिकेचधर्मेतदितिगौतमः। जातकर्मणिमलमासेश्राद्धंनवश्राद्धंतथैवचग्रहणेपुंसवादौचतत्पूर्वत्रपरत्रचेति। निमित्तवश्रा
द्धंतिथिवाक्यशेषः। स्मृतिसंग्रहेपि। जातकर्मचपुंसूतिःसीमंतोन्नयनंव्रतं। मलिम्लुचेपिकर्तव्यंनिमित्तंयद्विजागतइति। अरी
चिः। रोगेचात्यभयेयोगेचसीमंतेपुंसवेपिच। मदादातिसमुद्दिष्टंपूर्वेष्वापिनदुष्यतीति। निमित्तवश्रात्रायश्चित्तानिजलि
द्रकुंडेबहूनिश्रूयंते। आहिताग्निर्यदाग्नीनन्वाधायेष्टिंकृत्वाग्रामांतरंत्रयाणंकुर्यात्। तदातुभंतामूर्तिमंत्रेणजुहुयात्। त
दाचश्रुतिः। सर्वान्वाएषोमोकाम्याग्रवेग्रयतिः योग्नीनन्वाधायव्रतंउपैतिसयदानिष्टात्रयामात्। अकामश्रीताएनंकामा
नानुप्रयांतुः। श्रेतेजाअवीर्यःस्यात्सजुहुयात्। भंतामंगिरस्वन्मविष्वासुक्षितयःपथकृ। अग्नेकामायमेमिरुतिः। कामा
नेवास्मिद्धानिकामश्रीताएनंकामाअनुप्रयंतितेजस्वीवीर्यावान्भवतिः। अस्योभयंहविरार्तिमार्छेदृ। एंदुंपंचशरावमो
दनंनिर्वपेदितिः। कोयमिः। अस्यमधुघृतंदध्यादभंवाविसुसंवितं। संवत्सरेविदधेपित्रतिमासंचमासिकमिति। मरीचिः। प्र
तिमासंमृतेहयुत्पन्नाब्दंचप्रतिवत्सरं। गोभूतिलहिरण्यानामासेपिस्यान्मलिम्लुचइति। एवमभ्यधायेमवर्जनसंध्यावद्
मलमासादोषदुष्टेगोवमासयोरुभयोरपीति। मत्स्यपुराणे। वर्षेवाहरहः श्राद्धंदानंचप्रतिवासरं। नादिष्वपिविशेषतः साप्ति

वचनान्युदाहरणीयानि। सामान्यतस्तुनित्यैर्मित्तिकैःकुर्यात्प्रयतःसमलिम्लुचदुस्तिग्रहस्पतिवचनंहूर्ममेवोदाहृतं।नन्वृद्धौ
षुसंग्रहवचनेषुभाद्रपदापरपक्षश्राद्धस्याप्युभयत्रकर्तव्यताप्रतीयेत।महालययुगादिधितितत्रपठितत्वात्।सांवत्सरिकमुभयत्रकर्तव्य
तास्मृतिविरुद्धा।महालयाष्टकाश्राद्धेतिकाठकगृह्यवर्जनंस्मरणंहूर्ममुदाहृतं।भगुरपि।हस्तिश्राद्धंतथासोममग्न्याधेयंमहा
लयं।राजाभिषेकंकान्यंवनकुर्याद्वृषोत्सर्गंचतुर्दशीमितिहति।नागरखंडेऽपि।नभोवाथनभस्योवामलमासोयदाभवेत्।सप्तमःपितृपक्षः
स्यादन्यत्रैवतुपंचमइति।आषाढीमवधिंकृत्वासप्तमंपंचमोद्वयोः।आषाढ्याःपंचमपक्षइतिवचनादाषाढमासस्यात्यभा
गकर्कटसंक्रांतौनभस्याधिकमासत्वं।श्रावणमासस्यासभागसिंहसंक्रांतौनभस्यस्याधिकमासत्वं।तयोरुभयोरपिपक्ष
योःकन्यायांवर्तमानेसवितरियःकृष्णपक्षःससप्तमोभवति।अस्तितुद्विविधाधिकमासेपंचमः।तत्रासतिसप्तमेविहि
तस्यापरपक्षश्राद्धस्यमलिननभस्यकृष्णपक्षेनुष्ठानमयुक्तं।नायंदोषः।संग्रहवाक्यगतमहालयशब्देनतीर्थविशेषस्थवा
मघात्रयोदश्यावाविवक्षणीयत्वात्।नसुमलिम्लुचान्यमासेषुमृतानांश्राद्धमाब्दिकमितिप्रतिसंवत्सरंश्राद्धमाणस्यम
तश्राद्धस्यमासद्वयकर्तव्यतादर्शिता।सानयुक्ता।मलमासेतन्निषेधात्।तथाचसंग्रहः।वर्षेवर्षेतुयश्चैनंमासंमासापि
त्रोर्भतेहनि।मलमासेनकर्तव्यंश्राद्धस्यवचनंयथेति।संग्रहेपाः।वर्षेवर्षेतुमच्छ्राद्धंमृताहनिमलिम्लुचे।कुर्यान्न
त्रत्रभीतानांअन्येषामुक्तरंलिति।मलमासमृतानांतुश्राद्धंयत्रप्रतिवत्सरं।मलमासेतुकर्तव्यंनान्येषांतुकदाचनेति॥ १९
अतःशुक्लमासमृतानांमलमासेमृताहश्राद्धकर्तव्यताविधानमयुक्तं।नेषदोषः।तस्याभिधानस्यप्रथमाब्दिकविषयत्वेनगजानन

यत्वात्।आब्दिकंप्रथमंयत्स्यात्तत्कुर्यात्तमलिम्लुचइतिस्मरणात्।तथाहारीतोपि।असंक्रांतेपिकर्तव्यमाब्दिकंप्रथमंबुधैः।
तथैवमासिकंश्राद्धंसपिंडीकरणंतथेति।स्मृत्यर्थसारेपि।प्रत्यब्दंहरदेमासिकार्थापिंडक्रियास्मृतेः।क्वचिन्नवश्राद्धेपिस्यात्
षण्मुक्त्वातुचतुस्तरमितिप्रेतहरदेमासेपूर्णेसतिप्रेतनामरहितेकार्येतिव्याख्येयं।मासपक्षतिथिनक्षत्रैर्यस्मिन्म्रियतेहवि।प्रसक्तंतुतमाम
नंतिषण्णवंतंविदुरितिव्यासेनाब्दिकदिनस्यविशेषविधानात्।केचित्वाद्यमुक्तमासतुस्तरमितेतदंतरधिमासेपिनोजन्यिसाकार्तिक
प्रमीतस्यप्रथमाब्दिकमाब्दिकमाश्वयुजेकुर्वंतिति।तदयुक्तं।मासपक्षतिथिवचनविरोधात्।नंदिनाथिमासविषयतुयोक्तमीलोप
पद्यते।तस्माच्छुक्लमासप्रमीतानांप्रथमाब्दिकंमलमासेकर्तव्यं द्वितीयाब्दिकंशुक्लमासेतुतथाविवक्षितंभिन्नंत्रैःकर्तव्यतोक्ता। द्वा
मलमासमृतानांयदाकदाचित्सएवमलमासआगतः।तदातत्प्रथमाब्दिकंमलमासेएवकर्तव्यंनतूपरितनेशुक्लमासेतमाच्चभ्रमः।
मलमासमृतानांतुयच्छ्राद्धंप्रतिवत्सरंमलमासेतुतत्कार्यंनान्येषांतुकदाचनेति।अतोमलमासमृतानांनुकोदाचित्काम्यंश्राद्धं
कंमलमासेकार्यं।शुक्लमासमृतानांचप्रथमाब्दिकंतत्रकार्यं।द्वितीयाद्याब्दिकंतुशुक्लमासेतिएतन्निर्णयमभिप्रेत्यपित्कविणि
लोभयोरित्यादीनिवचनानिव्याख्यातानिभरतिलमणिनिबंधेत्यादिनायानिवर्ज्यानिसंग्रहीतानितेषुस्मृतयोदार्ढ्यंयंति।तत्रवृश्चम
नुः।अग्न्याधेयंप्रतिष्ठांचयज्ञदानव्रतानिच।वेदव्रतवृषोत्सर्गचूडाकरणमब्दकाः।मांगल्यमभिषेकंचमलमासेविवर्जयेत्।
कालेवायदिवाह्येकेवास्तमुपागते।मलमासतदैवेतानिवर्जयेद्वैवदर्शनमिति।क्षीनसिंधोनिःपूरास्योरप्येवमेव
पाठः।कोलुमिः।अधिमासेनकर्तव्येश्राद्धेसंवत्सरादिके।वर्षवृद्ध्यभिषेकादिकर्तव्यमधिकेनतु।अधिमासेनकर्तव्यंश्राद्धम

भुद्यंतथा। तथैवकाम्यंयत्कर्मवत्सरंतथमाहते। सपिंडीकरणादूर्ध्वमिकिंचिदपिलिकंहिजैः। दृष्टंकाम्यमवाप्नोतिनन्नकुर्यान्मलिम्लुचदुष्टं
असंक्रांतभकलजोतिःशास्त्रेतत्रदत्तमदत्तंवाहुतंनहुतमेववा। सुजघन्यमध्यजसंस्यान्नोपवासःकृतंभवेत्। नयात्रानविवाहंसुनचकलु
निवेशनं। नप्रतिष्ठाचदेवानांत्रासादग्रामभूरुहां। नहिरण्यनवासासिकारयेदितिनिश्चयेनृणां। स्वप्नांतरेपि। नापीकूपतडागादिप्रति
ष्ठायज्ञकर्मच। नकुर्यान्मलमासेवमहादानफलानिचेति। महादानानितुलापुरुषादीनिषोडश। विभत्स्यपुराणेकानिकनकादीनिद
शकूर्मपुराणेकानि। एवमन्यान्यपिप्रतिषेधवचनान्युदाहरणीयानि। उपाकर्मोत्सर्जनंचेत्यादि। मानुषमासएवकर्तव्यानुक्तानि॥
तत्रज्योतिःपरा[redacted]शरः। दविणालंधितेमासश्चांद्रःख्यातोमलिम्लुचः। तत्रयद्धिहितंकर्मउनरेमासिकारयेदिति। प्रजापतिः उपा
कर्मचहव्यंचकव्यंपर्वोत्सवंतथा। उनरेनियतंकुर्यात्सर्वंतंनिष्फलंभवेदिति। हारीतोपि। उपाकर्मतथोत्सर्गंकाम्यमुत्सवमष्ट
काः। मासश्चौपवासःकार्यानर्जयित्वातुपैतृकमिति। ज्योतिःपितामहेपि। मासःकन्यागतेभाद्रपदसंक्रांतेभवेद्यदि। देवंपित्र्यंत
दाकर्मतुलास्थेकर्तुरक्षयमिति। अत्रकन्यागतेसवितरियेऽसंक्रांतःअसौमलिनआश्वयुजःभाद्रपदांतेकन्याप्रवेशात्।।
एवंचसतिकन्यामुपजीव्यविहितंयद्दैवंपित्र्यंचतन्मलिनआश्वयुजेनकर्तव्यंकिंतुहितुलासंक्रांत्युपेतेशुक्लेआश्वयुजे। नन्वेवंस
तिमहालयापरपक्षश्राद्धस्यापितुलामासेकर्तव्यताप्रसज्यते। तस्यापिकन्यामुपजीव्यविहितत्वात्। तथाचपुराणं। कन्यागे
तेसवितरियान्यहानितुषोडश। कतुभिस्तानितुल्यानिपितॄणांदत्तमक्षयमिति। मैवं। भाद्रपदकृष्णपक्षस्यकन्यासंक्रांति
स्पर्शिनंकन्योपजीविनोऽप्यपरपक्षस्यतुलामासेनुषानुमशक्यत्वात्। तथाचवसिष्ठोजिनिः। अंतेवायदिमध्येवायत्रक २०
न्यांसविव्रजेत्। सपक्षःपंचमःपूज्यःश्राद्धेषोडशकंप्रतीति। बृहन्नारदीयेपि। मध्येवायदिवाप्यंतेयत्रकन्यारविव्रजेत्। सपक्षः श्रीगजानन

सेवकः। एवंचसतिकन्यामुपजीवतीति। किंचनेदमपरपक्षश्राद्धंकन्यामुपजीवति। तस्यामनादरस्मरणात्। तथाचजपनुकर्मः। आ
षाढीभवधिकृलायःस्यात्पक्षस्तुपंचमः। श्राद्धकालःसविज्ञेयःकन्यागछतुवानवेति। अतःकन्यागतेसवितरीतिवचनंकृष्णपक्षस्य
कन्यायोगंप्रशंसति। अतएवऋतुभिस्तानितुल्यानीतितत्रोक्तं। एवंसतितुलास्थेकर्तुरक्षयमितिवचनंमलमासंलक्ष्य प्रतिरिक्तविषयं। अथवामहा
क्षयस्यापिगौणकाल[redacted]र्थतदस्तु। तथाहिकन्यासंक्रांतियुक्तोभाद्रपदकृष्णपक्षस्तस्यमुख्यःकालःकेनापिनिमित्तेनमुख्यका
लासंभवेयावद्यस्त्रिकदर्शनंतस्यगौणकालःस्मृतिसिद्धः। तत्रकिंकन्यास्थेमलिनाश्वयुजेशुक्लेश्राद्धंकर्तव्यंउतकन्यारहितेतुलोपेतेशुक्ल
श्वयुजइतीक्षायामतुलास्थेकर्तुरक्षयमितिविधीयते। एवमन्यान्यपिउनरमासैकतत्वविषयाणिवचनानिअध्युदाहार्याणि। तदेवंकाम्यं
कार्यविवेकःसंक्षेपात्संपन्नः। तत्रकिंचिन्ममासएवकर्तव्यं। तद्यथा। मलमासमतानांयदाकदाचित्तत्साहिकं। अन्यथासमतानां
प्रथमाह्निकंचकिंचिच्छुद्धमासएवकर्तव्यं। तद्यथोपाकर्मादि। किंचिदुभयत्रापिकर्तव्यं। तद्यथाश्राद्धादिकं। किंचिदुभयोरन्यतरस्मि
न्निमित्तवशात्कर्तव्यं। तद्यथाहारीतःसपिंडीकरणंतावत्किंचिन्मलमासेवर्जं। तद्यथा। अनित्यमनिमित्तंचेत्यादि। अथमलमासस्यैव
वहिरंगाढसंज्ञकोविशेषउच्यते। तत्रबृहन्निहिरः। माधवोद्यसुवृष्टस्यैकमासिद्वीहूयंयदाहिराषाढः सविज्ञेयः शुनेकर्कटसंयु
तइति। शुनंचश्रावणसंज्ञकमत्रभाविनिसंवत्सरेहरिस्वापविवेकायोपयुज्यते। अतएव। हरिर्मिहिरः। मेषादिमिथुनांते
षुयदाद्वीहूयंभवेत्। अब्दांतरेतदाचैवंमिथुनार्केहरिःस्वपेत्। कर्कटादित्रिकेषुयदाद्वीहूयंभवेत्। अब्दांतरेतदा
वश्यंकर्कटार्केहरिःस्वपेदिति॥ ॥इतिमासनिर्णयः॥ ॥अथपक्षः॥ ॥पक्षशब्दःपक्षपदित्यहरूपस्याक्षांतोनिष्प
न्नः। देवकार्यार्थंपित्कार्यार्थंवापक्षंतंपरिगृह्येतयःकालविशेषः सपक्षः। अथवाचंद्रस्यपंचदशभागकालनामाहरूपंक्ष

BHANDARKAR ORIENTAL RESEARCH INSTITUTE DR BHAU DAJI MEMORIAL

सूर्येंदुसंनिकर्षे वि प्रकर्षे तयोरवस्थानं दर्शपूर्णिमयोः संपद्यते । तदाह गोभिलः । यः परः संनिकर्षः साऽमावास्येति । नन्वत्रेंदुकलानां सूर्यत्रयेऽपि निर्गमोपलभ्यते सोमोत्पत्तौ तुषड्ग्या । तदिदेवतासु नायं दोषः । अस्मदादिदर्शनापेक्षया ज्योतिःशास्त्रस्य प्रवृत्तत्वात् । सोमोत्पत्तौ तुषड्ग्यादिदेवतानां तत्तत्कालप्रयुक्तात्तिर्विवक्षिता । यदि सूर्येंदुवेश्मनिर्गमौ यदिमावड्ग्यादिदेवतासु सर्वथापि कलाप्रयुक्तावेव प्रतिपदादितिथयः । ननु सावनदिनेषु सौरेंदुदर्शेषु चेति । एवमुपपद्यते । इति अधिकुतो निर्णयोऽधमर्तिकः । संदेहसंभवादिति क्रमः । नखलु सौरचैत्रादिनक्षत्रदिवसयोः संदेहसद्भावो [illegible] स्तिनियतपरिमाणत्वात् । तच्च प्रत्यक्षसिद्धांतेऽभिहितं । सावनेस्मादहोरात्रमुदयादुदयाद्रवेः । खस्थिते शतुरंशशतिथिसंभागैरेवमिति । एकस्मिन्नेवमहोरात्रे यावंतं कालं रविर्वर्तते तावान् कालस्त्रिंशायमभूः सौरो दिवसः । तिथिरेकः कलात्मकस्तु भोगः । दर्शावताकालेन निष्पद्यते तदेवमिदं । अत्रात्र सौरसावनयोरिवात्रापि दिनसंदेहाभावः शंकनीयः । ह्रासवृद्धिव्यवस्थानुसंदेहसद्भावात् । ह्रासवृद्धिव्यवस्थाऽपि दर्शयते । खवेदैर्यस्मात्तिथिस्त्रिंशद्घटिकात्मकः । धर्मधर्मवृद्धादेवतिथिस्त्रिधा विवक्षितेति । खवेदसमदर्शितः । प्रतिपत्प्रभृतयः सर्वा उदयादुदयाद्रवेः संपूर्णाः स्युरिति विख्याता हरिवासरवर्जिताः । हरिवासरएकादशी । यानु नोक्तलक्षणा खंडतिथिः । तत्र संपूर्णायां विधिनिषेधयोर्नास्ति संदेहः । खंडतिथौ तु विधिनिषेधौ माह [illegible] तिगार्ग्यः । निमित्तकालमादाय वृद्धि

विधिनिषेधयोः । विधिः पूज्यतिथौ नत्र निषेधः कालमात्रके । तिथीनां पूज्यतानामकर्मानुष्ठानयोग्यता ?

विभक्तरूपमास्थेयैकैकमर्धमूहते । पंचदशस्तोमनामकेन साम्नसमूहेन मध्ये त्रिरत्नस्तोमनामकस्य साम्नसमूहस्य पूर्वोत्तरभागाभ्यामुत्पन्नत्वान्नयोः पूर्वापरपक्षत्वं । तौ च द्वौ पक्षावुदेवानासुरेणाक्रमेण स्तुत्वानयोः पक्षयोः प्रशस्ततात्प्रशस्तत्वेनेदं तत्सर्वं होक्तं प्रजापतिरकामयत । प्रजायेयेति स तपोऽतप्यत स त्रिरत्नस्तोममसृजत तं पंचदशस्तोमोऽनुदाजन्नुपपक्षावग्रापरपक्षावभवतां ह्युपपक्षौ देवा अन्वासृजंतापरपक्षमन्वसुराः । ततो देवाऽअभवन्परासुरः यंकामयेतवसीयांस्यात्तं दितितमूपपक्षेण जयेत् । वसीयानेव भवतीतियंकामयेत पापीयान्भूयादितितमपरपक्षेण जयेत् । पापीयानेव भवतितस्मादूपपक्षावपरपक्षावकुरुतं तरुतिवसीयान्वसुमत्तरः । पापीयान्भूरुग्रहीमः । कर्तृणां शुभफलप्राप्तये कलेनकरणामतिशयेनहितीतिकरुणतरः । तदेवमस्मिन्प्रकरणे संवत्सरायणर्तुमासपक्षतिथिनिरूपिताः ॥ "पूर्णिमीमाधवीयेकालनिर्णयेसंवत्सरव्यवहितीयंत्रकरणंसमाप्तं ॥ ॥अथतिथयो निरूप्यंते ॥ "तत्रतिथिरुदयास्तमयौ धीतो निश्चिन्वन्तः तननंति विस्तारयंतीतिधर्मानक्षीयमाणांवा चंद्रकलामेकांयः कालविशेषः सतिथिः । मुहूर्तायथोक्तकलयातन्यूनतुतिथिः । तदुक्तं सिद्धांतशिरोमणौ । तन्यूनेकलयसमायैर्नतमानास्तिथयस्तताऽमुतः । एतदेवाग्नेयेस्कांदेपठ्यते । अमावास्योऽपरभागेनदेवैरेकाभिहाकला । संस्थितासापरमामायादेहिनांदेहधारिणी । अमादिपौर्णमास्यंतायाएवशशिनःकलास्तिथयस्तामेमामाख्यातामेवपरेननमुतिं । अवमतिथिः । यामहुर्मामाऽऽधारस्वरूपा देहिनोदेहधारिणी । संस्थितासाचंद्रमंडलस्थैरोऽमृता । गमपरिमितचंद्रदेहधारिण्यमानाम्नीमहाकलेतिप्रोक्ताक्षयोदयरहिता नित्यातिथिसंज्ञकैव । पुनरन्यापिपंचदशकला दिवसव्यवहारोपयोगिन्यक्षयोदयवत्यः पंचदशतिथयोभवंतीतितिथयः सोऽयमेवेतिअविरुद्धंवचनमिति । श्रुतिरत्रस्मिन्नेवार्थेपरा

निर्णयएवोदाहृता। तस्यश्चत्रयःपंचदशकलाध्रुवेषास्थकाषोडशीकलेति। एवंसत्यत्रसामान्यविशेषरूपेणतिथिद्वैविध्यमुक्तंभवति। तत्रमे
यमभेदमुक्त्वाक्षयोदयनक्षितांध्रुवाषोडशीकलात्मकःकालस्तिथिसामान्यं। यास्तद्विशिष्टाद्वितीयेत्यादिपंचदशकलारूपाभिर्द्वितीयाः
कालविभागास्तिथिविशेषास्तासांपंचदशानामेकैककलाक्षयादयःप्रजापत्यंताःपंचदशदेवताःक्रमेणविशंति। तत्रनक्षत्रपूर्णाकला
प्रथमपीयतदुक्तिप्रथमेत्युच्यते। तत्रायुक्तःकालविशेषःप्राथम्यावच्छिन्नाप्रतिपच्छब्देनाभिधीयते। एवंद्वितीयादीनांपंचदशांतानां
तिथीनांनामान्यवगंतव्यानि। एताएतःकृष्णपक्षतिथयोभवंति। पुनश्चैताःपीताःकलाअनेनैवक्रमेणतत्तत्पात्रवह्न्यादिदेवता
भ्योनिर्गत्यचंद्रमंडलंद्रवंतिं। ताभिर्युक्ताःकालविशेषाशुक्लपक्षगताःप्रतिपदाद्यास्तिथयोभवंति। वह्न्यादिदेवतानांकलापा
नंसोमोत्पन्नोपद्यते। तथाहि प्रथमांपिबतेवह्निर्द्वितीयांपिबतेरविः। विश्वेदेवास्तृतीयांतुचतुर्थींइंद्रोहिलोधिपः। पंचमींतुषष्ठ्वा
रःषष्ठीपिबतिवासवः। सप्तमीमर्यमोदिव्यामष्टमींभजएकपात्। नवमीकृष्णपक्षस्यचमःप्राश्नातिवैकलां। दशमींपिबते
वायुःपितृपक्षेकादशींदशीनुमा। द्वादशींपितरःसर्वेसमंप्राश्नंतिभागशः। त्रयोदशींधनाध्यक्षःकुबेरःपिबतेकलां। चतुर्दशींपशु
तिःपंचदशींप्रजापतिर्निषेधस्तुनिवृत्त्यात्माकालमात्रमपेक्षतइति। एवंसतिरवउत्तिथौहूयमानेनिर्णेतव्यंभवति। तत्रप्रति
पदमारभ्यपंचदशंतावत्तिथयःक्रमेणनिर्दिश्यंते। तत्रप्रतिपच्छब्दउपक्रमेवर्तते। चंद्रःपक्षामासोवाप्रतिपद्यतेप्रारभ्यते
मस्यांतिथौसाप्रतिपत्। प्रारंभवाचित्वंचप्रतिपच्छब्दस्यब्रह्मणारण्यकस्त्रेणप्रयोगादवगम्यते। तथाच
श्रुतिः। स्रात्वाररंथंयथोतयदूदंवसासुतंधदूतिभरुत्वतीऋस्यप्रतिपदनुचरःपठ्यते। अयमर्थः। मरुत्वतीमंनामकि २२
ञ्चिच्छस्त्रं। तस्यस्तोत्रस्थमिलयंमंत्रः प्रतिपत्प्रभृतिपाठ्यः। इदंवसोसुतंधदूतयंमंत्रानुचरःपश्चात्पाठ्यइति। तथोक्तंश्रीगुरुचरणैः

ष्टीश्राद्धमेधश्राद्धमित्याम्नंति। पवस्वराजसातयदूदनुष्टुप्प्रतिपदुच्यतीति। तथातएवदर्शपूर्णमासप्रकरणेपठंति। सामि
धेनीरनुवक्ष्यतेतावाहुतीःपुरस्ताद्धयंतस्रोमंप्रतिपदंकुरुतइति। एतावत्प्रतिपन्निमित्तंयदासूर्योदयमारभ्यपुनरुदयपर्य
ंताभवतितदासुश्लत्वात्प्रतिपदिविहितंसर्वनिःशंकेसत्यनुष्ठेयंचंद्रदर्शनंपक्षांतरेणदर्शितं। आदित्योदयवेला
याआरभ्यषष्टिनाडिकातिथिर्यदास्तमेतिसातिथिरित्यंविधिरिति। सर्वत्रैतावत्तिथ्यवच्छेदव्या
दोदयंस्थिताः। शुक्लाएतिद्वितिथ्यादयः षष्टिनाड्योहिभवंतीतिथिरिति। यदत्रुसाप्रतिपत्षंडतिथिः सतीपूर्वेतरयोरुदयेद्वि
द्वितीयाभोगयुक्तेतदादियुक्तायाः पूज्यत्वात्तत्रानुष्ठेयं। तदुक्तंकर्मविपाकेनसिरःह। पंचमीसप्तमीचैवदशमीचत्रयोदद
शी। प्रतिपन्नवमीचैवकर्तव्यासमुखीतिथिरिति। संमुखत्वंचछंदोगपरिशिष्टेविवेचितं। संमुखीनामसायाह्नव्यापिनीद
र्शेतेयदा। प्रतिपत्संमुखीकार्यासावेद्वापरह्णिकी। आसोविप्रतिपत्सेवविद्धायाभवेद्यदापरह्णिकी। दैवकर्मतथाज्ञेयपै
र्यंश्राद्धंसमुखंअर्वीत्। सायाह्नापरह्णादयः कालविशेषाःसवनदिवसगतस्याहोभागभेदाअवगंतव्याः। सत्यदिवसोविष्णु
धर्मोत्तरेविवेचितः। लघ्वक्षरसमामात्रा निमेषःपरिकीर्तितः। अतःसूक्ष्मतरःकालोनोपलभ्येणुरूपम। नोपलभ्यंयथा
प्रत्यंसूक्ष्मंपरमाणुतः। द्वौनिमिषौत्रुटिर्द्वेत्रुट्योप्राणोदशत्रुटिः समृतः। विनाडिकाप्राणषट्प्राणा स्तेषष्टिर्नाडिकास्मृता। अ
होरात्रंतुतत्संख्यानित्यमेतन्मयाकीर्तितं। विनाडीभूतंश्रुतआभोहरत्नेणकीर्तिताः। तत्रपंचदशोक्तारामरात्रिर्दिवात
त्यः। उत्तरायणयुक्तादाकाष्ठाकमादाक्रमोत्तरविः। तदाप्रदाभवेद्दिनिर्दिवसस्थमहाभुजा। दिवसश्चयदारामदृष्टिसं
मधिगच्छति। तदाग्निनमुहूर्तानिभवंतिदृष्टिःप्रजायते। दिनमृक्षोरात्रिहानिस्तथानिश्चयथाश्रुथा। तदाग्निनमुहूर्ता

नांहानिर्नीयातथातश्चादक्षिणंचयदर्कमादक्रमतेरविः।दिवसस्यतदाहानिर्नीतिव्याताददेवतु।क्षीयंतेतस्यहानेश्चतन्मुहू
र्तास्तथैवच।रात्र्याश्चिताश्चवर्धंतेरात्रिवृद्धिस्तथैवच।यदामेषंसहस्रांशुस्तुलांचैवप्रपद्यते।समरात्रंदिवःकार्ह्यंदिनमूर्ध्व
स्थमार्कजं।वार्कोकाआर्थदृतियाचत।अत्रयेमुहूर्त्तीभिहितास्तेषांनामानिश्रुतिस्मृतिपुविविधानि
दर्शितानि।तत्रश्रुतिंतावत्तैत्तिरीया:पठंति।चित्रःकेतुर्दीप्ताप्रदाताज्ञविताप्रसविताअभिशस्तानुमंतेतिएतेनुवाका
मुहूर्त्तानांनामधेयानीति।अत्रहूभ्यांहाभ्यांपदाभ्यांएकैकस्यानुवाकस्यप्रतीकमुक्तं।तथासतिचत्वारोनुवाकाःस
पद्यंते।तत्रप्रथमेशुक्लपक्षगतस्याहोमुहूर्ता:द्वितीयेतद्रात्रेःतृतीयकृष्णपक्षगतस्याहः।चतुर्थेतद्रात्रेरितिविवेकः
तेचानुवाकाएवंदृश्यंते।चित्रकेतुःप्रभानाभानुसंभानुज्योतिर्भानुतेजस्वानातपस्तपोमहातपोनो
रोचमानोरोचनःरोणममानःकल्याणःदाताप्रदाताभद्रोमोदःप्रमोदःअवशायन्निवेशयन्संवेशनःसंशांतःआ शांत:
भुवनंप्रभवन्संभवन्संभूतेभूतः।ज्ञविताप्रसविन्नादीप्तोदीपयन्दीप्यमानःअलन्अलिनातपन्तपंस
तपोहोचमानःशुंभूशुंभमानोवामःअभिशस्तानुमतानंदोमोदःप्रमोदआसादयन्निषादयन्संसादनःसंस पट्रोचनो
न्नःसंन्नःआभूर्विभूःप्रभूःशंभूर्भुवदृति।एतेनुमुहूर्त्तेषुचैकैकमुहूर्तस्यपंचभागाःतद्रूपमुहूर्ताः।तत्राचदेवत्रा दश
लणदृदानींतदानीमितिएतेवैमुहूर्तानांमुहूर्ताइति।इदानीमितिसांहिकेनुवाकेमंत्रकांडेसंपद्यते।इदानींतदा २३
नीमतर्हिक्षिप्रंआशुनिमेषःकणोद्रवन्अतिद्रवन्त्वरंस्त्वरमाणआशुराशीघ्रंजवइति।ज्योतिःशास्त्रेतुअहो श्रीगजानन।

इति

रात्रयोस्त्रिंशन्मुहूर्तानांनामानिकथ्यंतेनाम्नानि।रौद्रीवैष्णवस्तैत्तिलपितरोवसवोविश्वाहूयाब्राह्मोमरुहसंभवोदुरुतभुरुदेवेश
नक्षंवरुणोर्यमायनवोदयतथापंचदक्षिणावासवोरुद्राजाहिर्बुध्न्यपूषाकैनाशोग्निर्धातृचंद्रादितीज्याविष्णुर्भगस्त्वा श्वेना सुः
ष्टधातानुहूर्ताःरात्रौक्रूरस्तंतप्राजापत्याग्नेरुद्रादृति।स्मार्तानितुनामानिपुराणेदर्शितानि।रौद्रश्चैतश्चमैत्रश्चतथा सामभटःस्म
तः।सावित्रोदेवश्चगांधर्वःकुतपस्तथा।रोहिणस्तिलकश्चैवविभवोनिकृतस्तथा।एवंरविजयश्चैवभवाःपंचदशस्मृ
ताइतिहासेपंचदशसूर्योदयादारभ्यैकैकमाहिवामुहूर्ताः।एकरश्चाजपादश्चतथाहिर्बुध्नमात्रको।आश्विनोयाम्यकाग्नेयो
वैधात्रश्चाद्रएवच।आदितेयोग्निरेवश्चवैष्णवःसारएवच।ब्राह्मोनामश्चतश्चैवमुहूर्ताःक्रमशोनिशीति।यमोक्तनानाविध
नामकत्रिंशन्मुहूर्तेषुपोष्यसावनाहोरात्रस्ययदहःपंचदशहोरात्रात्मकंमुहूर्तात्मकंतस्याहोभागोपरार्द्धसायाह्नो
नरादयः।नचायंभागोमानभेदेनव्यवधीकल्प्यते।द्विधात्रेधाचतुर्धापंचधापंचदशधाचाहर्विभज्यनवृतिपंचमतोदाः।अ
त्रद्विधाविभागः।स्कंदउशनोदर्शितः।आवर्तनात्पूर्वार्द्धोह्यपरार्द्धस्तनःपरइति।एतदेवाभिप्रेत्यमनुराह।यथोवेवापरः
पक्षःपूर्वपक्षाद्धिशिष्यते।तथाश्राद्धस्यपूर्वाह्णादपराह्णोविशिष्यतइति।त्रेधाविभागोपिस्कांदपुराणेदर्शितः।
ऊर्ध्वंसूर्योदयात्पंचकंमुहूर्तानांपूर्वाह्णःप्रथमःप्रोक्तोमध्याह्नस्तनःपरः।अपराह्णस्तनःप्रोक्तोमुहूर्तानां
चपंचकइति।शांतातपोपि।तस्मादपराह्णेदेवाअशनमभ्यवहरंति।मध्यंदिनमनुष्याअपराह्णेपितरइति।एतेमे

वविभागमभिप्रेत्यसहस्रसंवत्सरसत्रे ब्राह्मणेऽम्नायते। ऋग्भिः पूर्वाह्णे दिविदेवासूर्यंयजुर्वेदेनतिष्ठतिमध्येअह्नःसामवेदेनास्मिन्महीयतेवेदैरस्यस्त्रिभिरितिसूर्यइति। श्रुत्यंतरेपि। पूर्वाह्णोवैदेवानांमध्यंदिनंमनुष्याणामपराह्णःपितॄणामिति। चतुर्धाविभागमाहगोभिलः। पूर्वाह्णःप्रहरस्तावन्मध्याह्नःप्रहरस्तथा। आपराह्णीयादपराह्णःसायाह्नस्ततःपरइति। पंचधाविभागंव्यासआह। मुहूर्तस्त्रिगुणःप्रातस्तावानेवतुसंगवः। मध्याह्नःस्त्रिमुहूर्तःस्यादपराह्णोपितादृशः। सायाह्नस्त्रिमुहूर्तस्तुसर्वधर्मबहिष्कृतइति। वृद्धपराशरोपि। लेखादित्यात्प्रभृतयोमुहूर्तास्त्रयएवतु। प्रातस्तुसप्तमूहूर्तःकालोभागश्चाह्नःसपंचमः। संगवस्त्रिमुहूर्तोथमध्याह्नस्तत्समःस्मृतः ततस्त्रयोमुहूर्ताश्चाथापराह्णोविधीयते। पंचमोथदिनार्धंयः ससायाह्नइतिस्मृतइति। एतमेवविभागमभिप्रेत्यैकाश्विमंत्रेसंगवकालमवलंब्यव्यवहारमंत्रंबह्वृचाआश्विनसूक्तेदृश्यतेऽम्नायंते। उतायातंसंगवेप्रातरह्नोमध्यंदिनउदितासूर्यस्यदिवानक्तमवसाएतमननेदानींपीतिरश्विनाततानेति। अस्मिन्मंत्रेप्रातःसंगवमध्यंदिनानांसंज्ञाभिर्व्यवहृतत्वात्। अवशिष्टयोर्भागयोरप्येतत्त्रितयमुपलक्षणंद्रष्टव्यं। तैत्तिरीयब्राह्मणेयथोक्तानांपंचानांप्रातरादीनांभागानांमध्यवर्तिषुचतुर्षुसंधिष्वग्निष्टोमोक्थ्यषोडश्यतिरात्राप्तोर्यामसंस्थानांक्रतूनांनिर्माणंकुर्वद्भिर्यथोक्तभागाःसाधिष्ठाःदेवाःसमाम्नाताः। देवस्यत्वासवितुःप्रार्पयंत्रस्यसंगवः। सहस्रंतेमध्यंदिनंभगस्यापराह्णः। अरुणस्यसायमिति। छंदोगाश्चसप्तभक्तमुपपत्तसाम्न आदित्यात्मनोपासनंवक्तुमादित्यस्यसंबंधिनः कालभेदान्विभज्यतेषांहिंकारादिसप्तभक्तिरूपतयाविवक्षयाऽऽमनंति। श्रीगजानन

तस्मयत्पुरोदयात्संहिकारः। अथमत्रथमोदितेसप्रस्तावः। अथयत्संगवेलायांस्तआदिः। अथयत्प्रतिमध्यंदिनेसउद्गीथः। अथयदूर्ध्वंमध्यंदिनात्प्रागपराह्णात्सप्रतिहारः। अथयदूर्ध्वमपराह्णात्प्रागस्तमयात्सउपद्रवः। अथयत्प्रथमास्तमितेतन्निधनमिति। जनसनेयिनोपिरेवमामनंति। आदित्यावैसर्वऋतवः। तदेवोदयनंसंगवोधश्रीष्मायदामध्यंदिनोथवर्षायदापराह्णोशरदेवास्तमेथहेमंतइति। पंचदशधाविभागंवक्ष्यतइति। रौद्रंश्वेत्रंश्वमित्रंश्चतथाशालकटःस्मृतः। सावित्रंजयंतंश्चगांधर्वःकुतपस्तथा। रौहिणंश्चविरंचंश्चविजयोनेऋतस्तथा। महेंद्रोवरुणंश्चैवभेदाःपंचदशस्मृताइति। तत्रपंचधाविभागपक्षस्यबहुश्रुतिस्मृतिपुराणत्वात्प्रायेणैतमपपक्षमाश्रित्यविधिनिषेधशास्त्राणिप्रवर्तंते। रूपेज्योतिर्योतिःसूर्यःस्वाहेतिप्रातरितिश्रुतेःप्रातःकालमुपजीव्यतत्कालीनस्वाहाभस्मत्रविशेषाभिहितः। अन्वावपि। संध्यमुपास्मविवित्मातहेमंतसमाचरेदितिहेमंतेनप्रातःकालआश्रितः। संगवस्तुकात्यायनेनव्यवहृतः। संधिश्चेत्संगवादूर्ध्वंत्रीन्क्रतून्वर्णनाद्रवेः। सापौर्णमासीविहायासंधिष्कालविधीतिश्रिरिति बोधायनेनमध्याह्नोव्यवहृतः। मध्याह्नआपिनीग्राह्याएकभक्तेतिश्रिरिति। अमावास्यायामपराह्णेपिंडपित्रर्थेनचरंतीतिश्रुत्याऽपराह्णोव्यवहृतः। सायाह्नव्यवहारस्तूर्ध्वंनेवसुरवीनामर्थवादवचनेनदाहृतः। चतुर्धाविभागस्तुसवनत्रयउपयुज्यते। यथोक्तेषुपंचसुकालेषुयानिविहितानिकर्माणितानि देवपित्र्यरूपेणराशिरूपंकुलातयोःगौणकालाभ्यांत्रीन्चतुर्धाविभागोदर्शितः। चतुर्धाविभागस्तुप्रकरणबलाद्भिन्न

अष्टमामुहूर्तेइति कोलुभाकरोदयः।

स्मृसुक्तकर्मविशेषेद्र क्ष्यते। पंचदशधाविभागोमुहूर्तविशेषोपजीवनेनविधिनिषेधौज्योतिःशास्त्रदृष्टौ। एवंचसतिप्रकृतेपंचस्व
होभागेषुसोमाद्रूभागंव्याप्यतनःपूर्वंचतुर्थमपरद्रुभागंव्याप्तिपत्सस्पृशति।तादृशीपूर्वविद्धोपवासकृत्या।अत्रतिथीनांक्षयवृ
द्धिनसीनादर्शितः।पक्षद्वयेपितिथयःस्तिथिंपूर्वांतथोत्तरां।त्रिभिर्मुहूर्तैर्विध्यंतिसामान्यायंविधिःस्मृतिषु। पूर्वयुक्तमान
तरमपरावास्यात्रिमुहूर्तावेत्तापिपूर्वांतिथिंविध्यति।एवमुभयतोविद्धयेदिनेदूरवर्तिन्योःप्रतिपदोर्मध्येकिंपूर्वांग्राह्यउ
×त्तरांप्रतिपदंविध्यति।परेद्युरस्तमयात्प्राक्कुहूतीयात्रिमुहूर्तावे× उत्तरेतिविचार्यते।अत्रपूर्वायाग्राह्यवचनेनस्तिस्कंद
पुराणआहुः।तद्वचनानिषेत्सुदाहृतानि।लिंगमप्येवमेवाह।युग्मान्नियुगभुजानाषड्मुन्योर्वसुरंध्रयोः।रुद्रेणद्वादशीमु
क्तांचतुर्दश्यांचपूर्णिमां।प्रतिपद्युग्ममाहात्म्यंतिथ्योर्युग्मंमहाफलं।एतद्धस्तमहादानंहंतिपुण्यंपुरंकृतमिति।युग्मंद्वितीं
या।अग्निस्तृतीया।युगंचतुर्थी।भूतंपंचमी।षट्षष्ठी।मुनिःसप्तमी।वसुरष्टमी।रंध्रंनवमी।रुद्रएकादशी।अत्रयुग्मा
ग्न्यादिसप्तयुग्मेषुपूर्वतिथिरुत्तरविद्धा।नवाद्याउत्तरविद्धासुक्तंभवति।स्मृत्यंतरेपि।एकादशीतथाषष्ठीअमावास्या
चतुर्थिका।उपोष्याःपरसंयुक्ताःपरःपूर्वेणसंयुताइति।अत्रत्रापि।षष्ठ्यष्टमीअमावास्याकृष्णपक्षत्रयोदशी।एताःप
रयुताःपूज्याःपरःपूर्वेणसंयुताइति।शिवशंकरगीतायां।एकादश्यष्टमीषष्ठीद्वितीयाचचतुर्थिका।चतुर्दश्यमावास्या
उपोष्याःस्युःपरान्विताइति।एतेषुसर्वेषुवचनेषुप्रतिपदःपूर्वविद्धायाःपूज्यत्वंप्रतीयते।एतस्यैवपक्षस्यानुग्राहकउत्तर २५
विधायानिषेधोदृहदृसिंहेनस्मर्यते।द्वितीयापंचमीवेधाद्दशमीचत्रयोदशी।चतुर्दशीचोपवासेहन्युःपूर्वेनिरतिथीरिति।श्रीगणेशाय

ना

वलिंगं। आनंदेजरेमृतइत्यादिकं त्रयलिंगं। चतुर्णां लिंगानांसमबलत्वादिष्टमार्थकिंचित्कल्पनीयमितिपूर्वपक्षः। आनंदजरत्वादीनांत्रयलिंगानामनेकत्रानेषांधात्वादीकथंचिदप्यैक्यमभ्युपगंतुमशक्यत्वात्। शरीरेआपनादीनांवाय्वादिलिंगानांतदुपासुपहितेत्रयलिंगेसंपादनाद्वैसेवात्रप्राणशब्देनविवक्षितमितिरत्नाकरेति। इतीमांसायांषष्ठाध्यायस्यसप्तमेभेदसहस्रसंवत्सरादिकरणस्यसंशयेपक्षाःअष्टावुपन्यस्ताः। किमस्मिन्सत्रेदीर्घायुष्ट्वगंधर्वादीनामधिकारः। उतरत्नाकरेनैसाधनामनुष्याणां। अथपितृपुत्रपौत्रादिपरंपराकुलस्यकुलस्थेस्विदस्मादेवज्ञात्रादत्रप्रवृत्तस्यसहस्रसंवत्सरमायुर्भविष्यतिकिंवास्माधिहिरण्यानांपुरुषाणामत्राधिकारः। अत्रसंवत्सरेकिंमासिपरपक्षादूरात्रिपरावादिनपरादेति। एवंसतिसंशयस्यैककोटित्वंताकिंकैर्नोदर्शितेनगुरुकोटिकत्वं। नन्वेवमपिशयोनापेनं। क्षणप्राणाधिकरणन्यायेनगमकानिवक्तव्यानीतिचेन्नान्युदाहरामः। द्वितीयातृतीयपुनर्वसुरोहिण्यादिसामान्यतःप्रतिपन्मात्रंप्रतीयते। युग्माग्निवाक्यंत्रतिपदोयमावास्येतिपूर्वदिनदूयत्वस्यशुक्लप्रतिपद्विषयत्वादितरस्मकृष्णपक्षविषयत्वं। नचात्रामावास्याशब्दःपूर्णिमायाअपिपलक्षणमितिशंकनीयं। चतुर्दश्यावपूर्णिमेतिपूर्णिमायाःपूर्वदिनेनसहयुग्मत्वाभिधानात्उदाहृतरत्नसंतरेणउपोष्याःपरसंयुक्ताःपरःपूर्वेणसंयुताःस्थूलमावास्ययुतायाःप्रतिपदउपोष्यत्वाभिधानात्। द्वितीयायुक्तायाःउपवासव्यतिरिक्तव्रतादिविषयत्वं। नुउपोष्यशब्देनव्रतादीनामुपलक्षणमितिचेन्नपूर्वाह्णोवैदेवानामितिश्रुतात्रतादेःपूर्वाह्णस्यविहितत्वेनोत्तरदिनस्वीकारेकर्मकालव्याप्तिलाभात्। यस्मिन्काले नुयत्कर्मतत्काल व्यापिनी श्रीगजानन

BHAU DAJI

तिथिरितिहिकर्मकालव्याप्तिःस्मर्यते। नचोपवासेपिसमानमेतदितिवाच्यं। उपवासस्याहोरात्रसाध्यत्वेनखंडतिथौसंपूर्णकर्मकालव्याप्तसंभवात्। अतिबाहुल्यंतुपूर्वविद्धायामेवभवति। अहोरात्रभोगेकृत्स्नायांरात्रौचतद्व्याप्तेः। उदयेतूपवासस्येतिरत्नाकरेचुरुपवासःप्राग्नेतिःउक्तियेतन्नतस्याःसामान्यशास्त्रेणप्रतिपदुपवासाभिधाविनोविशेषशास्त्रादुवैलक्षण्यात्। किंचनास्तिस्कंदव्यासेःपूर्वत्रयोदशीयुताकूव्याप्तिमतीमयव्याप्तिमतीचपूर्णिमाभिधानेसतितासामेवतिस्रणांव्याप्तीनामभावेउत्तरत्रयोदशीयुक्तत्रयंसंपद्यते। ननुपूर्वत्रयोदशीयुताकूव्याप्तेःसत्वांतर्भावेनपृथक्तदभिधानंनिरर्थकमितिचेत्। किमिदंसायंकूाभिधानंविवक्षितं। किंवाभयाभिधायिवाक्यंमाघः। यदाद्वितीयैकादशीयुताकूव्याप्तिःसामान्यकूमात्रंव्याप्यते। तदापिपूर्वविद्धायाःपूर्णतायावक्तव्यत्वात्। द्वितीयावैष्णवीनेत्यस्यानावपुनर्वसुयुतादेर्भविष्यति। सचन्यायेउद्दिष्टादिपादव्यवस्थितेःकाम्यकांडेदृश्यते। वैश्वानरंद्वादशकपालंनिर्वपेत्संवत्सरजातेयदेकपालोभवतिगायत्रैवैनंब्रह्मवर्चसेनपुनातिं। मन्नवकपालस्त्रियतैवास्मिन्मेधातिं। यद्देकपालोद्विरजैवास्मिन्नन्नाधंदधातिं। यदेकादशकपालस्त्रिष्वेवैनंत्रिंद्रियंदधातीतिं। अत्रहादशकपालेष्टेब्रह्मवर्चसादिफलविशेषायाष्टकपालादिनामत्रावकाशाभावादुपक्रमोपसंहारांतर्गतत्वेनतेषांविधंतरभावाच्च। गुणविधिरितिपूर्वपक्षः। उत्पत्तिशिष्टद्वादशकपालेनावरोधसमुत्पन्नक्षि ×

×

शनाम शकपालादी ×

वमहवैरूपकपालादिभिर्नतिरीयकसिध्येरवमविनोहादशकपालस्यस्तुतिरितिसिध्यति। एवमत्रापियदासायाहूव्यापिन्यपिगृह्यते
तदापरेह्व्याप्तिग्रहणंकिमुवक्तव्यमितिनातरीयकसिध्यर्थासायाहूव्याप्तेःपरेह्व्याप्तेश्चप्रशस्यते। स्कंदपुराणेबलिदिना
भिधानायाःशुक्लप्रतिपदःसर्वविधिफलाभिधानादितरस्यसर्वप्रतिपदुत्तरलेखपक्षःप्रतीयते। शुक्लपक्षोपवासाधरेह्व्यासायाहू
बलिदिनानांपंचानांसमूहस्यपूर्वतिथिप्रयोजकलेसतिमःपक्षउदेति। एवंह्यवदुर्विधसंशयेसतिविर्णयंब्रूमः। यद्यपि
हितीयाप्रतिपद्युतेतिअत्रनकोपिविरोधःपठ्यतेतथाधरेह्यप्रतिपत्स्वीकारेयुगाद्यन्या दीनिबहुनिवाक्यानिबाध्येरन्।
नच्चांत्रिमःपक्षोयुक्तिसमूहः। तदाहिपूर्वविद्धायाःप्रयोजकमेवंवक्तव्यं।शुक्लपक्षसायाहूपरेह्व्याप्तिबलिदिनेउपवा
सयुक्तपूर्वविद्धाविधयइतितत्रनवक्तुंन्युक्यते। बलिदिनस्तन्निमित्तीकृतोपवासस्याविधेयत्वात्। पूज्योत्सवादिकमेवहि
तत्रविहितं। अतःसमूहस्यप्रयोजकत्वाभावेशुक्लपक्षादिपंचस्वन्यतमस्यप्रयोजकत्वमभ्युपेयं। अत्रकिमिथ्याविक
ल्पः। अहोस्विदेकप्रतिनियतमितिविचारेविकल्पस्तावन्नप्रयुज्यते। अदृष्टादृष्टप्रशस्तत्वात्। तथाहि। यदावल्युत्सवस्य
प्रयोजकत्वंस्वीक्रियेततदोपवासवाक्यस्यप्राप्तंप्रामाण्यंभज्येत। अप्राप्तंचाप्रामाण्यंस्वीक्रियेतानुमत्यपियदाकदाचि
दुपवासप्रयोजकत्वस्वीकारेकल्पितमप्रामाण्यमपह्नूयेत। निराकृतंच प्रामाण्यंउपबृंहणेनजीव्येत। तदेवमुपवासवाक्य
बलारोदोषः। अनेनैवन्यायेनबल्युत्सववाक्यपिथोक्तबलारोदोषउत्प्रेक्षणीयः। नचैवंश्रीहियवादावपिविकल्पो
नस्यादितिवाच्यं। अगत्यातत्रतदाश्रयणात्। तदाहुर्भट्टपादाः। एवमेषोऽदोषोपियहीहियवादावपिसमः। ०विकल्पआश्रितस्तु श्रीगजानन

त्रगतिरन्यानविद्यतेइति। प्रकृतेतुगत्यंतरसंभवान्नविकल्पः। अतोविकल्पासंभवादेकस्यैवप्रतिनियतस्यस्वीकर्तव्येसतिशुक्ल
पक्षस्यैवस्वीकरणंयुक्ततरंमन्यामहे। सासतिबहुतरग्रहसिध्येयुग्मादिवाक्यबलिदिनवाक्यमुपवासवाक्यंचेत्येतान्यनुगृह्णंते।
नह्येतानिकृष्णपक्षविषयतयाकथंचिदपियोजयितुंशक्यंते। तदतुसत्येणहितीयायुतंतेकृष्णपक्षसंविषयत्वेनसंकोचनीयं।
तस्यसामान्यवचनत्वात्। इदंशुक्लकृष्णप्रतिपदःक्रमेणपूर्वोत्तरविधतयाव्यवस्थितेसत्यायद्धितीयायुक्तोनिषेधःअसे० पक्ष
शुक्लपक्षविषयतयायोजनीयं।अथापरःकिंवचनंशुक्लकृष्णपक्षद्वयसाधारणंप्रतिभासेततथापिशुक्लपक्षविषयत्वमेवत
स्यन्याय्यं। संमुख्यमुपजीव्यप्रवृत्तत्वात्। कृष्णपक्षेहितीयायुतायाःप्रतिपदोविमुखत्वात्। अथैवंसतियदाशुक्लपक्षेसामा
हूमात्रंव्याप्नोतिनत्वपरेह्नितत्रेतिथिःप्रसज्येतेतिचेन्नेष्टं। संमुख्यीनामसंहायाहूव्यापिनीतिवचनेनतादृशेविष
येपूर्वतिथेर्विधानात्। अन्यथाहिमूलसाहूव्याप्तेःशुक्लपक्षेपरेपुरेवप्रसज्यतेतिचेन्न। प्रसज्यतांनामपूर्वतिथियुग्म
वाक्यविषयत्वाभावात्। यदाप्यंतरभावास्यात्रिमुहूर्तातोधिकाद्वासायंव्रतिपत्त्रिमुहूर्तातोधिकावाभवति। तादृश्या
एवोभयत्रत्रिमुहूर्तभेदोपेतायास्तिथेस्तद्विषयत्वात्। अन्यत्रिमुहूर्तवैधःसर्वसाधारणोनप्रतिपद्विषयेतिसंकनीयं। वि
शेषवचनाभावेसामान्यस्यस्वीकर्तव्यत्वात्। हितीयायुक्तोपवासनिषेधस्तुपूर्वेद्युःप्रतिपदस्त्रिमुहूर्तभेदेसतिद्रष्टव्यः।
साधाहूव्याप्तिवचनेनत्रिमुहूर्तभेदोनाभिधीयते। आपरस्त्रैकवचनेनतत्तोद्वैधः। तत्रोभयत्रशुक्लप्रतिपत्पूर्वेद्युरुपेत्या ०पक्षो
ष्णप्रतिपत्परेद्युरुदयादूर्ध्वंत्रिमुहूर्तात्ततोधिकाद्वास्यात्। तदासैवोपोष्या। अथैर्धपूर्वेद्युरितिनिर्णयः। यास्तुवचनेपूर्वविद्धाया

शुक्लप्रतिपदि मेदैवेपित्र्येविहितेतयोर्द्वयशब्देनप्रतिपन्निमित्तउपवासोथव्युत्सवश्चेलुभयंविवक्षितं।वचनांतरेभ्यांतयोः शृंगग्राहिकयाविधानात्। अएकादशीतआपञ्चमीअमावास्याचतुर्थिका उपोष्याःपरसंयुक्ताःपराःपूर्वेणसंयुताः।श्रावणीदर्शनवमीतथादूर्वाष्टमीचका। पूर्वाविधानुकर्तव्याद्विगुणत्रिगुणेदिनमिश्रे। श्रवणेऽयुतेमासेयोयंनवरात्रोत्सवः।तदुपक्रमस्यापिपूर्वविद्धाक्रियमाणत्वात्तोपत्रविवक्षणीयइतिचेन्न। तस्यनक्तव्रतस्यैकभक्तनक्तप्रतिपदीष्टीनांदेवलेपिदर्थद्वितीयस्यवक्ष्यमाणत्वात्। चत्रतादीन्यपिचैदेवान्यत्रविवक्ष्यंतामितिशंकनीयं।तेषूदयतिथिग्राह्यस्यबहुभिर्वक्ष्यमाणत्वात्।पित्र्यशब्देनात्रभूताह्नआर्धंविवक्षितं।आपराह्निकीतिनात्रभूताह्नेभिधानात्।आपराह्निकस्वभूताह्नआर्धप्रयोजकमितिवक्ष्यते।एवंतर्हितिथ्यंतरभूताह्नआर्धवदत्रापिप्राप्तत्वात्।पित्र्यंवाभुरत्रवीदितिविशेषविधानमनर्थकमितिचेन्नतदपवादार्थत्वात्। यदापूर्वेद्युरल्पापरेह्नि स्पर्शःपूर्वेद्युर्भूयान्।तदातिथ्यंतरंपुरेद्युरेवभूताह्नआर्धं।प्रतिपदितुतदपवादेनपूर्वेद्युरेवविधीयते।नचपित्र्यशब्देयंकोद्दिष्टविषयतेतिवाच्यं।एकोद्दिष्टादीनांमध्याह्नादिकालेषुविहितलक्षणकर्मकालव्यापिन्यास्तिथेस्तत्रग्रहीतत्वोपपत्तेः।तेचकाठकेतेनदर्शितः।आमश्राद्धंतुपूर्वाह्णेएकोद्दिष्टंतुमध्यतः।पार्वणंचापरह्णेतुप्रातर्दर्शेनिमित्तकमितिमन्वादिरपि।पूर्वाह्णेदैविकंश्राद्धमपराह्णेतुपार्वणं।एकोद्दिष्टंतुमध्याह्नेप्रातर्दर्शेनिमित्तकमिति। दैविकंविश्वामित्रआह दैवानुद्दिश्यक्रियतेयत्तद्दैविकमुच्यते।तन्नित्यश्राद्धवत्कुर्याद्वृद्धयादिषुयतः।तस्मान्नैकोद्दिष्टादिकमत्रविवक्षितं।किंतुभूताह्नआर्धं। अन्यद्यत्किंचित्पार्वणश्राद्धं।अत्रपूर्वविद्धायांशुक्लप्रतिपदिदर्शशब्देनविवक्षितेत्युपवासस्तमुदाहरामः।

पुराणे। हेहस्तपाभिधेव्रतेकार्तिकमासांतदर्शेपायसभोजनादिनियमंविधायेदमुक्तं।ततोमार्गशीर्षेमासिप्रतिपद्यपरेह्नि। एषाशुक्लोपवासेमाहात्म्यंस्मरन्मुच्यतीति।ननुपूर्वविद्धायांशुक्लप्रतिपदियोयमुपवासोविहितस्तस्यसंकल्पःकंप्रातःकार्यःकिंवाप्रतिपत्काले।नाद्यः।अमावास्यावेलायांप्रतिपदुपवाससंकल्पायोगात्। अतएवाथायनः।योयस्यविहितःकालःकर्मणस्तदुपक्रमे।तिथिर्वाभिगतासातुकार्यानोपक्रमाद्भवेतेति। स्मृत्यर्थसारेपुराणे।योयस्यविहितःकालःकर्मणस्तदुपक्रमे।विद्यमानेभवेदंगंसोऽन्येनेकर्मणाखिलमिति।नहितीयः।प्रातःकालस्यैवसंकल्पांगत्वात्।तथाचस्मर्यते। प्रातःसंकल्पमद्दिश्यबहुभ्योऽपवासव्रतादिकमिति।तथातप्रातरारभ्यतिथिमान्कुर्यान्नक्तव्रतादिकं।नापरेह्नेमध्याह्नेपित्र्यकालेगृहीतेस्मृताविति।अत्रोच्यते।यथोक्तवचनबलात्प्रातरेवसंकल्पःकार्यः।तदानींजयेतिःशास्त्रप्रसिद्धप्रतिपदभावेपिस्मृतिभिरापादितायाःप्रतिपदःसत्वात्। अतएवदेवलः।यांतिथिंसमनुप्राप्यउदयंयातिभास्करः।तिथिःसासकलाज्ञेयादानाध्ययनकर्मसिद्धिति। अत्रदानाध्ययनयोरुपवासादिनिमित्तदैवोपलक्षणार्थत्वंविवक्षयाकर्मसिद्धितिबहुवचनंनिर्दिष्टं।अन्यासमयातूर्ध्वमुहूर्तत्रयव्यापिनीतिथिंसमनुप्राप्येतिव्याख्येयं।ननुतर्हितोत्पद्यातिर्विद्धितातासतिद्वयेपाभावेनोत्तरतिथेरवाप्तत्वप्रसंगात्।नत्रिमुहूर्तव्याप्तिःकंदपुराणेदर्शिता। यांतिथिंसमनुप्राप्योदयास्तंपद्मिनीप्रियः।सातिथिस्तद्दिनेज्ञेयादानाध्ययनकर्मसु।त्रिमुहूर्तापिचाभवेदिति। शिवरहस्येसोरपुराणेऽपि। यांप्राप्यास्तमुपैत्यर्कःसावेत्सप्तत्रिमुहूर्तिका।धर्मकृत्येषुसर्वेषुसंपूर्णेतिविदुर्बुधाइति। कृष्णद्वैपायनोपि।यस्यांतिथावुदेष्यामियातस्यांस्युस्त्रिमुहूर्तकैः।दानजपादिकंसर्वंवापक्रमेतितिथिर्मिति। मनुसाधंतनत्रिमुहूर्तंशुक्लप्रतिपदुपनाथांतिथौप्रातरेवसंकल्प्यप्रतिपदुपवासःकर्त्तव्यइति।

युग्मादिवाक्यमाश्रित्य निर्णीतं ततिथिक्षयेतत्रास्तु। साम्यदृश्येस्तुखर्वदर्पवाक्यात्परेह्युरुपवासः प्राप्नोतीति चेत्तत्राह। मैवं। खर्वादिवाक्यस्यैकोद्दिष्टादिविषयत्वात्। तत्राप्यवश्यतः। द्वितीयादिकयुग्मानापूज्यतानियमादिषु। एकोद्दिष्टादिदर्शश्राद्धे ह्रासदृश्यादिचोदनेति। नित्यमादिश्रित्यादिशब्देनपित्र्यकर्मव्यतिरिक्तव्रतोपवासादिसकलकर्मणोग्रहणं। एकोद्दिष्टादित्यादिविवाहादिमंगलांगभूतश्राद्धव्यतिरिक्तपार्वणश्राद्धस्यार्द्धश्राद्धादित्यादिशब्देनमांगलिकश्राद्धस्यह्रासदृश्यादीत्यादिशब्देनखर्वग्रहणं। तदेवं पूर्वेद्युःशुक्लप्रतिपदुपवासकुलापरेद्युःपारणंकुर्यात्। तत्रेदं चिंत्यते। किंप्रातःपारणंकिंवातिथ्यंतइति। नाद्यः। सुमंतुवचनविरोधात्। तिथिनक्षत्रनियमेतिथिभांतेचपारणं। अतोन्यथापारणेतुव्रतभंगमवाप्नुयादिति। नद्वितीयः। देवलवचनविरोधात्। उपवासेषुसर्वेषुपूर्वाह्णेपारणंभवेत्। अन्यथानुफलस्यार्धंधर्ममिवोपसर्पतीति। धर्मोयमः। नाद्यदोषः। खर्वादेर्वाक्यस्यसामान्यरूपत्वेनपरविधोपवासविषयतयासंकोचनीयत्वात्। एतदेवाभिप्रेत्यनिगमःश्रूयते। पूर्वेद्युरथासुतिथिषुभेषुचश्रवणंविना। उपोष्यविधिवत्कुर्यात्तत्तदंतेचपारणमिति। भेषुनक्षत्रेषु। स्कंदपुराणेपितृतिथीनामेववसुवसित्युपवासव्रतादिषु। तिथ्यंतेपारणंकुर्यादिति शिवचतुर्दशीमिति। अत्रोपवासव्रतादिपदंसाद्यशब्देनैकभक्तनक्तायाचितानिगृह्यंते। यातिथिषुदिनेषुता निपूर्वेद्युर्विद्धानिपरेद्युरुत्तातिथिभागतीतिपश्चाद्भोजनंकार्यं। अन्यथापूर्वदिनानुष्ठितैकभक्तव्रतादीनांवैकल्यंस्यादितिअभिप्रायः। अस्यचातिथिभांतपारणस्यापवादःकश्चित्स्मर्यते। तिथ्यंतेचैकभांतेचपारणंत्रचोद्यते। मामत्रयोर्ध्वंवर्तिन्यांप्रातरेवहिपारणमिति। यथोक्तोपवासवद्वृषोत्सवोपिपूर्वविधायाभेवकर्तव्यः। सचोत्सवोत्रत्यपुराणेवामनपुराणेभविष्योत्तरपुराणेचप्रपंचितः। अत्रप्रातःकालेधूतपताकंध्वजपुराणोद्श्रीजजानन

दितं। तस्माद्यूनंत्रकर्तव्यंप्रभातेतत्रमानवेरिति। अथपिप्रातरभ्यास्यावर्तेनेनानुप्रतिपन्नथापिपूर्वोक्तैकैकल्पन्यायेनप्रतिपदःसाकल्यमाश्रित्यद्यूनादिकंप्रातरेवकार्यं। नचुयावेतावुपवासबलुत्सवोद्वौ विधायांप्रतिपदिविहितौतयोःकेनापिनिमित्तेनत्रानुष्ठानासंभवेसतिकिमुनविधोगौणकालत्वेनग्राह्यौकिंवामुख्यकालातिक्रमान्नयोःपरित्यागएव। अत्रकेचिदाहुः। परित्यागएवयुक्तः। मुख्यकालमंतरेणाप्यनुष्ठानेद्वितीयातृतीयादिष्वपितदनुष्ठानप्रसंगात्। अथोच्यते। यथात्रैवर्णिकोपनयनस्यगर्भाष्टमादिमुख्यकालाऽसंभवेसत्याषोडशादिकालोगौणकालत्वेनस्वीकृतः। एवमत्रापितत्स्यात्। नैवमत्रानुष्ठानस्यगौणकालोवाक्यान्नैकः। आषोडशात्पुनर्द्विगुणाद्द्विगुणंसंवत्सरान्तः। अतश्चत्रद्विगुणकालउपनायनिकः। परंतु। नह्येवमत्रानुष्ठानस्यगौणत्वेनस्वीकारेकिंविदूषणमस्ति। अंतरेणापिवचनंयुक्तिमात्रेणतत्कल्पनायांषोडशादिवर्षेभ्यऊर्ध्वमपिसंनिकर्षविप्रकर्षतारतम्येनगौणतरगौणतमानुपनयनकालोप्रसज्येयातां। नचैतेषुकोविचारोनिरर्थकःस्यात्। तस्मात्परित्यागएवेतित्रकेचित्। सत्यंत्रापेयंगवद्युक्तरतिथेःप्राप्तिकाणिवद्यूनिवचनात्। प्रतिपत्सद्वितीयास्यादितिलेकंवचनं। नन्वेतद्यत्रैकविषयंतिरिक्तविषयेमुख्यकालेविहितंतत्रैवगौणकालत्वमितिचेत्। अत्रवक्तव्यं। किमत्रविषयांतरेमुख्यंवानिकंचैं। किंवायत्रैकविषयेकालोभिहितेसतिअर्थादितरविषयंतत्समवचनस्यपरिशेष्यतइति। नाद्यः। तस्मिन्वचनेविषयांतरस्याश्रुतेः। अतीतेः द्वितीमेनुसामान्यवचनस्यविशेषव्यतिरिक्तसंभावितकृत्स्नविषयत्वंपरिशेषणीयं। तथासतिकृष्णप्रतिपद्विषयंतमुपवासंव्यतिरिक्तदान

व्रतादिविषयत्वंचसंभावितत्वाद्यथापरिशिष्यतेतथोपवासेपिगौणकालविषयत्वंकुतोनपरिशिष्यते। द्वितीयायुतोपवासनिषेधा
दितिचेन्नतस्यनिषेधस्यपूर्ववृत्तोपवासप्रशंसायांतात्पर्यात्। अप्रशस्तोवान्येगोमेधेभ्यपशुर्नागोरश्वादूत्रगोरश्वप्रशंसार्थमजादी
नांपशुत्वंनिषिध्यते। ननुसर्वथातन्निषेधःप्रत्यक्षविरोधात्। शास्त्रांतरविरोधाच्च। एवमत्रापुत्तरत्रिभाग्यांप्रतिपदिसर्वथाप्र
तिपदुपवासनिषेधोव्याहन्येत। तस्मादादितनुदितैर्मयान्योन्यनिरेतरप्रशंसयैवनुसर्पेयाहेयत्वार्थी नोचेदुभावपिहोमो
परिसंख्येयामा। यदितत्रशाखाभेदेनव्यवस्था। तर्ह्यत्रापिमुख्यगौणभेदेनव्यवस्थास्तु। अथैतावतातिथेःपूज्यत्वविचारोनिरर्थ
कोभवति। प्रशस्तितिथिस्वीकारेपयोगात्। यानिचान्यानिसामान्यवचनानि। उदयेत्पवासस्यपूर्वाह्णिकास्तुतिश्चयोदेवका
र्मफलप्रदादूतितानिसर्वाणियथाकथंचित्प्रतिपदमुपोद्बलयंतितथागौणप्रतिपदंकुतोनोपोद्बलयेयुः। नन्वेवंसतिद्वितीया
तृतीयादिष्वपिप्रसंगः। गौणप्रतिपत्त्वेस्यत्प्राभावात्। गौणप्रतिपद्येतावतातिनिर्बंधेनकस्यबलाभ्यूतिर्वक्तव्या। तत्रद्वेषेण
वाकेतावलाभ्यूतिवक्तव्यंशिष्टाचारइतिचेत्तत्रिपर्ययएवंतंपश्यामःतथाहि। यदायथोक्तरीत्याकस्याश्चित्तिथेर्द्वैविध्यंभ
वति। तदानींसंप्रतिपन्नाशिष्टेषुकेचनशिष्टाःपूर्वत्रानुतिष्ठंति। अन्यत्रपरत्र। नचतत्राविगीतःशिष्टाचारःप्रमाण
मतरद्वतिवाच्यं। उभयेषांशिष्टानामविगीतत्वकथनायसंप्रतिपत्तेरितिविशेषितत्वात्। एवंतर्हिमुख्यतमध्यन्यतम
स्यनिश्चेतुमशक्यमितिचेत्। यस्मिन्देशेयस्मिन्कालेयेशुशिष्टेषुनीराढंगद्वयस्यस्यप्रामाण्यातिशयस्यबुद्धिः
तदातादृगाचारस्यमुख्यत्वात्। तदेतदेवाभिप्रेत्यगुरोःशिष्यानुशासनंतैत्तिरीयाःसमामनंति। अथयदितेकर्म
विचिकित्सावादृत्तविचिकित्सावास्यात्। येतत्रब्राह्मणाःसमदर्शिनःयुक्तआयुक्ताःअलूक्षाःधर्मकामाःस्युर्यथा श्रीगजानन ३०

तेतत्रवर्तेरन्नथातत्रवर्तेथारुति। युक्तिकुशलायुक्ताःशास्त्रतत्पराः। आयुक्तास्तदर्थानुष्ठाननिरताः। अलूक्षाःक्रोधादिवर्जिताः। धर्म
कामानीदृशायुक्तवदयुक्तवत्कर्मण्योदासीन्यमकुर्वाणाः। उक्तरीत्याकस्यचित्तिथेर्विशिष्टाचारविशिष्टस्यमुख्यत्वेसतिपरे
गौणाभविष्यंतिनतुसर्वथैवानाचाराः। एवंचसत्येकशेषेतैत्तिरीयशाखाध्यायिनापस्तंबमतभेदेनपरस्परविलक्षण
माचरतामुभयविधानांमध्येप्राणांस्वस्वपूर्वपुरुषपारंपर्यक्रमायातएकाचारोमुख्यः। कदाचित्तदसंभवेमानांतरेणाथ
नुष्ठानमेवश्रेयोनतुसर्वथातल्लोपएवयुक्तः। किंबहुनामुख्यायाःपूर्वविधायाःप्रतिपदोऽसंभवेविशेषेपरित्यागाद्दूरेनुत्तर
विधायाःपरित्यहणमित्यवगंतव्यं। तदेवंशुक्लप्रतिपदुपवासबल्युत्सवयोःपूर्वविद्धमुख्येतिन्यवस्थितं॥ ॥ग्रंथैकभक्त
निर्णयः। अस्मपुराणवेद्यव्रतेपक्षते॥ ॥प्रतिपदेकभक्तकाश्रीसमास्तेकपिलाप्रदइति। तत्रादावेकभक्तंत्रिविधं। स्वतंत्रमन्यां
गमुपवासप्रतिनिधिरूपंचेति। तत्रेदानींप्रदाहृतंस्वतंत्रं। तदेवेचिंत्यते। किमुपवासवन्निशिरात्रिग्राह्यंतथाऽतत्रकारंत
रेणेति। उपवासवदितितावत्प्राप्तं। दिवंपित्रंतआकार्यमितिवचनेनउपवासेकभक्तादिकस्यनदेवस्यविवक्षितत्वात्। नचक
र्मकालव्याप्तानिर्णयइतिशंकनीयं। तत्कालस्यायाव्याप्तिनिर्णेतत्वात्। कथंचित्तन्निर्णयेपिकर्मकालव्याप्तिवचनस्यापित्र्य
विषयत्वेनाप्युपपत्तेः। तस्मादुपवासवत्तान्निर्णयइतिप्राप्तेब्रूमः। कर्मकालव्याप्तिरेवात्रनिर्णयहेतुः। कर्मकालस्तत्कर्म
स्वरूपंचेत्युभयंस्कंदपुराणेदर्शितं। दिनार्धस्पर्शेयेतीतेभुंजतेनियमेनयत्। एकभक्तमितिप्रोक्तंमूनद्व्यास्त्रयेणवेति।
अत्रचदिनार्धस्योपरिसार्धमुहूर्तपरिमितःकालःपंचधाविभाग्येमध्याह्नस्यापरभागएकभक्तस्यमुख्यःकालः। दिनार्धेती
तेसतितिसमनंतरभाविनात्। अस्तमयात्प्राचीनोपासंध्यागौणकालोदिवेत्यभ्यनुज्ञानात्। एवंस्थितेसतिमुख्यकालव्यापिनी

मतस्तत्स्यादितिवैयाह। देवस्त्वेवं। दिनार्धसमयेतीतेभुंजतेनियमेनयत्। एकभक्तमितिप्रोक्तं ३

तिथिर्ग्रहीतव्या। अतएवपद्मपुराणंमध्याह्नव्यापिनीग्राह्याएकभक्तेसदातिथिरिति। वो धात्रेयो पि।उदये तूपवासस्यनक्तस्यास्तमयेतिथिः। एकभक्त
मध्याह्नव्यापिनीग्राह्याएकभक्तेसदातिथिरिति।नक्तमात्रेपवासेन्यायेनोक्तः।तत्रपूर्वविद्धायामेवविशेषशास्त्रपर्यवसानात्।द्विविधंहि
विशेषशास्त्रं तिथिप्रयुक्तमेकंकर्मप्रयुक्तमपरं।तत्राद्यौर्वाह्णिकस्तुतिश्चमोदेवद्वत्तेनैककर्मविधयेणसामान्यशास्त्रेणोत्तरविद्धा
मांप्राप्तायामुपोष्याःपरसंयुताःपराःपूर्वेणसंयुताइत्यनेनैकं कर्मविधयेणविशेषशास्त्रेणपूर्वविद्धाविहिता।तिथिद्वितीयेऽपिसा
मान्यविशेषशास्त्रेउदाहृियेन्ते।पूर्वाह्णिकस्तुतिश्चयइतिअत्रमात्रमुपजीव्यप्रवृत्तत्वात्सामान्यशास्त्रंत्रयोदशीसंयुक्तपरं।
येसेतद्द्वितीयशास्त्रं।तथासतिद्वितीयेनापिविशेषशास्त्रेणपूर्वविद्धायामेवोपवासःसुस्थितः।अत्रत्रयोदशीमध्याह्नव्यापिनीति
श्चिरिसेतत्कर्मविशेषविषयशास्त्रं।अतस्तदनुसारेणनिर्णयोयुज्यते।ननुप्रतिपत्संयुक्तस्वीकार्यत्वेननतिथिविषयेणविशे
षशास्त्रेणकुतोनानिर्णयइतिचेत्।उपवासविषयत्वेनापितस्योपपत्तेरितिक्रूमः।ननुमध्याह्नव्यापीवचनमपितिथ्यंतरेकस्मिन्
विषयत्वेनोपपादयितुंशक्यमतःकर्मविशेषशास्त्रतिथिविशेषशास्त्रयोःसमानबलत्वमितिचेन्न।अस्मन्नाभकिंचिन्नि
मंअतःकर्मविशेषशास्त्रंमध्याह्नव्यापित्वस्यपूर्वविद्धायांसंपादयितुंशक्यत्वेतिविशेषाभावात्।तदानुत्तरत्र
विद्धायामेवमध्याह्नव्यापित्वंतदाविरोधइतिचेन्न।तथापितिथिविषयविशेषशास्त्रात्[illegible]विशेषशास्त्रबल
तिथिगुणत्वात्कर्मणश्चप्रधानत्वात्।तस्मादेवंविधेविषयेकर्मकालव्याप्त्येवनिर्णेतव्यं।अत्रनिर्णेतव्योविषयःकाढा।नि
र्घते।पूर्वेद्युरेवमध्याह्नव्यापित्वं।परेद्युरेवतद्व्यापित्वं।उभयत्रतद्व्यापित्वं।उभयत्रसाम्येनतदेकदेशव्यापित्वं।उभयत्रपे
क्षयेणतदेकदेशव्यापित्वंचेति।तत्रत्रयमद्वितीययोःमध्याह्नव्यापित्वस्यनिर्णायकत्वं।तृतीयेपूर्वविद्धाकार्या।मुख्यकाळश्रीगजानन

व्याप्तेःसमत्वेपिगौणकालव्याप्तेरधिकत्वात्।अनेनैवन्यायेनोभयत्रमुख्यकालव्याप्तभावेपिगौणकालव्याप्तिलाभात्पूर्वविद्धैवग्राह्या
थमेवन्यायोयोज्यः।यष्ठेतुमदाहरेद्युर्मध्याह्नैकदेशमधिकंव्याप्नोतितदागौणकालव्याप्तेश्चपूर्वेद्युर्ग्राह्या।यदा
परेद्युर्मध्याह्नैकदेशमधिकंव्याप्नोतितदागौणकालव्याप्तभावेपिमुख्यकालव्याप्त्याधिक्यात्तुसोरेणपरेद्युर्ग्राह्या।अन्यस्त्वेवं
स्वतंत्रैकभक्तेनिर्णयः।अन्यांगेतुकथंतत्रकालोपपत्तिरितिचेदुच्यते।पूजाव्रतेषुसर्वत्रमध्याह्नव्यापिनीतिश्रिरिति।मध्या
ह्नेपूजयेन्नरेत्यादिशास्त्रैरंगिनपूजादेर्मध्याह्नेविहितत्वेनांगस्यैकभक्तस्यापरह्णादौप्राप्यमाणत्वात्।ननुमुख्यकालसंभवः।
माभूत्तादृग्विधेमुख्यकालः।प्रधानानुसारेणगुणस्यनेतव्यत्वात्।यदास्वतंत्रैकभक्तेपिकेनचिन्निमित्तेनमुख्यकाला
संभवेगौडकालोभ्यनुज्ञायतेतदाकिमुक्तव्यमन्यांगे।मूलोपवासप्रतिनिधीरूपमेकभक्तंतदुपवासतिथौकार्यं।तस्यगौणो
पवासत्वात्।अतएवसुमंतुः।तिथौयत्रोपवासःस्यादेकभक्तेविसातथेति।नचतादृशमेवनास्तीतिवाच्यं।कृच्छ्रेषुपवासव्रतं
प्रकम्यरोगादिनातदशक्तौसत्यामनुज्ञयातस्यैकभक्तस्वसंभवितत्वात्।अशक्तोनाम्यव्रतान्यानिआपोमूलंफलंपयः।हविर्ब्राह्मण
काम्यानुपुरोवचनमेणधामितिशास्त्रात्॥ ॥इतिएकभक्तेनिर्णयः॥ ॥अथनक्तंनिर्णीयते।तत्रमत्स्यपुराणे भान्यत्रतेषुव्र
ते।मार्गशीर्षसितेपक्षेव्रतिपद्यातिथिर्भवेत्।तस्यांनक्तंप्रकुर्वीतनरोविष्णुप्रभुज्ञयेदिति।अत्रनक्तशब्दोभोजनपरः
कालपरस्तेनप्रकृष्टेतेतस्यानन्वयप्रसंगात्।नहिकालःकेनचित्कर्तुंशक्यते।तस्मात्भोजनस्मरत्रात्रिकालविधिः।अतो
दिवाभोजनरहितेसतिरात्रिभोजनव्रतस्यस्वरूपं।अन्यथास्वतःप्राप्तस्यरात्रिभोजनस्यविधानेवैयर्थ्यात्।तस्यचनक्त

भोजनस्थविष्णुपूजनमंगं। तत्सन्निधौपठितत्वात्। तथाहेमाद्रेपितदंगं। होमंचतत्रकुर्वीतेत्यभिधानात्। एवंचसतिप्रधानाविरोधेनपूजा होममोरंगयोर्दिनानुष्ठानमुक्तंभवति। प्रधानस्यचनक्तस्यकालद्वयंभविष्यपुराणेदर्शितं। मुहूर्तोनिंदिननक्तंप्रवदंतिमनीषिणः। न क्षत्रदर्शनान्नक्तमहंमन्येगणाधिपेति। अस्यचकालद्वयस्याधिकारिभेदेनव्यवस्थामाहदेवलः। नक्षत्रदर्शनान्नक्तंगृहस्थस्य बुधैःस्मृतं। मतंदिनाष्टमेभागेतस्यरात्रेर्निषिध्यतइति। स्मृत्यंतरेपि। नक्तंनिशायांकुर्वीतगृहस्थोविधिसंयुतः। यतिश्चविध वाचेवकुर्यान्नत्सदिवाकरं। सदिवाकरंनुतत्प्रोक्तंअंतिमेघटिकाद्वये। निशानक्तंतुविज्ञेयंमध्यमार्धप्रथमेसदति। रात्रिभोजन नेत्रासः। त्रिमुहूर्तप्रदोषस्यपूर्वानावस्तंगतेसति। नक्तंतुतत्रकर्तव्यमितिशंखस्यनिश्चयइति। तदेवंनक्तकालोभवस्थितेो। तत्रनक्तंप्रदोषव्यापिन्यांतथैोकार्यं। तदाहवत्सः। प्रदोषव्यापिनीग्राह्यातिथिर्नक्तव्रतेसदा। एकादशीविनासर्वाशुक्लेकृष्णेत थास्मृतेति। एकादश्यांतुयन्नक्तंतत्रोदयव्यापिनीतिथिर्ग्राह्या। तदुक्तंस्कांदपुराणे। प्रदोषव्यापिनीग्राह्यासदानक्तव्रतेतति थिः। उदयस्थासदापूज्याहरिनक्तव्रतेतिथिरिति। अत्रापिएकभक्तन्यायेनशेष। विनयभेदाउल्लेक्षणीयाः। मध्याह्नप्रदो षवेरेवभिन्नत्वात्। पूर्वेद्युरेवप्रदोषव्याप्तौपूर्वतिथिर्ग्राह्या। परेद्युरेवत्रप्रदोषव्याप्तौपरतिथिः। उभयत्रप्रदोषव्याप्तौ परतिथिरेवतदाहजाबालिः। सदेवतिथ्योरुभयोःप्रदोषव्यापिनीतिथिः। तत्रोत्तरत्रनक्तंस्यादुभयत्रापिसायंतइति। उ भयत्रापिस्तातिथ्यविधेयतयतूक्तार्थः। उभयत्रप्रदोषव्याप्त्यभावेपिपरेरेव। तदाहजाबालिः। अतआलेपरत्रस्यादस्याद वग्न्यतेाहिसेति। प्रदोषेतदभावेप्यस्तमयादर्वाग्यतः साविधेतदतः साग्राह्येसर्थः। अस्यचदिवात्रत्रतेनप्रदोषव्या

प्तिवत्सायंकालव्याप्तिरपिनिर्णयेहं. तुर्भवतीतिश्रवणेनाभिप्रायेणार्वागस्तमयादित्युक्तं। दिवारात्रिव्रतंचकूर्मपुराणेभिहितं। प्रदोष व्यापिनीग्राह्यात्रिमुहूर्तोर्ध्वदादिवा। तदानक्तव्रतेकुर्यात्सर्वाधारस्यनिषेधवदिति। यद्यप्यत्रप्रदोषकालःसायंकालोदूरेवभ्रमोजनेको प्रतिभासेतेनतथापिप्रदोषव्याप्तिर्मुख्यःकल्पः। सायंकालव्याप्तिरनुकल्पइतिजाबालिवचनादवगम्यते। तत्रयत्तथाहइतिप्रदो षव्याप्तभावमनूद्यतादृशास्तिथ्रेग्राह्यत्वंवार्गस्तमयादितिहेत्वपन्यासात्। दूरेएवविधेयंगृहस्थेपिभवतिवदिनानक्तमाच रेत्। तदुक्तंस्कंदपुराणे। प्रदोषव्यापिनीनित्यंदिवानक्तंविधीयते। दूरेआमंत्रणंश्राद्धंभोजनंहिगुणोत्तमा। अतिक्रामतिभास्करे। तन्नक्तंनक्त मित्याहुर्नक्तंनिशिभोजनं। एवंशास्त्रांततोविद्वान्सायाह्नेतुभुंजिक्रियां। कुर्याच्चक्तव्रतीनक्तफलंभवतिनिश्चितमिति। अनु सप्तमीभानुवासरादौसोरनक्तविहितंतत्रपूर्वोक्तविपर्यासः। नसायंकालव्याप्तिर्मुख्यःकल्पः। एतदेवाभिप्रेत्यसुमंतुः। त्रिमु हूर्तेस्थितेरात्रौनिशिवैनावतीतिथिः। तस्यांसोरंभवेन्नक्तमहन्येवतुभोजनमिति। अतसायंशब्दस्यमुख्यकालस्वेत्वात्प्रथम तानिर्देशः। प्रदोषव्याप्तेरनुकल्पत्वात्पश्चान्निर्देशः। इतरेतुप्रदोषव्याप्तेर्मुख्यत्वादुदाहृतकूर्मपुराणवचनेसैवप्रथमंनि र्दिष्टासायंकालव्याप्तिः। पश्चान्निर्दिष्टेतिविवेकृः। तेषांतुतत्रनक्तंपुप्रदोषव्याप्तितिथिग्रहणेपिभानुवासरसंक्रांत्यादिनाग हस्थस्यापिवदारात्रिभोजननिषेधः। तदाहदेवलेनैवनक्तंकुर्वंति। तथाचभविष्योत्तरपुराणे। श्रेतादित्यदिनंप्रतमन्नंकुर्वंति मानवाः। दिनांतेतेपिभुंजीरन्निषेधाद्रात्रिभोजनेरतेति। अस्मिंश्चदिवाभोजनेउक्तोभो तिमुहूर्तोमध्यमउपांत्यांततः प्राचीनोऽर्धन्यः। एवंचसतितिमभागत्रिमुहूर्तवचनानुपपद्यते। रात्रिभोजनेपिघटिकात्रयमुक्तमः कालः। घटिका षट्कंमध्यमः कालः। एतदेवाभिप्रेतवचनंस्मर्यते। प्रदोषेस्तमयादूर्ध्वंघटिकात्रयमिष्यतेइति। त्रिमुहूर्तःप्रदोषःस्यात्र

वावस्तंगतेसतीति। निशीथपर्यंतोऽपराह्णः कालः। नक्तंप्रकुर्वीतत्रावितिसामान्येनाभिधानात्। अस्तेरनक्तेषु सामान्येनवैगम्येण
वादिनदूषेप्रदोषैकव्याप्तेपरेद्युरेवनक्तंकार्यं। सायंकालस्यगौणस्यतिथिव्याप्तत्वात्। अत्रत्र्येकभक्तवदन्यागानक्तोपवासस्था
नेभिनक्तयोर्निर्णयोद्रष्टव्यः। यथोक्तलक्षणलक्षितयोरेकभक्तनक्तयोरेकस्मिन्दिनेयदाप्राप्तिस्तदाकर्तव्यं। नचेता
दृशीप्राप्तिरेवनास्तीतिशंकनीयं। भविष्योत्तरपुराणोक्तरक्षाघ्नव्रतेकदाचित्तत्प्राप्तेः। तथाहि। तत्रात्तृतीयादिषु सप्त
म्यंतेषुपंचसुदिनेषुक्रमेणैकभक्तनक्तयाचितोपवासपारणानिविहितानि। अत्रयदात्तृतीयायामत्रपरिमितातत्तऊर्ध्वं
चतुर्थ्यंतदामध्याह्नव्यापिन्यांचतुर्थ्यामेकभक्तंतत्रप्राप्तंप्रदोषव्यापिन्यांचतुर्थ्यांनक्तमपितत्रैवतत्रास्तिपरस्परविरोधादुभय
विरहः। अत्रोच्यते। एकभक्तस्यप्राधम्यात्तत्रबलवत्तस्मिन्मुख्यकालएवानुष्ठेयंतद्विरोधिनितुनक्तेगुणकल्पः। सचद्विवि
धः। दिनांतरानुष्ठानात्तत्रैवानुष्ठानाच्च। यदाचतुर्थ्यांपरेद्युरध्यास्तमयंकालंव्याप्नोतितदास्यगौणकालस्यासंभवे
नपूर्वेद्युरेवभार्यापुत्रादिनाकर्तव्यंतत्रैवनक्तंकरणीयं॥ ॥इतिनक्तनिर्णयः॥ ॥अथायाचितंनिर्ण्रियते॥ "एवंदाह
तेसप्तमीव्रतेपंचम्यामयाचितंविहितं। तत्रैकभक्तवत्प्रतिपदाकालविशेषविधिर्नास्ति। तस्मायाचितभोजननि
मंधरूपत्वात्। सचनिषेधउपवासवदहोरात्रंविषयीकरोति। अतएवसंकल्पोप्यस्मिन्नहोरात्रेयाचितमन्नंनभोक्ष्यइ
त्येवंकर्तव्यः। अथायाचितादन्यदयाचितमित्यत्रयत्नलभ्यस्परद्रव्यस्यभोजनंविवक्ष्यतेतदाप्यधीनत्वादेवन
तस्यकालविशेषोविधातुंशक्यते। यद्यपिस्वगेहपूर्वंसंचितंवस्तुइदानीमयाचितंभवतितथापिप्रयत्नेसंपादि ३३
तत्वाद्याचितंभव। अथवानिषेधस्यत्रसंज्ञिपूर्वकत्वायाप्राप्तेश्चपरद्रव्यविषयत्वादयाचितशब्देपिपरद्रव्यमेवश्रीगज्ञानन

आपिलादेकएवकर्तृभेदेनव्रतद्वयमनुतिष्ठेत्। यदाचतुर्थ्यांसमाप्तीनावातदागौणकालः ७

म्यानुनाष्टमी सर्वेषुव्रतकल्पेषु। अष्टमीपरतःशुभेति। पद्मपुराणे। नाष्टमीसप्तमीयुक्तासप्तमीनाष्टमीयुता। नवम्यासस
हकार्यास्यादष्टमीनात्रसंशयइति। स्कंदपुराणेपि। अष्टमीनवमीमिश्राकर्तव्याभूतिमिच्छता। सप्तम्याचाष्टमीचैवन
कर्तव्याहिकुविध्वजेति। अन्येतानिव्रतवैवतादिवचनानियद्यपिपक्षद्वयसाधारणेनपूर्वविद्धानिषेधमुत्तरविद्धाविधिं
बाधंते। तथाह्युदाहृतनिगमानुसारेणशुक्लपक्षविषयतयायोजनीयानि। तथाचशुक्लपक्षाभिप्रायेणैवपूर्वविद्धां
प्रतिषेधतिजाबालिः। नागविद्धानुनाष्टमीभानुविद्धानवमीश्वरः। चतुर्दशीकामविद्धातिस्रस्तामलिनाः स्मृताइति। स्कंद
पुराणेपि। नागविद्धानुनाष्टमीसप्तम्यानुयदाष्टमी। मूलविद्धाप्यमावास्यानग्राह्यानुनिगंगवेति। तथाचशुक्लपक्षमेवा
भिप्रेत्योत्तरविद्धाविधीयते। विष्णुधर्मोत्तरेपि। एकादश्यष्टमीषष्ठीद्वितीयाचतुर्दशी अमावास्यातृतीयाचताउपोष्या
पराःचिंताइति। शंकरगीतायां। साक्षादेवशुक्लपक्षेपरविद्धाविहिता। एकादश्यष्टमीषष्ठीशुक्लपक्षेचतुर्दशी। एताः
परेणसंयुक्ताःपराःपूर्वेणसंयुताइति। कृष्णपक्षेपूर्वविद्धानुकर्तव्यापरविद्धानकर्हिचित्। उपवासादिकार्येषुह्येष
धर्मःसनातनइति। नारदीये। कृष्णाष्टमीतथारंभात्तृतीयावटपैतृकी। दृष्टोत्पातश्चात्रस्नानदानकर्मोपवासंमुखीतिथि

२ पूर्वविद्धाविधिउत्तरबाधाविधिश्चानिगमेचदृष्टे। कृष्णपक्षेष्टमीयत्रकृष्णपक्षेचतुर्दशी।

रिति। अत्राष्टम्याः शुक्लकृष्णान्यवस्थासामान्येनसर्वव्रतविषया। व्रतविशेषस्यानुपादानात्। [illegible] निबोधादृश्यंते। तत्रवामनपु अष्टमी
राणे। नभोमासेकृष्णाष्टम्यां कार्ष्णाष्टमीव्रतंपठितं। विष्णुधर्मोत्तरेकृष्णपक्षेसंज्ञानाष्टमीव्रतं। एतदुभयंयथोक्तलक्षणायुक्तायां
शास्त्रामनुष्ठेयं। देवीपुराणेश्रावणमासेशुक्लाष्टम्यांदुर्गाव्रतं। गारुडपुराणे। शुक्लाष्टम्यांतुसिंहव्रतंएतदुभयमुत्तरविद्धा
यामनुष्ठेयं। एवमन्यान्यप्युदाहरणीयानि। व्रतविशेषादष्टमीनिर्णयोद्विविधः। व्रतविशेषमात्रोपजीवनेनप्रवृत्ते
कर्मणित्रादिशेषांगंव्रतविशेषंचोपजीव्यप्रवृत्तोपरः। तत्रदुर्गाष्टमीसंज्ञितः कश्चिद्व्रतविशेषोभविष्यत्पुराणेपठ्यते। अत्र
नभाद्रमदेमासिशुक्लाष्टम्यामुपोषितः। महिषंहत्वाजयेद्यस्तुदुर्गयासहितंभुनेदुर्गेति। अस्मिन्व्रतविशेषशुक्लपक्षवर्तिसे
नोत्तरविद्धायांप्रशस्तायामपवादमाह। नारदः। धन्याकृष्णाष्टमीदुर्गासावित्रीवृद्धिपुत्रिका। अंगंत्रयोदशीरंभाकर्ते
यासंमुखीतिथिरिति। कल्पपुराणे। श्रावणेदुर्गानवमीतथादुर्गाष्टमीव्रया। पूर्वविद्धैवकर्तव्याशिवरात्रिर्बलेर्दिनमि
शिव ति। तथाऽत्रकिंमहोत्सवोनामकःकश्चिद्व्रतविशेषः। तस्यपूर्वेद्युर्न्यायेनशुक्लकृष्णपक्षयवस्थायांप्राप्तायांतदपवादः
पद्मपुराणेपठ्यते। अष्टमीनवमीविद्धानवम्याचाष्टमीयुता। अर्धनारीश्वरप्रायाउमामाहेश्वरीतिभिः। अष्टमीन
वमीयुग्मंमहोत्साहमहोत्सवः शिवशक्त्योः शिवक्षेत्रपक्षयोरुभयोरपीति। महान्उत्साहोयस्मिन्नितिबहुव्रीहिः।
तत्यदितिअयुग्मस्यक्षेत्रस्यविशेषणं। यदायुग्मस्यविशेषणंतदातादृशंयुग्ममुपलभ्यसूर्यग्रहणोक्तदोषादविद्ध
मनस्युत्साहंप्राप्यदेवतोत्सवः कर्तव्यइत्युक्तंभवति। नक्षत्रादियोगिव्रतविशेषोपजीवीतीर्णयउदाहृतः। स्कंदपु
×राणेव्रत

DR BHAU DAJI
श्रीगजानन

विशेषःपठ्यते। मासिभाद्रपदेशुक्लेपक्षेज्येष्ठर्क्षसंयुते। यस्मिंकस्मिन्दिनेकुर्याज्ज्येष्ठायाःपरिपूजनमिति। नत्वज्येष्ठात्रतस्यनक्षत्र
योगवशेनाष्टमीग्रहीतव्या। नाष्टमीसहमीविद्धासप्तमीवाष्टमीयुता। नवम्यासहकार्यास्मादष्टमीनात्रसंशयः। मासिभाद्रप
देशुक्लपक्षेज्येष्ठर्क्षसंयुता। रात्रियेस्मिन्दिनेकुर्याज्ज्येष्ठायाःपरिपूजनमिति। अयमर्थः। अष्टम्यानक्षत्रयोगाभावेशुक्लपक्षव
र्तिन्यांरेवाष्टमीग्राह्या। यदातुपूर्वदिनेरात्रौनक्षत्रयोगोस्तितदाद्वैविध्याद्ग्राह्या। सोयंशुक्लपक्षप्रयुक्तस्यसामान्यशास्त्र
स्यनक्षत्रप्रयुक्तविशेषशास्त्रेणापवादइति। योमंपूर्वदिनेरात्रौनक्षत्रयोगः सापिकश्चिदपोद्यते। तत्रैव स्कंदपुराणे॥
यस्मिन्दिनेभवेज्ज्येष्ठामध्याह्नादूर्ध्वमप्यणुः। तस्मिन्हविर्ध्रुवंग्राह्यंवर्जयेत्पूर्ववासरमिति। अत्रकेवलतिथिनानक्षत्रयो
गस्यत्रएतत्लोकेवलतिथिप्रयुक्तंनिर्णयमुपोद्घात्यतथानक्षत्रप्रयुक्तोनिर्णयआदृतः। तत्रानक्षत्रप्रयुक्तेतिश्रीवारविशे
षयोगस्यप्रशस्तत्वात्तेननिर्णयंकर्तव्यः। एतदेवाभिप्रेत्यस्कंदपुराणेपठ्यते। नाभोष्टम्यांयदावारैर्भानोर्जेष्ठर्क्षमेववा। मीनस्थेनरवौस्नात्वा
रुजेष्ठेतिसापोक्तादुर्लभाबहुकालिकेति। तदेवंत्रिधानिर्णयः संपन्नः। तत्रसिंहव्रतसंज्ञानाष्टमीव्रतादेःशुक्लकृष्णभेदेनति
र्णयः। दुर्गाष्टम्यांव्रतविशेषेणनिर्णयः। नीलजेष्ठाष्टम्यांयोगविशेषेणनिर्णयइति। तदेवमत्रत्रिर्णयत्रयंदृष्ट्वाती कृत्यत्र
माष्टमीविचार्यते॥ ॥सा किंपक्षपदेननिर्णेतव्या। उतव्रतविशेषेण। आहोस्वित्तद्योगविशेषेणेति। अत्रैवंदमपरंचिंत्यते
किंजन्माष्टमीव्रतमेवज्ञांतीव्रतं तत्तन्मासभेदइति। तत्रापिचिंतनीयं किंतेभ्यंतरवत्राहुर्वधः। उतमध्यरात्रवे
धइति। प्रथमंव्रतस्वरूपेनिश्चितेपश्चात्तदंगमंत्रतेकीदृशीतिभिरित्याकांक्षोदेति। तिथौवर्तमानेविधिलिनपरविध
लेनवानिश्चितायांपश्चात्कीदृशेवेधवत्याकांक्षायांतस्मात्तदोव्रतंनिश्चीयते। तत्रजन्माष्टमीजयंती [illegible] शब्दाभ्यांअव

क्रियमाणमेकमेवेति तावत्प्राप्तं। कुतः रूपभेदाभावात्। कामाग्स्यद्रव्यदेवतारूपं। यथा षोपासनस्यगुणविशेषैर्युक्तादेवता। यथा चतस्रविद्याया वेद्यंतत्संरूपं नाश्रयते नियमविशेषः स्वरूपंनियमश्रौत्रोपनासजागरणंकृष्णरुद्रार्घ्यदानमित्यादिलक्षणः। सचोभयत्रनभिद्यते। अथेतेषांरूपाभेदेपिक्रियाभेदोपिवभेदोभविष्यति। मित्याजन्माष्टमीव्रतकरणेप्रत्यवायस्मरणात्। तथाच स्मर्यते। ॐ प्रभासंसरवरंपुण्यंकाकंसावटिपदाभुक्तंकृष्णजन्माष्टमीदिने। नन्माष्टमीदिनेप्राप्तेयेनभुक्तंहिजोत्तम। श्येनंचमुनि सत्तम। त्रैलोक्यसंभवंपापंतेनभुक्तंहिजोत्तमेति। भविष्यत्पुराणे। श्रावणेबहुलेपक्षेकृष्णजन्माष्टमीव्रतं। नकरोतिनरोयस्तुभव तिक्रूरराक्षसः। कृष्णजन्माष्टमीसक्तामोन्यद्व्रतमुपासते। नामोतिसुकृतंकिंचिदिष्टापूर्तमथापिवा। वर्षेवर्षेतुयानारीकृष्णजन्मा ष्टमीव्रतं। नकरोतिमहाप्राज्ञबालीभवतिकानने। स्कंदपुराणेपि। येनकुर्वंतिजागंतःकृष्णजन्माष्टमीव्रतं। तेभवंतिनराप्राज्ञ व्याघ्राश्चकानने। रटंतीहपुराणानिभूयोभूयोमहामुने। अतीतानागतंतेनकुलमेकोत्तरंशतं। पातितंनरकंघोरं भुंजन्त कृष्णावारंवारं। जयंतीव्रतकाम्याफलविशेषस्मरणात्। विष्णुधर्मोत्तरेहिजयंतीव्रतकल्पउक्तः। यद्वा योयज्ञकोमारेयौवने वार्धकेतथा। बहुजन्मकृतंपापंतिसापोहतिनाशयेत्। बहुपुराणेपि। सप्तजन्मकृतंपापंराजन्यत्रविधंत्यजेत्। तत् क्षालयतिगोविंदस्तिथौतस्यांसमर्चितः। उपवासश्चतत्रोक्तोमहापातकनाशनः। जयंतीजगतीपालविधिनानात्रसंशय यइति। पद्मपुराणेपि। प्रेतयोनिगतानांतुप्रेतत्वंनाशयेत्तमरैः। मैः कृताश्रावणेमासेअष्टमीरोहिणीयुता। किंपुनर्बुधवारेण सोमेनापिविशेषतइति। स्कंदपुराणेपि। भजेहायार्थकुरुतांजयंतीमुक्तयेनघ। धर्मार्थकामंमोक्षंचमुनिपुंग व। ददातिवांछितानर्थान्नानार्जनातिदुर्बलमिति। भविष्योत्तरेजयंतीकल्पे। प्रतिवर्षविधानेनमद्भक्तो धर्मनंदन। नरोवाय ५१ श्रीगणानन

दिवानारीवभोनफलमाप्नुयात्। पुत्रसंतानमोक्षंयंसोभाग्यमतुलंभवेत्। इहधर्मरतिर्भुक्त्वेतेवैकुंठमाप्नुयादिति। एवंजन्माष्टम्या श्र करणेप्रत्यवायाज्जयंत्याःफलविशेषाच्चोभयोःक्रमेणनित्यत्वंकाम्यत्वंचाभ्युपेयमिति। तत्रैवं। गुणफलाधिकारत्वाभ्युपगमेपिजय ंत्याःफलविशेषोपपत्तेः। क्षीरोहनदध्यादितत्रदृष्टांतः। यमसेनापः प्रणयेद्गोदोहनेनपशुकामस्येतिनित्ययोर्दर्शपूर्णमासयोरप ि प्रणयनंविधायतदेवाग्नित्वपशुफलायगोदोहमात्रंविहितं। दर्भैरियकामस्येतत्रचरुंश्रपयतेतिकामनेतिविशेषेणविहितंदर्भैरियं। वि एवंजन्माष्टमीमाश्रित्यफलविशेषायजयंतीनामकोरोहिणीयोगोविधीयतां। सचरोहिणीलक्षणस्यकालविशेषस्यानुपादेयत्वा दविधेयत्वंशंकनीयं। कालविशेषस्यस्वरूपेणपुरुषैरनुत्पाद्यत्वेप्यनुष्ठानागतत्वंशङ्क्षणावगत्यानुष्ठानायतत्प्रतीक्षायाःकर्तृ स्थत्वात्। अन्यथाषडसंतेवसंतेज्योतिषायंजेतेसादिकःसर्वोपिकालविधिर्लुप्येत। रोहिणीयोगस्यजयंतीनामकत्वंजयंतीलक्ष णसामर्थ्यात्प्रतिपाद्यतेः स्मृतिवाक्येरध्यवसेयं। तानिचवाक्यान्युदाहरामः। विष्णुधर्मोत्तरेहि. णीचयदाकृष्णपक्षेष्टम्यां हिजोत्तम। जयंतीनामसाप्रोक्तासर्वपापहरातिथिरिति। समत्कुमारसंहितायां। शृणुष्वावहितोराजन्कथ्यमानंमयाधुन श्रावणस्यचमासस्यकृष्णाष्टम्यांनराधिप। रोहिणीचदिलभ्येतजयंतीनामसातिथिरिति। स्कांदे। प्राजापत्येनसंयुक्ताअष्टमी तुयदाभवेत्। श्रावणेबहुलेसातुसर्वपापप्रणाशिनी। जयंपुण्यंचकुरुतेजयांपुण्यंचतांविदुरिति। विष्णुरहस्ये। अष्टमीकृष्ण पक्षस्यरोहिणीक्षसंयुता। भवेत्तोषपदंमासिजयंतीनामसाप्रभो। पौर्णमास्यंतेषुमासेषुस्वीकृतेषुश्रावण्यांपूर्णिमा श्रावण यांतुकर्मासस्यसमाप्तिलादुपरितनीप्रतिपदमारभ्यभाद्रपदमासस्यसमिप्रेतत्रौष्ठपदइत्युक्तं। विष्णुधर्मोत्तरे। प्राजाप त्यर्क्षसंयुक्ताकृष्णानभसिवाष्टमी। सोपवासोहरेःपूजांतत्रकृत्वानसीदतीति। वसिष्ठसंहितायां। श्रावणेवानभस्येवारोहिणी

ध्रुवं। तत्र मोरभाषे योगस्यास्मिन्वर्षेन संभवतीति। अत्र श्रावणद्वितीयमुख्यः कल्पः। यदि वा श्रावणे भद्रदिवानभस्ये सर्वथापि रोहिणीकृष्णा
ष्टमीयोगोऽजयंतीसेतद्विवादं। पुराणांतरेण। रोहिणीवियदाकृष्णोपक्षेष्ट्यादिजोत्तम। जयंतीनामसाप्रोक्ता सर्वपापहरा तिथिरि
ति। तदेवमेतैः स्मृतिवचनैः जयंत्याः कृष्णाष्टमीरोहिणीयोगस्वरूपे सत्यहर्वेदादृतफलकामिनस्तादृशोयोगोऽहमद्ध्यादिव ५२
कुणो विधीयते। काम्यस्तुज्योतिष्टोमेगुणविशेषोनकोपिफलायविहितः। अतःकाम्यज्योतिष्टोमवेषम्यादृग्वादेहनदध्यादिसाम्या
दृग्वेदादृतफलवाक्यानिनिमित्तेअन्याष्टमीव्रतेगुणफलप्रतिपादकत्वेनोपपद्यंते। तथासतिग्रथादृग्वेणमासाभ्यामन्यः
कश्चित्पशुफलकोदोहनसङ्गकोयोगोनास्तिकिंतुगुणएवकेवलंगोदोहनं। तथानजन्माष्टमीव्रतादन्यज्जयंतीव्रतंकि
न्तुप्रकृतेएववृतेफलायगुणविधिरित्येवंप्राप्ते ब्रूमः। व्रतद्वयमिदंभवितुमर्हति। कुतः। नामभेदात्। निमित्तभेदात्। रू
पभेदात्। मुख्यमिश्रत्वभेदात्। निर्देशभेदाच्च। तथाहि। ऋग्वेदादृतेषुजयंतीव्रतमित्तिनामव्यवहारः। नामभेदाच्चक
व्रत ×अकरणेप्रत्यवायप्रतिप्रादकस्मृतिवाक्यंजन्माष्टमीमित्येवनामव्यवहृतं। तथाऋग्वेदादृतेषु ×र्मभेदोज्योतिरधिक
रणेव्यवस्थितः। अस्त्वाधिकरणस्यसंग्राहकावेतौश्लोकौभवतः। अथैषज्योतिरित्यत्रगुणोवाकर्मवापृथक्। गुणः
सहस्त्रदानात्मज्योतिष्टोमेघमुदिते। अथेतिप्रकृतेछिन्नएतच्छब्दोग्रगवदेत। संस्त्वंविवान्यकर्मेतमुत्पत्तिगति
संतूयेति। अयमर्थः। अथैषज्योतिरथैषविश्वज्योतिरथैषसर्वज्योतिरेतेनसहस्त्रदक्षिणेनेतिश्रुतं। तत्रसंशयः। किं ५२
प्रकृतएवज्योतिष्टोमेसहस्त्रदक्षिणारिक्तोगुणविधिः। उतयागांतरविधिरिति। एषज्योतिरेतेनेत्याभ्यामेतच्छब्दाभ्या श्रीगजानन

तिशयः। यस्मिन्संवत्सरेश्रावणबहुलाष्टमीमुपरित्यज्यान्यस्मिन्नवम्युदोरेहिणीभवतितस्मिन्संवत्सरेजयंतीस्वरूपेणैवनास्ति। अतोज
यंतीव्रतस्यतत्रैवजन्माष्टमीव्रतेतदपिनप्राप्नुयात्। भेदपक्षेत्वस्यामपिजयं तीजन्माष्टमीव्रतंतत्रप्रवर्ततइत्यमनु
ष्ठानेतिशयःभवत्येवं तथाचिनोपन्यस्तेनिमित्तभेदोव्रत भेदमावहति। कर्मभेदेहनुपुशब्दांतरा भ्यासस्मरणागुणप्रक्रिया। नाम
धेयेषुषट्सुप्रमाणेषुनिमित्तस्यानंतभावादितिचेत्तेनैवं। नथाहिपूर्वोक्तसंज्ञाभेदसंपादितंव्रतभेदंनिमित्तभेदमुपोद्बलयति।
तस्मादत्रनिमित्तभेदाद्व्रतभेदः। तथारूपभेदादपिव्रतभेदोवर्णंतथाः। रूपभेदस्यकर्मभेदहेतुत्वमाभिप्रेत्याधिकरणनिर्णि
तं। अस्मच्चाधिकरणस्यसंग्राहकावेतौश्लोकौभवतः। गुणःकर्मांतरंवास्याद्व्रजिभोवाव्रजिनंतिति। गुणोदेवानन्वयोक्तः
समुच्चयविकल्पतः। आमिश्रोत्पत्तिशिष्टत्वप्रबलात्तत्रवाव्रजिनं। गुणोप्रविध्यकर्मान्यत्कल्प्येहव्रजिदेवकर्मेति। तत्तेप
यसिद्ध्यानयतिसावेपूर्वदेव्यामिश्रावाव्रजिभ्योवाव्रजिनमितिश्रुतं। अत्यल्पदधिसंबंधात्क्षीरनीरन्यायेविभेदेसतियोघनीभू
तःक्षीरांशःसामिश्रा। तस्याश्चविश्वेदेव्यामिश्रा। वादेवता। तत्रयत्पृथग्भूतंनीरंतद्व्रजिनं। तस्मच्चव्रजिनोदेवतास्तस्म
चवाक्यस्यामिश्रांतस्यप्रतिपाद्यमामिश्राद्रव्यकविश्वेदेवदेवताकमेकंकर्म। तत्रकिमु चरितनैवाव्रजिभोवाव्रजिनमित्ल न
नेनवाक्येनपूर्वस्मिन्नेवकर्मणिवाव्रजिनंगुणोविधीयतेउतकर्मांतरविधिरितिसंशयः। तत्रवाव्रजोन्नमामिश्रासाप्येषांदे
वानामस्तितेवाव्रजिनदुतिश्रुत्याप्रकृतान्देवान्नयुवाव्रजिनंगुणोविधीयते। साचामिश्रयावासद्विकल्पेनसमुच्चयेवेति
पूर्वेपक्षः। उत्पत्तिशिष्टामिश्रागुणावरुद्धस्यकर्मणोगुणांतराकांक्षाभावात्। नाव्रजिनस्यतत्रप्रविष्टासंभवेसतन्मथा
नुपपन्नोवाव्रजिनंगुणोव्रजिशब्दश्रवणस्यप्रकृतदेवतान्वयातिरिक्तदेवलंकाल्पयित्वाकर्मपर्यवस्यतीतिसिद्धांतः। तत्रमश्रद्रव्य

देवतालक्षणस्ययागरूपस्याभिन्नत्वात्कर्मभेदः। तथाप्रकृतेर्विरूपभेदाद्भूतभेदोनुपगम्यतां। उपवासमा त्रंव्रजन्माष्टमीस्वरूपंतदुत्पत्ति
वाक्येनमात्रस्यप्रतीयमानत्वात्। ननुजयंतीव्रतंएवोपवासंकुर्याद्दुत्पत्तिवाक्यस्यमर्म। ननुजन्माष्टमी व्रतेवाढं। तत्राप्यत्रवि
धिरुन्नेतव्यः। अन्यथाभोजनप्रतिषेधस्मरणानुपपत्तेः। सचोभीष्मम। नोविधिरुपवासमात्रंविधत्ते। ननुमंडनविनिर्मीणजाग
रणप्रतिमादानादिकं। विधेरुन्नयनहेतुश्चकरणप्रत्ययवाक्येनभोजननिषेधमात्रस्मरणात्। नहितत्रनिद्रायांदानभा
वेवोपवासवाधःस्मर्यते। अत्रतूपवासमात्रंनत्रस्वरूपंननुदानादिकं। अतएवाकरणप्रत्ययवाक्यमभिधायवाक्यशेषेजयंतीमधु
क्रदानादिपूंकाव्यात्तत्रयेकेवलशब्दउपवासविशेषणत्वेनपठ्यते। केवलेनोपवासेनतस्मिन्जन्मदिनेमम। इतजन्मकृतात्पा
पान्मुच्यतेनात्रसंशयइति। तस्माज्जन्माष्टमीव्रतस्योपवासमात्रंस्वरूपं। यदिपुनरुपवासस्तत्राविजागरणदानादिकमनुति
ष्ठतिअनुतिष्ठेन्नुगामाविरुद्धैःपुण्यविशेषैर्व्रतसंपोबृंहणसंभवात्। शास्त्रेणशास्त्रविहितमुपवासमात्रंजयंतीव्रतस्यतुदा
नादिसहितउपवासःस्वरूपं। तद्विधायकंपुराणेनपुनस्तथाभिधानात्। तथाचभविष्यपुराणे। तुल्यार्थदेवकीस्तुतौजयंतीसंभव
व्रतं। कर्तव्यंविनमासेनभक्तस्यभक्तवत्सलेति। भाद्रेकृष्णेष्टमीरोहिणीसंयुत

श्रावणस्यासितेऽष्टमी। वर्षवर्धनुकर्तव्या तुष्ट्यर्थं चक्रपाणिनरूति। नारदीयसंहितायां। जयंतीप्रकरणसमाप्ते। उपोष्य जन्मविधानि कुर्यात्। अष्टमी
जागरणं तुयः। अर्धरात्रयुतेष्टम्यां सोऽश्वमेधः फलं लभेत्। इति। एतेनैषु विधिवाक्येषु दानादियुक्त उपवासो जयंती व्रतरूपत्वेन प्र
तीयते। अतो रूपभेदादेव भेदः। तथा शुक्लमिश्रलभेदादपि द्रष्टव्यः। अकरणप्रसवाग्भात्रस्मरणात्। शुक्लमिति जन्माष्टमीव्रतं।
करणफलविशेषस्मरणात्। अकरणप्रसवावरणात्। निलसेनकाम्यलेनवमिश्ररूपं जयंतीव्रतं। तत्रफलवाक्यानि पूर्वपक्ष
एतत्प्रसंगादुदाहृतानि। अकरणप्रसवाग्भश्च जयंतीव्रकल्पकास्मिंश्चिल्लुरणेरमते। अकुर्वन्यातिनरकं यावदिंद्रश्चतुर्दशे
ति। स्कंदपुराणेपि। मूढो नैतत्पुण्यपापं शवहस्तस्थभोजने। तत्पापं लभ्यते कृत्वा जयंतीविमुखो नरः। व्रतभ्रंशसुरापस्य गोव
धस्त्रीवधैः समं। नरकोऽयदि शार्दूल जयंतीविमुखस्य च। क्रियाहीनस्य मूर्खस्य परान्नं भुंजतो पिवा। नरकान्नभ्रंशलोकोस्ति
जयंतीविमुखस्य च। नरकेति यदाविष्णोः जयंतीसंभवं व्रतं। यमस्यवशमापन्नः सहते नारकं भयं। जयंतीवासरे प्राप्ते
करोत्युदरपूरणं। सपीडुनेति मात्रेतु मगदूतैः कलेवरं। नाभुंजीत विभूत्यात्मा जयंतीवासरे नृपति। एतैरकरणप्रसवाग्भवाक्यै
र्निलिलेवजयंत्लाः। मन्वादयस्तुकैरकरणवाक्यैः प्रसवाग्भवाक्यैः केवलैर्नापवासेनेति पापक्षयवाक्यान्यजन्माष्टमीव्रतमपि नित्यका
म्यस्मात्तथैवं। पापक्षयफलकत्वमात्रेणकाम्यसंध्यावंदनादिरपि काम्यत्वेसंगतः। अतसत्यपि पापक्षयफलांतरत्वेम
रेणनकेवलनित्यत्वं जन्माष्टमीव्रतस्युक्तं। ततः शुक्लमिश्रलभेदादुभयोर्भेदः। तत्रनिर्दोषभेदादपिव्रतभेदो द्रष्टव्यः। नि
र्दोषभेदश्चभगवान्वयदर्शयति। जन्माष्टमीजयंतीवेधवशात्त्रिस्तेष्वेवच। एवंविधैवकर्तव्यातिथिर्भातिचपारणेति। य
त्रजन्माष्टमीरोहिणीवेतिपाठः। तत्रापिरोहिणीशब्देनतद्युक्तातिथिर्विवक्षिता। नकेवलंरोहिणी। तस्मिन्वाक्येनिर्दिष्टयोः श्रीगजानन

पूर्वेद्युरुभयोर्जन्माष्टमी। शिवरात्रोस्तिभिन्नतत्रैकमेवव्रतंस्यान्नहि निर्दोषभेदोनोपपद्येत। नचुव्रतभेदेप्यस्तिदोषः। यदादिनद्व
येऽष्टमीवर्तते रोहिणीतूत्तरदिनएवनदाद्येदिनेजन्माष्टम्युपवासः। परेह्युर्भोजनोपवासद्वितीयेरंतर्थेनोपवासद्वयंप्रसज्येत। प्रसज्य
तांनामप्रमाणबलादितिचेत्। परदिनेभोजनोपवासलक्षणविरुद्धधर्मसंसर्गात्। उपवासस्यागपारणेतिहिवक्ष्यते। तथाच ज
न्माष्टम्युपवासागस्यपारणस्यजयंत्युपवासस्यैकत्रप्राप्तिः सोयमेकोदोषः। अतिरेकानुपलंभप्राप्तिरेदोषः। तथाहि। यस्माज्ज
यंतीव्रतिरेकाजन्माष्टम्युपलभ्यतेतथाजन्माष्टमीव्रतातिरिक्तापिजयंतीकापिवासरेऽनुपलभ्येतनत्वेवमुपलभ्यते। ततोव्रतद्वयेपि
दुष्टएव। अथोच्यते। नतावत्पारणेनोपवाससंकल्पलक्षणदोषोस्ति। प्राप्तानीदकपानादिनापारणेसंपादितेनुपवासभंगा
भावात्। अन्यथाहादशीपारणात्रयोदशीनक्तभोजनेनोपवासद्वयभंगप्रसंगात्। नचैवं। यतोनक्तभोजनंकाम्यं। नित्यंतुरात्रौ
जन्माष्टम्याद्यपितेत्रैवकर्तव्यत्वात्। सर्वव्रतिविधिबलाभ्यांनक्तस्यैकवेलातिरिक्तवेलायामस्तित्वेतत्रैवप्राप्तत्वात्। अ
तएवव्रतातिरिक्तानुपलंभोव्यभिचारायनदोषाय। जन्माष्टम्यतिरिक्तरोहिणीतिरेकेणोपलभ्यमानंनाम। अथवासाधु
योगस्तेनरोहिण्या[illegible]म्यामपिसाधूक्तेनैवजयंत्यतिरिक्तशंकावकाशस्तस्माद्व्रतद्वयपक्षेनकोप्यस्तिदोषः। एकंवथश्चदरोहिणियोगोस्तितदा
जन्माष्टमीजयंत्योः सहत्रयोगस्याकस्मिकत्वेनजयंतीव्रतेवजन्माष्टमीव्रतमंतर्भवति। तस्मादपिनोपवासद्वयप्रसं
गः। तदेवंव्रतभेदेदोषाभावान्नास्यैकालांनाभेदादीनांपंचानांहेतूनांसद्भावेव्रतभेदएवावश्यमभ्युपेयः। व्रतैक्यभ्रमस्तु
तयोरुक्तयुक्तसंधानाभावादष्टम्युपवासस्यादृश्यत्वेकेषांविदुषामिति। सादृश्यंचगुणविकृतित्वादाश्रमाश्रविभावाद्यसं

भाव्यते। यस्मादसौयागस्यगुणविकृतिःसाकंप्रस्थायिकोयागः।तत्रदर्शयागेभावेतांगंगी विषयाःप्रयोगास्तेसर्वेपिसाकंप्रस्थायीये अष्टमी
विधंते।भेदस्तुस्वल्पएवभवति।दर्शयागेसाम्नाय्यहविषोदधिपयसोःपृथगवदानं।साकंप्रस्थायीयेतुसहैवप्रस्थानं।एतावतांभे
देनगुणविकृतिरित्यभिधीयते।तथाग्निष्टोमस्यगुणविकृतिरुक्थ्याग्निष्टोमादश स्तोत्राणि।उक्थ्येषोडशिकानित्रीणि।ततोगुणा
धिक्यादगुणविकृतित्वमेवमत्रापिजन्माष्टम्यामुपवासेनुशेयः।जयंत्यांतुदानादिरधिकोगुणः।अतःसगुणविकृतिः।अत्राश्रयाश्र
यिभावश्चज्योतिष्टोमेतदंगावँशोपासनेदर्शस्तत्रज्योतिष्टोमआश्रयः।तस्यांगान्युक्थ्योदशिनि।तत्रोक्थ्यानामबहूचा ध्यायिनाहो
त्राशंसस्यमानमाज्यमरुत्वतीयनिष्केवल्यादिनामकंशस्त्रं।तत्रोक्थ्यमाग्निमरुतंबहूचआत्मणोपनिषद्युपासनानिविहितानि।तथान
स्तुतिः।उक्थमुक्थ्यमितिवैप्रजावदंतितदिदमेवोक्थानियमेवएषएवीति।अहमुक्थमस्मीतिविधादितिच।उद्गीथेनोनामसामवेदि
नाद्गात्रागीयमानःसाम्नोभागविशेषः।तंवेदोद्गीथमाग्निमरुतंदोग्योपनिषद्युपासनानिविहितानि।ओमितेतदक्षरमुद्गीथ
मुपासीतेति।एवंप्रकृतेपिजन्माष्टमीव्रतेविधीयते।अतोगुणविकृतित्वेनाश्रयाश्रयिभावेनचसावश्यमसद्भावादनयोर्व्रतयोरेकस्यभ्रमेण
दनुष्ठेयंजायतेनाम प्रमाणन्यायदर्शिभिस्तुसर्वथैवव्रतभेदोंगीकार्यइतिसिद्धं।यतेदेहिचारत्रंपूर्वमुक्तिंचव्रतभेदेतिथिनिर्णये
वेधेचेतितत्रव्रतभेदोनिरूपितः॥ ॥अथतिथिनिर्णयस्तथा॥ ॥तन्निर्णयश्चवेधाधीनः।अतोवेधःपूर्वमभिधीयते।तिथ्यंतरेण
हूएवप्रायेणकर्मकालत्वादुदयास्तमयवेलायांत्रिमुहूर्तवेधःसामान्येननिरूपितः।पंचदशांतुविशेषःषण्मुहूर्तवेधोदर्शितः।जन्माष्टम्या
जयंत्यास्तुरात्रिप्रधानत्वाद्रात्रियोगःप्रशस्तःएतन्नजावलिदर्शनेतभाभ्यांदर्शितं।अहस्स्तुतिन्यायःपुण्याकर्मानुष्ठानेतोदिवाननक्तादि
व्रतयोगेषुरात्रियोगोविशिष्यतइति।यथाचोपवासव्रतत्वादुदितेरात्रौचमुख्यत्वमुक्तंतत्सामर्थ्यसिद्धंतथाचार्धरात्रस्यमुख्यकाल
त्वमुक्तंवसिष्ठसंहितायां।अष्टमीरोहिणीयुक्तानिशार्धेदृश्यतेयदि।मुख्यकालइतिख्यातस्तत्रजातोहरिःस्वयमिति।एवंसतिश्रीगजानन

DR BHAU DAJI

धर्णरात्रसद्भावेवात्रकर्मकालव्याप्तिरित्यभिधीयते।तदेवाभिप्रेत्यविष्णुरहस्येदृश्यते।रोहिण्यामर्धरात्रेतुयदाकृष्णाष्टमीभवेत्।तस्यामभ्यर्चनं
पूजेरंतिपापंत्रिजन्मजमिति।तस्मिन्नर्धरात्रेकियत्परिमाणमेपक्षितामित्यपेक्षायामादित्यपुराणेदर्शितं।अर्धरात्रादधश्चोर्ध्वंकलया
पियदाभवेत्।जयंतीनामसाप्रोक्तासर्वपापप्रणाशिनीति।वशहसंहितायामपि।सिंहेर्केरोहिणीयुक्तानभःकृष्णाष्टमीयदि।रात्र्य
र्धादूर्ध्वापरार्धाकलयापियदाभवेत्।तत्रजातोजयंतीकलयापिवेति।रात्रेरर्धंरात्र्यर्धं।पूर्वंचापरंचपूर्वापरे।रात्र्यर्धंचतेपूर्वापरे
चरात्र्यर्धपूर्वापरेतयोर्गणितंवर्ततेतिरात्र्यर्धपूर्वापरागाकघटिकायाअशीत्यधिकशतंततोभागः।अष्टादशनिमेषास्तुकाष्ठा
त्रिंशत्तुताःकलाः।तास्तुत्रिंशत्क्षणस्तेतुमुहूर्तोदशसंख्यया।मिलमरुः।तथाचपलक्षतीथोभागःकलाभवति।तावतापरिमाणमपूर्वा
र्धावसानेउत्तरार्धेचवर्तमानेगृहीतव्या।संवर्तति।विरूपाकृष्णाष्टमीद्विविधा।पूर्वेद्युःसप्तमीयुक्तापरेद्युर्नवमीयुक्ताचेति।तत्रस
प्तमीयुक्तायांरात्रिपूर्वार्धावसानेकलासद्भावोविधीयते।उत्तरार्धेतुस्वतःसिद्धत्वेनाविधेयत्वान्नाद्रियतेयेनवमीयुक्तामनु
रात्र्यर्धादेःकलासद्भावोविधीयते।पूर्वार्धावसानकलायाःसप्तमीयुतविषमत्वंविष्णुधर्मोत्तरेस्पष्टमभिहितं।रोहिणीसहितेकृ
ष्णेमासिभाद्रपदेष्टमी।सप्तम्यामर्धरात्राधःकलयापियदाभवेत्।तत्रजातोजगन्नाथःकोन्यस्तमीहरिरीश्वरः।तेनैवपक्षेसत्काल
कुर्याच्चैवजगद्गुरुमिति।दृश्यतेष्टमीकृष्णपक्षादिमास्तविवक्षयाभाद्रपदेभवतिसैवाष्टमीशुक्लपक्षादिमास्तविवक्षयाश्रावणे
भवति।अत्रैवयोगेश्वरः।रोहिणीसहितेकृष्णाभाद्रेचश्रावणेष्टमी।अर्धरात्रादधश्चार्धंकलयापियदाभवेत्।जयंतीनाम
साप्रोक्तासर्वपापप्रणाशिनीति।कलायाअतिसूक्ष्मत्वेनदुर्लक्ष्यत्वात्सएवपक्षांतरमाह।अर्धरात्रादधश्चोर्ध्वंएकाधिघटिकान्विता

रोहिणीवाष्टमीग्राह्योपवासव्रतादिषिति। एकार्धघटिकाचैकार्धघटिकेताभ्यांसमन्विता। कलामपेक्ष्यार्धघटिकास्थूलातिमपेक्ष्य
घटिकास्थूला। तत्रायमर्थः संपद्यते। पूर्वभागावस्थानएकाघटिका। उत्तरभागादौचैका। मिलित्वातान्निशीथशब्दवाच्यमुहूर्तं। तावत्परि
माणंसर्वैरपिसुलक्ष्यत्वात्मुख्यः कल्पः। तदसंभवेऽर्धघटिकान्वेषणम्। तस्याप्यसंभवेकलेति। तत्रमुख्यपक्षमभिप्रेत्यभविष्योत्तरे नि
शीथेकृष्णपक्षेऽष्टम्यामित्युक्तं। तच्चवचनंसाकल्येनपूर्वमेवोदाहृतं। अत्रजयंत्यांचंद्रार्द्धास्तावश्यकर्तव्यत्वात्तस्यचचंद्रोदयकालीनत्वान्निशी
थयोगः प्रशस्तः। एतदेवविष्णुधर्मोत्तरेऽभिहितं। अर्धरात्रेतुयोगोयंतारापुष्योदयेसति। नियतात्माशुचिस्नातःपूजांतत्रप्रवर्तयेदिति
सोयमर्धरात्रयोगोमुख्यः कल्पः। यस्तुकृत्स्नाहोरात्रयोगः सोयंमुख्यतरः। यश्चकदाचिदर्धरात्रयोगः सोमुख्यकल्पः। सचवशिष्ठसं
हितायांदर्शितः। अहोरात्रंतयोर्योगाद्युसंपूर्णोभवेद्यदि। मुहूर्तमथहोरात्रेयोगश्चेन्नाभुपोष्यतेदिति। पुराणांतरेऽपि। रोहिणीचय
दाकृष्णेपक्षेऽष्टम्यांपूजोत्तम। जयंतीनामसाप्रोक्तासर्वपापहरातिथिः। वासरेवानिशायांवायत्रस्पृशतिरोहिणी। विशेषेणनभो
मासेसेवोपोष्यामनीषिभिरिति। योयंजयंतीव्रतेयोगनिर्णयः सएवजन्माष्टमीव्रतेपद्रष्टव्यः। यस्मिन्वत्सरेयोगोनास्तितस्मिन्वत्सरे
जन्माष्टमीव्रतमेकमेवप्रवर्तते। तत्रापिनेतरेष्टमीरात्रेवेधः। तथाचतस्मिन्नेवपुराणांतरे। दिवावाभद्दिवारात्रौनास्तिचेद्रोहिणीकला। रो
हिणीयुक्तामकुर्वीतविशेषेणेंदुसंयुता। अन्यत्रापिअष्टमीशिवरात्रिश्चार्धरात्रादधोयदि। दृश्यतेघटिकायासापूर्वेवेधाग्रकीर्तिते
ति॥ ॥इतिवेधोनिरूपितः॥ ॥अथव्याप्तिर्निरूप्यते॥ ॥साचवत्सरभेदेनद्विधाभवति। रोहिणीरहितारोहिणीयुक्ताचेति। तत्रयारो
हिणीरहिताष्टमीसापिद्विविधा। शुक्लासप्तमीविद्धाचेति। सूर्योदयमारभ्यवर्तमानाष्टमीशुक्ला। निशीथादर्वाकूसप्तम्याकिय
त्यापिविद्धा। शुक्लापिपुनर्निशीथव्याप्तिव्याप्तिभ्यांद्विविधा। तत्रनिशीथव्यापिनीजन्माष्टमीव्रतेमुख्याविशेषेणेंदुसंयुताभितिवचना ५६ श्रीगजानन

सुमहाफला। मुहूर्तमप्यहोरात्रेयस्मिन्युक्तंहिदृश्यते। अष्टम्यारोहिणीऋक्षंतंसुपुण्यमुपावसेदिति।शुद्धाधिकानुसूर्योदयमारभ्यप्रवृत्ता। परेद्युःसूर्योदयमतिक्रम्यैवदृश्यतेसाचत्रिविधा। पूर्वेद्युरेवरोहिणीयुक्ता।परेद्युरेवरोहिणीयुक्ता।दिनद्वयेपिरोहिणीयुक्तेति। तत्राद्येऽर्द्धरात्रेऽष्टम्यभावान्नोपवासःसंदेहः।रोहिणीयुक्तायाद्वितीयकोटेरभावात्।तृतीयपक्षेतुरोहिणीयोगस्योभयत्रसमानत्वेपिगुणाधिक्यात्पूर्वैवोपोष्या।गुणाधिक्यंवदर्शयिष्यते।येयमत्रोपोष्यत्वेनोक्तापूर्वातिथिः सापिरोहिणीयोगभेदात्त्रिधाभिद्यते। अष्टमीमारभ्यप्रवृत्तारोहिणीकदाचित्परेद्युरपिकियतीवर्धते।कदाचित्पूर्वेद्युर्निशीथमारभ्यरोहिणी प्रवर्तते।कदाचिन्निशीथादूर्ध्वमारभ्यप्रवर्तते।तत्रप्रथमपक्षेसंपूर्णयोगत्वमेकोगुणः।संकल्पकालमारभ्यैकत्रैकमेकालभ्यास्तिरपरोगुणः।निशीथव्याप्तिस्तृतीयोगुणः।नचैतेत्रयोगुणाःपरेद्युःसंभवंति।द्वितीयपक्षेनिशीथेजयंतीसद्भावोगुणः।नचपरेद्युःसास्ति।तृतीयपक्षेदिनद्वयेपिनिशीथेयोगोनास्ति।पूर्वेद्युःकेवलाष्टमी।परेद्युःकेवलारोहिणी।तत्राष्टम्याःप्राधान्यात्त्रयाणामल्पमल्पमुपेयं।सर्वत्रहिजयंतीवाक्येपरेद्युरोहिणीसहिताष्टमीतिव्यवहारोष्टमीसहितारोहिणीतिव्यवहारोभावात्।तिथिनक्षत्रयोःक्रमेणप्राधान्योपजैसमभावोवगंतव्यः।अतोगुणाधिक्याच्छुद्धाधिकाद्वैवोपोष्या।निशीथादर्वाक्सत्त्वम्यामुक्तापरेद्युरपिविद्यमानाविद्धाधिका।अन्यत्रनिशीथस्पर्शेसमेवेधोग्राह्यइत्युक्तं।बाढं।वेध्यायाअष्टम्यानिशीथेसद्भावोऽनिशीथेवेधः।नतुवेधाधिक्यायाःसत्त्वम्याःसद्भावः।विद्धाधिक्यायामपिपक्षत्रयंमंदूयोःपक्षयोःसंदेहाभावश्चपूर्ववेद्याजनीयः।तत्रयाद्यैर्वेधुरेवरोहिणीयुक्ताविद्धाधिकातस्यामुपवासआदित्यपुराणेस्मर्यते। विनाऋक्षेणकर्तव्यानवमीसंयुताष्टमी। कार्याविद्धापिसप्तम्यारोहिणीसंयुताष्टमीतिविष्णुधर्मेपि। जयंतीशिवरात्रिश्चकार्येभद्राजयान्विते। कुलो

पवासंत्यजेत्तथाकुर्यान्नपारणंनिति।गारुडपुराणेपि।जयंत्याप्रथमेविद्धायामुपवासंसमाचरेत्। तिथ्यंतेचोत्सवंतेवाव्रतीकुर्वीतपारणमिति।यापरेद्युरेवरोहिणीयुक्ताविद्धाधिकातत्रोपवासःपूर्वतिथियोनुयुक्तःरोहिणीयोगाभावात्।परेद्युस्तत्सद्भावात्पूर्वेद्युरुदाहृतेनत्रयाणामपिपक्षाणांनिशीथेसत्त्वेनोपवासोदितोभीष्मतेः।यात्वभयत्ररोहिणीयुक्ताविद्धापिकासापिनिशीथेजयंतीयोगमपेक्ष्यचतुर्धाभिद्यते। पूर्वेद्युरेवनिशीथेयोगवती।परेद्युरेवनादृशी।उभयत्रनिशीथयोगरहितेति।तत्रयापूर्वेद्युरेवनिशीथयोगवतीसापूर्वैवोपोष्या।तदुक्तंपद्मपुराणे। कार्याविद्धापिसप्तम्यारोहिणीसहिताष्टमी।तत्रोपवासंकुर्यादतिथिभांतेचपारणमिति। अथावज्ञिष्टेसूत्रिषुपक्षेषुपरेद्युरेवोपवासःतत्रदिनद्वयेनिशीथयोगाभावेकेवलाष्टम्यांसत्त्वेनतेपक्षेते।वर्मनीमाप्रमतिनसप्तमीसंयुताष्टमी।सासप्तम्यापिनकर्तव्याजन्मसप्तमीसंयुताष्टमी।अविद्धायांतुसप्तम्यांजातोदेवकीनंदनः।यदाद्दिनद्वयेपिनिशीथयोगोपरत्रोपवासस्तदादिनमुक्तार्थं।परेद्युरेवनिशीथयोगेदिनद्वयेपिनिशीथयोगरहितंबहुधाजायतेतथथा।पूर्वेद्युर्निशीथादूर्ध्वंतिष्ठन्नक्षत्रंप्रहरंतं।पंतत्रपरेद्युर्निशीथादर्वागेवसमाप्तमितिप्रथमः प्रकारः। पूर्वेद्युर्निशीथादर्वागेवनक्षत्रंप्रहरंतं।अष्टमीतुनिशीथादूर्ध्वंप्रहरमेतत्प्रथमः।अष्टमीचनिशीथादर्वाक्प्रहरमात्रंसंचरंनिशीथादूर्ध्वंप्रहरंपरेद्युर्निशीथादर्वागेवसमाप्तमितितृतीयः पक्षः।त्रिष्वेतेषुप्रकारेषुपरेद्योपोष्या।दिनद्वयेप्यर्धरात्रियोगविधयेपूर्वमुदाहृतस्यवर्जनीयात्रयत्नेनतिक्रमणस्यापिसंचारयितुंशक्यत्वात्।किंचप्रथमप्रकारेपिन्यायोनुपोढुलकेनास्ति। संकल्पकालमारभ्यानिशिनक्षत्रयोगस्यास्पत्वादनुपादेयत्वमितिशंकानकर्तव्या। अतएवकंदपुराणेपद्मेसप्तमीसंयुताष्टम्याभूलाक्रांतहिजोत्तम।प्राजापत्यंहितीयेहिमूलर्क्षंभवेद्यदि।तदाष्टम्यामिकंत्वेयंप्रोक्तंव्यासादिभिःपुरेति।तृतीयप्रकारेपरेद्युर्नक्षत्रंबाहुल्येपिअष्टमीयोगस्यास्पत्वादनुपादेयत्वमितिशंकाभवति। साचपद्मपुराणेनिवर्तितेति। पूर्वविद्धाष्टमीमानुदयेनवमीदिने।मुहूर्तमपिसंयुक्तासंपूर्णासाष्टमीभवेत्।कलाकाष्ठामुहूर्तापियदाकुर्याष्टमीतिथिः॥

स्वल्पकालेप्यतितत्रष्टस्तत्संपूर्णत्वं।तृतीयप्रकारेपरेद्युरष्टमीबाहुल्येपिनक्षत्रयोग

नवम्यांचेवकार्या स्यात्सप्तमीसंयुक्तानहीति। तदेवंजन्माष्टमीभेदोजयंतीभेदश्चनिरूपितः। तत्रजयंतीभेदेषूपवासदिनेयदिसोमवारेबुध
वासरेवाभवति। तदाफलाधिक्यंभवति। तदुक्तंपद्मपुराणे। प्रेतयोनिगतानांतुप्रेतत्वंनाशितंनरैः। यैःकृताश्रावणेमासिअष्टमीरोहिणी
युता। किंपुनर्बुधवारेणसोमेनापिविशेषतः। किंपुनर्नवमीयुक्ताकुलकोट्धारमुक्तिदेति। स्कंदपुराणेपि। उदयेवाष्टमी किंचिन्न
वमीसकलायदि। भवेत्तुबुधसंयुक्ताप्राजापत्यर्क्षसंयुता। अपिवर्षशतेनापिलभ्यतेयदिवानदेति। विष्णुधर्मोत्तरेपि। अष्टमीबु
धवारेण रोहिणीसहितायदा। भवेत्तुमुनिशार्दूलकिंकृतैर्व्रतकोटिभिरिति। यथोक्तरीत्याविहितेतिथावुपवासंकृत्वापरेह्युः
पारणेनोपवासंसमापयेत्। पारतीरकर्मसमाप्तावित्यस्मात्सातेनिर्घ्नन्नःपारणशब्दः। मदाद्यर्थेसोमभाग्निमघ्नमभिदधा
ति। तथाप्युपवाससमाप्तावेवलोकेशास्त्रयोःप्रयोगात्पंकजादिशब्दवदेगरूढेर्द्रष्टव्यः। तथाचयोगरूढ्योपवासस्यच
रमांगंभोजनमभिधत्ते। अंगतंचोपवासंवाक्यशेषतिथिभांतेचपारणमितिविधानादवगंतव्यं। नचरागप्राप्तस्यभोजनस्यानेनवचनेनोपवासां
गतिथिनक्षत्रवैष्ण्वयोर्निमित्तयोःक्रियतेतत्पारणानामकंकिंचिदंगंविधीयतइतिशंकनीयं। तथासतिपारणशब्दत्रयेणयोगानुपपत्तेः। रागप्रा
प्तहिअभ्यवहरणेभोजनशब्दः। तत्रपारणशब्देनरागप्राप्तभोजनविवक्षायांमुख्यार्थबाधितःस्यात्। किंचयदिपारणमंगंनस्यात्त
दाप्रतिनिधिविधानंनोपपद्येत। तद्विधानंचह्यदशीघ्रस्तावदेवलेनसमर्थते। संकटेविषमप्राप्तेह्यदश्यापारयेत्कथं। अद्रिसुपा
रणंकुर्यान्नपुनर्भुक्तंनदोषकृदिति। अतःपारणबलात्प्रतिनिधिबलाच्चपारणस्यागतंद्रष्टव्यं। अतएवादित्यपुराणे। पारणा
तक्रमाकुर्वेयंव्रतांततेतद्धिभोजनं। असमाप्तव्रतेपूर्वंनैवकुर्याद्भूतांतरमिति। तच्चपारणमुपवासदिनात्परदिनेपूर्वाह्णेकर्तव्यं
उपवासेषुसर्वेषुपूर्वाह्णेपारणंभवेदितिदेवलस्मरणात्। एवंसामान्यतःपूर्वाह्णेपारणप्राप्तौक्वचिदपवादमतिभिद्यांते
चपारणमित्यभिधीयते। शुद्धाधिकायांपूर्वेद्युरेवजयंतीयोगः। उभयत्रापिजयंतीयोगदूषनयोःपक्षयोःपूर्वेद्युरेवोपवासवि

विधानात्परेद्युःकेवलतिथेस्तिथिनक्षत्रयोर्वासद्भावानदंतेपारणविधिः। तथाशुद्धाधिकाविद्धाधिकयोरुभयोरपिपरेद्युरेवजयंती
योगस्तदापरतिथाविधानादुपवासविधानात्पारणदिनेतिथ्यभावेपिकदाचिन्नक्षत्रावशेषसंभवात्तदंतेपारणंविधीयते। तिथे
र्वानक्षत्रस्यवाशेषकालेपारणंव्रतमेवेतप्रतिषिध्यते। अष्टम्यामथरोहिण्यांनकुर्यात्पारणंक्वचित्। हन्यात्पुराकृतंकर्मउ
पवासार्जितंफलं। तिथिरष्टगुणंहंतिनक्षत्रंचचतुर्गुणं। तस्मात्प्रयत्नतःकुर्यान्निशिभांतेचपारणमिति। स्कंदपुराणेपि। तिथि
नक्षत्रनियमेतिथिभांतेचपारणं। अतोन्यथापारणेतुव्रतभंगमवाप्नुयादिति। तिथिभांतश्चद्विविधः। उभयांतएकतरांतश्चे
ति। दिनद्वयेजयंतीयोगवत्यांशुद्धाधिकायांपरदिनेअष्टमीसूदयेतत्रभंगातिक्रामतिरोहिणीतुपूर्वेद्युर्निशीथादर्वाग्यदाकदा
चित्प्रदोषात्तदनुपारणपरेद्युःसमाप्यते। तत्रयदिदिवैवसमाप्यतेतदातामतिक्रम्यैवपारणंकुर्यात्। उभयांतस्यमुख्यत्वात्।
यदिरात्रौसमाप्तिस्तदातत्समाप्तिर्निशातीतक्षणीया। रात्रिपारणस्यनिषिद्धत्वात्। तत्राद्यप्रहरेवृत्तैः। सर्वत्रैवोपवासेषुदिवा
पारणमिष्यते। अन्यथापुण्यहानिःस्यादृतेधारणपारणमिति। अन्यतिथ्यागमेरात्रौतामसंभोजनादिवा। तामसेपारणेकुर्व
न्तामसीगतिमश्नुतइति। दिवापारणंकुर्वन्नपिमाषमीवेलायांकुर्यात्। एकतरांतस्याल्पस्यभावात्। अष्टमीमतिथाह्यरोहि
ण्यांवर्तमानायामपिपारणंकुर्यात्। अतएवनागरखंडे। तिथिनक्षत्रसंयोगउपवासोयदाभवेत्। पारणंतुनकर्तव्यंनावन्नेकस्यसंक्ष
यः। सांयोगिकेव्रतेप्राप्तेसायंत्रैकोपिविलुप्यते। तत्रैवपारणंकुर्यादेवंवेदविदोविदुरिति। पूर्वेद्युरेवनिशीथेजयंतीयोगवत्यांविद्धाधि
कायांपारणदिनेतिथिभांतेबहुधासंभाव्यते। अहत्युभयांतएकतरांतोवा। रात्रावेकतरांतउभयांतोवेति। तेषुचतुर्षुभेदेषुनिर्णयः स्म
र्यते। तिथ्यृक्षयोर्यदाछेदोनक्षत्रांतमथापिवा। अर्धरात्रेपिवाकुर्यात्पारणंचपरेहनीति। दिवसेयमुभयांतस्तदापारणमित्यु
च्यकल्पः। नक्षत्रांतमित्यनेनैकतरांतस्यविवक्षितं। सायमनुकल्पः। यदिरात्रौनिशीथेउभयांतएकतरांतोवाभवति। तदादिवसेमु

रव्यातुकल्पयोरुभयोरप्यसंभवाद्रात्रेोचपारणस्यनिषिद्धत्वादर्धोदुपवासप्राप्तेोपारणस्यप्रतिप्रसवः क्रियते।अर्धरात्रेपिवाकुर्यादिति।
ननुपारणेदृश्यंतस्यप्रतीक्षणीयत्वेपिरोहिण्यंतोनप्रतीक्षणीयः।याः काश्चित्तिथयः प्राक्तांपुण्यनक्षत्रसंयुताः।ऋक्षांतेपारणंकुर्यादि
नाश्रवणरोहिणीमितिस्मरणात्।मैवं।नक्षत्रंचचतुर्गुणमितिप्रत्यवायस्योदाहृतत्वात्।तस्माद्विनाश्रवणरोहिणीमितिवचनंकेव
लनक्षत्रोपवासविषयं।द्वयेनुकल्पविषयंनेत्यवगंतव्यं।अशक्तस्तुतिश्चनक्षत्रयोरनुवर्तमानयोरपिप्रातर्दृश्यंदृष्ट्वा क्रियमाणंपारणंनदू
षयति।तिथ्यंतेवोत्सवांतेवाव्रतीकुर्वन्नतपारणमितिस्मरणात्॥ ॥इतिजयंतीनिर्णयः॥ ॥अथअष्टमीनिर्णीयते॥ "साचविधिनिषेध
रूपाभ्यामन्वयव्यतिरेकाभ्यांद्वैविध्येवाद्या।तद्विधिश्चयुग्मादिशास्त्रेवसुरंध्रेभागेतिपठ्यते।पद्मपुराणेपि।अष्टम्यानवमीविद्धानवम्या
चाष्टमीयुता।अर्धनारीश्वरव्रायाउमामाहेश्वरीतिभिः।भविष्यत्पुराणेदादशीकल्पेपि।नवम्यासहकार्यास्यादष्टमीतिथयेति।निषेधस्तु नवमी
पत्रपुराणेभिहितः।नकार्यानवमीतातदशम्यातुकदाचनेति।सयंनवमीभविष्यत्पुराणेकदुर्गाव्रतादोद्दृष्ट्या।ननुकृष्णानवम्याः
पूर्वविद्धेपिशुक्लनवमीपरविद्धासु।सुक्लपक्षेतिथिर्ग्राह्यास्यामभ्युदितोरविरितिवचनात्।मैवं।पूर्वोक्तेषुवचनेषुदशमीविद्धा
याः साक्षान्निषेधात्।ननुतस्यनिषेधस्यसामान्यरूपत्वात्कृष्णपक्षेसंकोचोस्तितिचेत्।नसंकोचहेतोर्भवउदाहृतस्यापिसामान्य
रूपत्वात्तुपक्षयोरुभयोरपिपूर्वविद्धेवकार्या।रामनवमीतुचैत्रशुक्लानवमीपुनर्वसुयुतायदि।सेवमध्याह्नयोगेनमहापुण्यत
माभवेत्।नवमीचाष्टमीविद्धासाज्याविष्णुपरायणैः।उपोषणंनवम्यांदशम्यांपारणंभवेदिति।वचनादष्टमीविद्धासनक्षत्रा
पिनोपोष्या॥ ॥इतिनवमीनिर्णयः॥ ॥अथदशमीनिर्णीयते॥ "तस्यांद्युतिथ्यंतरवेद्योपादेयविभागोनास्ति।तिथ्यंत
रंतुकाचित्सूर्योदयाग्राह्या।।क्वचिदुन्नरविद्धा।ननुतत्रादशम्यांकिंविनियामकमस्ति। एतदेवाभिप्रेत्यभगवानाह।असं ५९
पूर्णादशमीग्राह्यापरयाद्रविमोदयेत्।मुक्तानदूषितायस्मात्तिथिभिःसास्सदेतोमुखीति।यथासंपूर्णदोषरहितातथाविद्धापि।प्र श्रीगजानन

प्रतिपत्संमुखीकार्यैलाहोतिश्रेष्ठैर्मुखंद्वयमुक्तं।दशम्यास्तुमूलाग्रयोर्मूलस्यैवग्रहणात्।मूलमुभयत्रसमानं।सएवंसतत्रेदंचिंत्यते।
किंपूर्वेद्युरुदयेनिरविद्धोरन्यतराग्राह्या।किंवानिश्चायकंशास्त्रमस्तीति।तत्रतावच्छास्त्रंकिंचित्पश्यामः।अनुनसर्वतोमुखत
कथमात्मनोंतरविद्धयोरुभयोःसमबलत्वंशास्त्रेणावगम्यते।अतोग्रीष्मेजलमयेवेत्यादिवदेतेषिकोविकल्पावगंतव्यः।नचाष्ट
दोषग्रस्तत्वाद्विकल्पेनसुकरंतिथंकर्तुमशक्यं।गतंतरमभ्युपेत्यदोषग्रस्तस्यापिवशास्त्रंश्रयणीयत्वात्।तदुक्तमाचार्यैः।एकमेवोदृष्टं
नाथदृष्टंहियवाक्ययोः।विकल्पआश्रितस्तत्रगतिरन्यानविद्यतइति।तस्मादेतिकोविकल्पइतिप्रोक्तत्वात्।अस्यत्रवचनेवसरो
पकं।तथाचमार्कंडेयःपुरुषपक्षेतिथिर्ग्राह्यास्यामभ्युदितोरविरिति।नत्वेनेनवच
नेनपक्षभेदेनविकल्पआश्रितः।तथासतिदोषाष्टकस्यतादवस्थ्यादेतिकविकल्पएवकुतोनस्यात्।त्रियतइतिचेन्मैवं।सति
ह्यवस्थापके शास्त्रेपुरुषेच्छामाअप्रसरात्।अतएवस्मर्यते।उदासीनेतुशास्त्रार्थेपुरुषेच्छानियामिकेति।ननुपक्षभेदेनव
स्थानुपपन्नास्कंदपुराणेपूर्वविद्धामाएवग्राह्यतत्राभिधानात्।दशमीयेवकर्तव्यासदुर्गादिव्रतासन्नमेति।सदुक्तानिवमी मिश्राशे
वं।पक्षभेदेपूर्वविद्धास्वीकारेरूढिबाधापरमाघेनेति।परविद्धाविधानस्यनिरवकाशत्वप्रसंगात्।नवमीमिश्रत्वंचनेतुकृष्णपक्षेचरितार्थं
मनुपरविद्धानिषेधोव्रतमेवैतेपठंते।प्रतिपत्संयुतामुख्यासाविद्धावटपूर्णिमा।नवमीदशमीचैवनोपोष्यापरसंयुतादृढं।स्कंदपुराणे।अहो
विद्धातुसाकूर्णाद्वादशीमकरेस्थिता।अनुगानश्चवंद्राक्षाश्चवेनिष्फलाःस्मृताः।अनेकारणात्।तत्रादशम्याश्चकूर्णात्पादे का
दशीविद्धाद्वादशीनिष्फलेतिगम्यते।कुतः।अयमनिषेधःपूर्वेद्युरन्यत्रैवनकृष्णपक्षविषयतयाभोजनीयः।तस्मात्पूर्वेद्युरवि
द्धयोर्दशम्योर्मध्येपरयाद्वादशीयोगे।मुक्तानदूषितायस्मात्तिथिभिःसास्सदेतोमुखीति।यथासंपूर्णदोषरहितातथाविद्धापि।प्र श्रीगजानन

दानादिकंचेत्पुण्यंतिथिर्द्विधा।उपवासव्रतायंतीवानिष्कामस्वरूपः।द्वैविध्यंचनस्याद्विविधैवेत्यवसीयते।उपवासविधिवाक्ये प्रमाण

DR BHAU DAJI

द्वैरूप्य

पवासस्तुल्यविरुद्धं। यदि बुधोरोहस्यसदृशोदृष्टांतोपेक्षितस्तर्ह्यग्निहोत्रादिर्दृष्टांतोस्तु। नह्यग्निहोत्रंकर्मसंतत्यैतस्यस्वयमेवकर्मतुलात्
। तस्यचनित्यत्वंकर्म्यत्वेवाक्यादवगम्यते। यावज्जीवमग्निहोत्रंजुहोतीतिनित्यत्वावगमकंवाक्यं। अग्निहोत्रंजुहुयात्स्वर्गकामइ
तिकाम्यत्वावगमकं। तस्यचकर्मतुलाभावेनकेवलंपुरुषार्थतैव। अतोग्निहोत्रेनित्यत्वकाम्यत्वेतिद्वैरूप्यमस्ति। तत्रशब्दंन
राभासादिकर्मभेदेहेतुभावेनैकस्यैकर्मणःप्रयो गभेदादवगंतव्यं। प्रयोगभेदश्चस्वभावज्ञीवाधिकरणेनिर्णीतः। तस्माच्चाधिक
रणस्यसंग्राहकावेतौश्लोकौभवतः। यावज्जीवंजुहोतीतिधर्मैःकर्मणिनुंसिवा। कालसाकल्यधर्मेतिः काम्यएकःप्रयुज्यतां। न
कालेजीवनंतेननिमित्तंप्रविभागतः। काम्यप्रयोगोभिन्नःस्याद्यावज्जीवप्रयोगतइति। अथमर्थः। अग्निहोत्रंजुहुयात्स्वर्गकाम
इतिकाम्याग्निहोत्रंश्रूयते। तथावाक्यांतरंपठ्यते। वैयोज्ञीवमग्निहोत्रंजुहोतीति। तत्रसंशयः। किंयावज्जीवंनित्यत्वेनाधि
कारांतरंबोध्यते। किंवाकाम्याग्निहोत्रेगुणविधिरिति। तदेवमर्थांतरत्वेता। किंवायावज्जीवंनित्यस्याग्नेः कर्मधर्मः। उतपु
रुषधर्मइति। आद्यज्ञीवंनित्यत्वेनपुरुषायुषपरिमितःकालोभिधीयते। काम्येनचाग्निहोत्रेणकालविशेषआकांक्षितः।
तस्यचकालस्यैतन्नसमर्पणादयंकर्मधर्मः। तस्मादुभयविधिः। तथाचाग्निहोत्रस्यकाम्यस्यप्रयोगएकएवनत्वनेनेति
सहृतिप्राप्तेब्रूमः। यावज्जीवहोमेनकालस्यवाचकः। किंतुलक्षकः। वाच्यार्थस्तुकृत्स्नज्ञीवनं। तच्चनकर्मधर्मत्वेन
विधातुंशक्यंपुरुषधर्मत्वादिति। प्राणधारणमभिधत्ते। नतुकालंप्राणधारणंचपुरुषधर्मकालस्यतदसंभवा
त्तेनस्वर्गकामनेवज्ञीवनमपिकिंचिन्निमित्तं। तस्माद्धिकारांतरयोदना। तथासतिज्ञीवनमित्तोनित्यःप्रयो ६२
गः। कामनिमित्तःकादाचित्कप्रयोगश्चश्रुत्यरभिधत्तइतिसिद्धांतः। तेनाग्निहोत्रन्यायेनप्रकृतस्याप्युपवासस्यैकत्वेन

स्यनिमित्तभेदेननित्यः प्रयोगःकाम्यप्रयोगश्चास्तु॥ननुकस्यकर्मणःकालभेदेनकर्तृभेदेनवाविनाहोप्रयोगोनभवतः। नचा
त्रकालभेदः संभवति। नित्यकाम्ययोरुपवासयोरुभयोरप्येकादश्यामेवविधानान्नाप्यत्रकर्तृभेदोस्ति॥ननुपिकाम्यंप
रित्यक्तुंकेवलंनित्यमनुष्ठातुंशक्यंनतथापिकाम्यमनुतिष्ठासुनानित्यस्यपरित्यक्तुंशक्यत्वात्। अतःकर्त्रैक्यात्का
ल्यैक्याच्चनित्यकाम्यरूपोहोप्रयोगोनघटते। नायंदोषः। विविदिषाधिकरणन्यायेनसकृदेवानुष्ठितेप्रयोगहृयसिध्येः
तस्यचाधिकरणस्यसंग्राहकावेतौश्लोकौभवतः। विद्यार्थमाश्रयार्थंचहिःप्रयोगोथवासकृत्। प्रयोजनविभेदेनप्रयो
गोपिविभिद्यते। आद्यार्थंमुक्तसाकल्यैःस्यात्तत्रियार्थेनाश्रयस्तथा॥ अनित्यनित्यसंयोगउक्तिभ्यांस्वादिरेमतइति
अयमर्थः॥तमेतंवेदानुवचनेनब्राह्मणाविविदिषंति। यज्ञेनदानेनतपसानाशकेनेतिश्रुतिस्मृतिषुश्रुतिवा
क्यपरमात्मविद्यायांयज्ञादयोविहिताःगृहस्थाद्याश्रमधर्मत्वंतुयज्ञादीनांसर्वश्रुतिस्मृतिषुश्रुतिवाक्यं। तत्रसंशयः। किंयज्ञा
दीनांहिःप्रयोगउतसकृदितितत्रप्रयोजनभेदात्प्रयोगभेदइतिपूर्वःपक्षः। निमंत्रितेनब्राह्मणेनक्रियमाणस्यभोजनस्य
दृष्टप्रयोजनेअन्यकर्तृकश्राद्धनिष्पत्तिःस्वत्तस्तिश्चनचदृष्टभुज्यते। तथाब्रह्मविद्यार्थमनुष्ठितेनयज्ञादिकर्मणाप्रयोज
नदृष्टंसिध्यति। ननुनित्यानित्यसंयोगविरोधः। स्वादिरवदाक्यंहृयेनतच्चपूर्वमुपपादितं। तस्मात्सकृदेवप्रयोगइ
ति। एवमत्रापिसकृदेवोपवासंकुर्वतःकाम्यप्रयोगोनित्यप्रयोगश्चेतुभयंसिध्यति। ननुसकृदनुष्ठानेननेनकार्थसिद्धिर्दृष्टा

भवति। तंत्रेणवाप्रसंगेनवा। तद्यथादर्शपूर्णमासयोः षष्ठंप्रधानयागानांमध्येत्रयाणांत्रयाणांसकृत्सकृदनुष्ठितेनप्रयाजाघंगेनोपकारःसिध्यति। तदिदंतंत्रेपश्वर्थमनुष्ठितेनप्रयाजादिनापशुतंत्रमध्यपातिनःपशुपुरोडाशस्याप्युपकारःसिध्यति। सोयंप्रसंगः। एवंसतिप्रकृतेपितंत्रप्रसंगयोःकतरस्योपादानमितिचेन्नप्रसंगस्यतिब्रूमः। काम्यप्रयोगेणेवनित्यप्रयोगस्यापिसिध्यत्वात्। तथाचस्मृतिः। काम्येपिनित्यसिध्यिःस्यात्प्रसंगेनोभयात्मकइति। तदेवमेकादश्युपवासस्यनित्यत्वकाम्यत्वलक्षणेद्वैरूप्यविरोधाभावाद्द्वैरूप्यमभ्युपेयमितिस्थितं। अत्रोपवासांगतासिध्यिनिर्णयस्यवेधाधीनत्वात्प्रथमंदशमीवेधोनिरूप्यते। सचवेधस्त्रिविधः। अरुणोदयवेधः। सूर्योदयवेधः। पंचदशनाडीवेधश्चेति। तत्राद्यारुणोदयवेधोभविष्यत्पुराणेदर्शितः। अरुणोदयकालेतुदशमीयदिदृश्यते। साविद्धैकादशीतत्रोपवासेफलमुपोषणमिति। अरुणोदयवेलायांदिशांगंधोभवेद्यदि। दुष्टंतंतुप्रयत्नेनवर्जनीयंनराधिपेति। मारुडपुराणेपि॥ दशमीवेधसंमुक्तोयदिस्यादरुणोदयेनैवोपोष्यंवैष्णवेनतद्दिनैकादशीव्रतमिति। अरुणोदयस्यप्रमाणंस्कंदनारदाभ्यामुक्तं। उदयात्प्राक्चतस्रस्तुनाडिकाअरुणोदयइति। तस्मिन्नरुणोदयवेधाबहुविधास्तेप्रोक्तराभ्यांब्रह्मवैवर्तेदर्शिताः। कीदृशस्तुभवेद्वेधोयोगोनिर्द्रकीदृशः। योगविधौमामाचक्ष्वमाभ्यांदुष्टमुपोषणं। चतस्रोघटिकाप्रातररुणोदयनिश्चयः। चतुष्टयविभागात्रवेधादीनांकिलोदितः। अरुणोदयवेधः

स्यात्सार्धतुघटिकात्रयं। अतिवेधोहिघटिकःप्रभासंदर्शनाद्रवेः। महावेधोपितत्रैवदृश्यतेकोनदृश्यते। तुरीयस्तत्रविहितोयोगःस्मृतौदृश्येसतीति। अयमर्थः। वेधातिवेधमहावेधयोगवेधाश्चत्वारउपवासस्यदूषकाः। तत्ररवेःप्रभासंदर्शनात्पूर्वंसार्धघटिकात्रयमेकादश्याव्याप्तंततःप्राचीनेघटिकार्धेअरुणोदयसंबंधिनीदशमीसद्भावेवेधदुष्टोच्यते। यदासूर्यस्यदर्शनात्पूर्वंघटिकादयमुपरितनमेकादशीव्याप्तंपूर्वंतुघटिकाद्वयंदशमीव्याप्तंतदानीमतिवेधदुष्टोच्यते। यदासूर्यस्यदर्शनादर्शनसंदेहकालमेकादशीप्राप्नोति। ततःप्राक्कृत्स्नोप्यरुणोदयकालोदशमीव्याप्तस्तदामहावेधः। यदासूर्योदयस्पृष्टेसतिपश्चादेकादशीप्रवृत्तातनतः। प्राच्यामुदयवेलायांदशमीविद्धतेतदायोगशब्देनाभिधेयोदोषोभवति। सचवेधाद्यपेक्षयातुरीयोभवतीति॥ ननुअरुणोदयात्पूर्वमर्धरात्रात्परतोपिदशमीकलाविद्धेतेतदानोपवासःकर्तव्यः। तदभावेतूपवासःकर्तव्यः। तथाचस्मृतिः। अर्धरात्रात्परायत्रएकादशुपलभ्यते। तत्रोपवासःकर्तव्योनतुवेदशमीकलेति। अतोयथानिर्दिष्टेभ्योन्योपिकश्चिद्वेधोस्तीतिवेत्तमेवं। अर्धरात्रेवेधोपियद्यवर्ज्यस्तदावक्तव्यंकिंतुअरुणोदयवेधदूतिनकुमर्धरात्रवेधउपन्यस्तोनतुवेधाभिप्रायेण। तदेवब्रह्मवैवर्तेशौनकेनस्पष्टीकृतं। अर्धरात्रेतुकेषांचिद्दशम्योवेधदूष्यतेअरुणोदयवेलायानावकाशोविचारणे। कपालवेधदूत्याहुराचार्याये हरिप्रियाः। नतन्ममतं। यस्मात्त्रियामारात्रिरित्यतइति। यएतेवेधातिवेधमहावेधयोगाःपूर्वमभिहितास्तेषुत्रयोरुणोदयवेधाश्चतुर्थउदयवेधः। तत्रोदयवेधं

कण्वोप्याह उदयेापरिविद्धातुदश्म्येकादशीयदा॥दानवेभ्यःश्रीणनार्थंदत्तंप्राक्शशनरूति।स्मृत्यंतरेपिदश्म्याःप्रांतमादा
यरवोदेतिदिवाकरः।तेनस्पृष्टंहरिर्दिनंदत्तंजंभासुरायत्रिति।नवमदश्मनाडीवेधस्तुस्कंदपुराणेदर्शितः।नागोद्दादश्मनाडी
भिर्दिक्पंचदश्मिस्तथा।भूतोष्टादश्मनाडीभिर्दूषयत्युत्तरांतिथिमिति।तदेवंवेधत्रयंनिरूपितं।तत्रपंचदश्मनाडीवेध
स्यवेधांतरस्यचविषयव्यवस्थानिगमेदर्शिता।सर्वप्रकारवेधायमुपावासस्यदूषकः।सार्धसप्तमुहूर्तस्तुवेधोयांबाधेत
व्रतमिति।सर्वत्रप्रकारइत्यत्रप्रकारशब्देनकलाकाष्ठादयोवेधातिवेधांदयोवाग्राह्यंते।नात्रतिथ्यंतरवत्त्रिमुहूर्तस्तवेधः
पेक्षितं।किंतुलवकलार्धादिकमपिपर्याप्तं।तदुक्तंभास्करीये।लववेधविविद्धेद्दश्म्येकादशीसजेत्।सुरायाबिंदुनास्पृष्टं
गंगांभइवनिर्मलमिति।स्कंदपुराणेपि।कलाकाष्ठादिगस्येवदृश्यतेदशमीविभो।एकादश्यांनकर्तव्यंव्रतंराजन्कदाचने
ति।स्मृत्यंतरेपि।कलार्धेनापिविद्धास्याद्दश्म्येकादशीयदि।तदाप्येकादशीहित्वाद्दादशीस्समुपोषयेदिति।सोयंकला
काष्ठादिवेधोरुणोदयेसूर्योदयेचसमाप्तः॥तत्रारुणोदयवेधोवैष्णवविषयः।तत्रभारुडपुराणेविस्पष्टमवगम्यते॥
दशमीशेषसंयुक्तोयदिस्यादरुणोदयः।नैवोपोष्यंवैष्णवेनतद्दिनेकादशीव्रतमिति।वैखानसपंचरात्रादिवैष्णवागमो
क्तदीक्षाप्राप्तावैष्णवः।अतएवस्कंदपुराणेवैष्णवस्वरूपमभिहितं।परामापदमापन्नोहर्षवासमुपस्थिते।नैकाद
शीसंजेद्यस्तुमस्यदीक्षास्तिवैष्णवी।समात्मासर्वजीवेषुनिजाचाराद्विनुतः।विष्णुर्पिताखिलाचारःसहिवैष्ण
वउच्यतइति।विष्णुपुराणेपि।नचलतिनिजवर्णधर्मतोयःसमम तिरात्मसुहृद्विपक्षपक्षे।नहरतिनचहंतिकंचि
दुक्तेःसितमनसंतमवेहिविष्णुभक्तमिति।यथोक्तगुणसंपन्नोगुरुर्दीक्षांप्रदायस्तंप्रतिरेवंतिथिर्निर्णेतव्या।एकादशी श्रीगजानन

६३

दिधा।अरुणोदयवेधवतीशुद्धाचेति।तत्रवेधवतीसर्वथात्याज्या।तद्दिनेकादशीव्रतमितिगारुडपुराणेसामान्येनप्रतिषेधात्।विशेषस्तु
संपूर्णादिभेदेनप्रतिषेधोद्रष्टव्यः।मदनेवेधातिवेधमहावेधयोगाख्यादोषाःपूर्वमुक्ताःतेषुसत्सुकादशीसंपूर्णसंदिग्धसंयुक्तसं
कीर्णनामभिर्व्यवह्रियते।अरुणोदयस्यप्रथमघटिकायांदश्मीसद्भावेवेधरूपदोषः।सचद्विविधः।घटिकाप्रारंभकृत्स्नघटि
कायांचदश्मीवृत्तिभेदात्।तत्राप्रारंभमात्रेदश्मीयुक्तैकादशीसंपूर्णमुच्यते।कृत्स्नघटिकावृत्तिदश्मीयुक्तैकादशीसं
दिग्धा।अरुणोदयप्रथममुहूर्तदश्मीव्याप्तिरितिवेधः।तदुपेतैकादशीसंयुक्तमुच्यते।सूर्यमंडलदर्शनसदेहवेलायां
दश्मीसद्भावोमहावेधस्तद्युक्तैकादशीसंकीर्णमुच्यते।एताःसंपूर्णादयश्चतस्रोपित्याज्याः॥तथाचवसिष्ठः।अरुणोद
यवेलायांदश्मीयदिसंगता।संपूर्णैकादशीतांतुमोहित्वेत्तत्वान्विभुरिति।गारुडपुराणेउदयात्प्राक्त्रिघटिकायापि
त्येकादशीयदा।संदिग्धैकादशीनामवर्ज्यंयंधर्मकांक्षिभिःउदयात्प्राक्मुहूर्तेनयापित्येकादशीयदा।संयुक्तैकादशीना
मवर्जनेशर्मसिद्धये।आदित्योदयवेलायाआरभ्यषष्टिनाडिका।संकीर्णैकादशीनामत्याज्याधर्मफलैषुभिःपुत्रपौत्रप्र
वृध्यर्थंद्वादश्यामुपवासयेत्।तत्रक्रतुश्चतुष्पंत्रयोदश्यंतुपारणमिति।अत्रापिपूर्ववत्रिवेधवाक्यसाधर्म्यंतुघटिकात्रयमित्यु
क्तं।अत्रतुसंदिग्धैकादशीवाक्येत्रिघटिकेत्युक्तंतथापिनैतावतावैषम्येणविरोधःशंकनीयः।एतस्मात्कारणात्स्यादपिदश्मी
वेधत्यागपरत्वात्।तदेवंसामान्यविशेषाभ्यांप्रतिषिध्यत्वादरुणोदयविद्धैकादशीवैष्णवेनपरित्याज्या।यस्तुयोगसंज्ञक
श्चतुर्योवेधस्तत्रत्याज्यत्वमर्थात्सिद्धं।अरुणोदयवेधोपियदात्याज्यतेतदाकिमुवक्तव्यंसूर्योदयवेधइति।वचनंतत्रकण्वप्राक्तं

पूर्वमेवोदाहृतं। यानु चतुर्विधवेधरहितानुपैकादशीसा विविधा। आधिक्येनयुक्ता तद्रहिता आधिक्यंच त्रिविधं। एकादश्याधिक्यं द्वादश्याधिक्यमुभयाधिक्यमिति। त्रिष्वप्येतेषुपक्षेषुत्ररुणोदयमारभ्यप्रवृत्तांशुक्लामप्येकादशीपरित्यज्यपरेह्युरुपवासः कर्तव्यः। तत्रैकादश्याधिक्येनारदआह। संपूर्णैकादशीयत्रद्वादश्यांदृश्यिगामिनी। द्वादशीलंघनेकार्यंत्रयोदश्यांतुपारणमिति। स्मृत्यंतरेपि॥ एकादशीयदापूर्णापरतःपुनरेवसा। पुण्यंक्रतुशतस्योक्तंत्रयोदश्यांतुपारणमिति। विष्णुरहस्येपि। एकादशीकलाप्राप्ता येनद्वादशुपोषिता। तुल्यंक्रतुशतस्योक्तंत्रयोदश्यांतुपारणमिति। द्वादश्याधिक्येव्यासआह। एकादशीयदाकुर्यापरतोद्वादशीभवेत्। उपोष्याद्वादशीतत्रयदिच्छत्परमांगतिमिति। उभयाधिक्येभृगुराह। संपूर्णैकादशीयत्रप्रभातेपुनरेवसा। तत्रोपोष्याद्वितीयातुपरतोद्वादशीयदि। नारदेपि। संपूर्णैकादशीयत्रप्रभातेपुनरेवसा। सर्वैरेवोत्तरैकार्यापरतोद्वादशी यदीति। स्मृत्यंतरेपि। एकादशीभवेत्पूर्णापरतोद्वादशीयदि। एकादशीपरित्यज्यद्वादशीमुपोषयेदिति। उभयाधिक्यरहितायांतुशुक्लैकादशीपरेह्युरुदयादूर्ध्वंनास्तिकिंतूदयेसमातोन्यूनावा। द्वयोरपिपक्षयोर्द्वादशीपरेह्युरुदयेसमान्यूनाधिकावाभवतितत्रसर्वत्रशुक्लैकादशीउपोष्या। नत्वविद्धांवैष्णवीद्वादशीमुपवसेदित्यर्थः। एवंचसतिप्रकृतेद्वादश्याधिक्येपिएकादशीसमान्यूनयोरत्यल्पत्वमेवोपोष्यात्वंकंभवति। उभयाधिक्येपरेह्युरुपवासोगारुडपुराणेदर्शितः। संपूर्णैकादशीयत्रप्रभातेपुनरेवसा। तत्रोपोष्यापरत्वंपरेह्युः द्वादशीयदीति। कारस्कृत्पुराणेपि। एकादशीविष्णुनाचद्वादशीपरतःस्थिता। उपोष्याद्वादशीतत्रयदिच्छेत्परमंपदमिति। स्मृत्यंतरेपि। संपूर्णैकादशीयत्रप्रभातेपुनरेवसा। वैष्णवीचत्रयोदश्याघटिकैकापिदृश्यते। महत्योपिपरांकुर्यात्सर्वानोपवसेत्तदा। पूर्णाप्येकादशीसाज्याभर्तेहितयंयदीति। एवमेकैक्याधिक्येहितीयाधिक्येपिनिर्णयोदर्शितः। अतुभयाधिक्येतुनास्तिसंदेहः। दृश्यतेशुक्लायांचत्वारोभेदाव्यवस्थिताः। अथविद्धायांचत्वारोभेदाव्य

उपोष्येदेतिथीतत्रविष्णुप्रीणनतत्परैरिति। उभयोरधिकारिभेदेनव्यवस्थास्कंदपुराणेदर्शिता। प्रथमेहनिसंपूर्णाव्याप्याहोरात्रसंयुता
द्वादश्यांचतथातातद्दृश्यतेपुनरेवच। पूर्वाकारग्रहस्त्वेतत्रयतिथिप्रभोतुरविभोरिति। एतच्चपरेह्युर्द्वादश्यभावविषयं। तथाचस्कंदेतरे
पुनःप्रभातसमयेघटिकैकायदाभवेत्। अत्रोपवासोविहितश्चतुर्थीस्त्रमंवासिनां। विधावायाश्चतत्रैवपरतोद्वादशीनचेदिति।
गारुडपुराणेपि। पुनःप्रभातसमयेघटिकैकायदाभवेत्। अत्रोपवासोविहितोवनस्थस्ययतेस्तथा। विधावायाश्चतत्रैवपरतो
द्वादशीनचेदिति। पुराणांतरेपि। एकादशीयदापूर्णापरतःपुनरेवसा। पुण्यंक्रतुशतस्योक्तंत्रयोदश्यांतुपारणमिति। एकाद
श्याधिक्यपक्षेग्रहियुक्तोयंव्यवस्थाभिहिता। द्वादशाधिक्येपूर्वंयुरुपवासमाहनारदः। नचेदेकादशीविद्धोद्वादशीपरतःस्थिता। उपो
ह्यैकादशीतत्रयादिच्छेत्परमंपदमिति। स्कांदेपि। सुधायरासमाहीनासमक्षीणाधिकोत्तरा। एकादश्यमुपवसेन्नसुधांवैष्णवीम
तिति। दशमीवेधरहितामुपैकादशीपरेह्युरुदयादूर्ध्वंनास्तिकिंतूदयेसमातोन्यूनावा। द्वयोरपिपक्षयोर्द्वादशीपरेह्युरुदयेस
मान्यूनाधिकावाभवतितत्रसर्वत्रशुक्लैकादशीउपोष्या। नत्वविद्धांवैष्णवीद्वादशीमुपवसेदित्यर्थः। एवंचसतिप्रकृतेद्वादश्याधि
क्येपिएकादशीसमान्यूनयोरत्यल्पत्वमेवोपोष्यात्वंकंभवति। उभयाधिक्येपरेह्युरुपवासोगारुडपुराणेदर्शितः। संपूर्णै
कादशीयत्रप्रभातेपुनरेवसा। तत्रोपोष्यापरत्वंपरेह्युः द्वादशीयदीति। कारस्कृत्पुराणेपि। एकादशीविष्णुनाचद्वादशीपरतः
स्थिता। उपोष्याद्वादशीतत्रयदिच्छेत्परमंपदमिति। स्मृत्यंतरेपि। संपूर्णैकादशीयत्रप्रभातेपुनरेवसा। वैष्णवीचत्रयोदश्याघ
टिकैकापिदृश्यते। महत्योपिपरांकुर्यात्सर्वानोपवसेत्तदा। पूर्णाप्येकादशीसाज्याभर्तेहितयंयदीति। एवमेकैक्याधिक्येहितीय
याधिक्येपिनिर्णयोदर्शितः। अतुभयाधिक्येतुनास्तिसंदेहः। दृश्यतेशुक्लायांचत्वारोभेदाव्यवस्थिताः। अथविद्धायांचत्वारोभेदाव्य

वस्थार्थते। तत्रैकादश्यधिक्येपूर्वविद्धहीतव्यत्वेऽर्थवस्थद्रष्टव्या। तदाहप्रचेताः। एकादशीविद्धाचेच्छुक्लकृष्णेविशेषतः। उत्तरां
तुयतिःकुर्यात्पूर्वामुपवसेद्धीति। नचैतद्वाक्यंसुप्तोधिक्येवरितार्थमितिशंकनीयं। बाधकाभावेनविधाधिक्येपितद्वचनप्रवृ
त्तेर्निवारयितुमशक्यत्वात्। द्वादश्यधिक्येपरेद्युरुपवासः। तदाहव्यासः। एकादशीयदालुप्तापरेतोद्वादशीभवेत्। उपोष्याद्वाद
शीतत्रयदिच्छेत्परमंगतिमिति। लुप्ताअरुणोदयेद्वादशीमिश्रत्वात्परेतोरध्यभावाच्चक्षयंगतेतियावत्। उभयाधिक्येपिपरेद्युरु
पवासः। तदुक्तंभविष्यत्पुराणे। एकादशीद्विशायुक्तावर्धमानेविवर्जयेत्। क्षयमार्गस्थितेसोमेकुर्वीतदशमीयुता मिति। उभ
यानाधिक्येतुनेवास्तिसंदेहः। कोद्वंतरावावात्। नचविद्धत्वादस्तिसंदेहः। तिथ्यंशस्यसतिकोद्वंतरेविद्धायाअप्युपादेयत्वात्। तथा
चविष्णुरहस्यं। एकादशीभवेत्कावित्दशम्यादूषितातिथिः। दृषिपक्षभवेद्दोषक्षयपक्षेतुपुण्यदेति। इतिविद्धाभेदाव्यवस्थापि
ताः। अत्रसुप्ताविद्धयोरुभयोरप्येषनिर्णयसंग्रहः। एकादशीद्वादश्योरुभयोरपिद्वयोपरेद्युरुपवासः। एकादशीमात्रद्वयो
र्गृहीयात्तामेवस्थाः। द्वादशीमात्रद्वयोस्तुसायांसर्वेषांपूर्वेद्युर्विद्धायांपरेद्युरिति। तदेवंशास्त्रव्यवस्थितयानितावंतिमु
निवाक्यानिविधायकानिनिषेधकानिवानानिसर्वाणियथोक्तनिर्णयाविरोधेनव्यवस्थापनीयानि। तत्रव्यवस्थापन
प्रकारदर्शयामः। स्कांदे। प्रतिपत्प्रभृतयः सर्वाउदयादेवमाद्वेवः। संपूर्णाइतिविख्याताहरिवासरवर्जिताइति। हरिवा
सरेतुसंपूर्णेप्रकारेणोक्तं। गारुडे। उदयात्प्राग्यदाविप्रमुहूर्तद्वयसंयुता। संपूर्णैकादशीज्ञेयात्रैवोपवसेद्धीति। भ
विष्यत्पुराणेपि। आदित्योदयवेलायांप्राङ्मुहूर्तद्वयान्विता। एकादशीतुसंपूर्णाविद्धान्यापरिकल्पितेति। तदेतद्वचनद्वयम
रुणोदयवेधापजीवनेनप्रवृत्तंद्वैष्णवविषयं। दशमीवेधनिंदकानितुवचनानिद्विविधानुपलभ्यंते। कानि श्रीगजानन

DR. BHAU DAJI

विद्धारुणोदयानुवादेनप्रवृत्तानिकानिचिद्धनिंदानुवादेनेति। तथाभविष्ये। अरुणोदयकालेदशमीयदिदृश्यते। तत्रनैकादशीकार्यधर्मका
र्थेनापूजनीति। कौत्सः। अरुणोदयवेलायांविद्धाकाचिदुपोषिता। तस्याःपुत्रश्चतंनष्टंतांसोपरिवर्जयेत्। एतादृशानिसर्वाणिवैष्णवविध
यानिद्रष्टव्यानि। अरुंदयानुवादमंतरेणदशमीविद्धानिंदकानिवचनान्युपलभ्यंते। तद्यथाभारते। दशम्यनुगतायत्रतिथिरेकादशी
भवेत्। तत्रापत्सुविनाशंचपरेत्वनरकंव्रजेदिति। ब्रह्मवैवर्तेपि। दशमीवेधसंयुक्तांयःकरोतिविमूढधीः। एकादशीफलंतस्यनश्यादू
द्वादशवार्षिकमिति। विष्णुरहस्ये। दशमीवेधसंयुक्तामुपोष्यैकादशीकिल। संवत्सरकृतंनेहनरो धर्मेणमुच्यतइति। इदृशानिसर्वा
णिअरुणोदयवेधदृश्यत्वसामान्येनप्रवृत्तत्वाद्वैष्णवस्मार्तोभयविषयाणि। तत्रवैष्णवविषयेनिरंकुशत्ववंतेत्। स्मार्तविषयेतूभयाधि
क्येचसर्वपुरुषविषयाणिद्रष्टव्यानि। दशमीविद्धाभ्यनुज्ञापकानिकानिचिद्धनान्युपलभ्यंते। तद्यथास्कंदपुराणे। त्रयोदश्यांनलभ्येतद्वा
दशीयदिकिंचन। उपोष्यैकादशीतत्रदशम्यमिश्रितापिचेति। स्मृत्यंतरेपि। उपोष्यैकादशीतत्रद्वादशीनभवेद्यदि। दशम्याहिविश्रेमि
श्रैवैकादश्येवधर्मकृदिति। हारीतः। हरेर्दिनंसिषेवेतद्वादशीस्वल्पमल्पापियदिसात्परेहनीति। दशमीमिश्रितांकार्यांमहापातकनाशनी
ति। ऋष्यशृंगः। एकादशीनलभ्येतद्वादशीसकलाभवेत्। उपोष्यैकादशीविद्धा ऋषिरुद्दालकोब्रवीदिति। हारीतोपि। त्रयोदश्यां
यदानष्टाद्वादशीघटिकाद्वयं। दशम्येकादशीविद्धासेवोपोष्यासदातिथिरिति। एतादृशानिवाक्यानिसर्वाण्युभयाधिक्येस
र्वविषयाणि। एकादश्याधिक्येतुस्मार्तगृहस्थमात्रविषयाणिद्रष्टव्यानि। नत्वेतानिवैष्णवविषयाणि। वैष्णवप्रकरणेषुविद्धा
भ्यनुज्ञायाअदर्शनात्। संपूर्णैकादशीपरित्यागविषयाणिकानिचिद्धनान्युपलभ्यंते। तद्यथास्कंदपुराणे। एकादशीभ
वेत्पूर्णापरतोद्वादशीयदि। तदाह्येकादशीत्युक्ताद्वादशीसमुपोषयेदिति। तथाचकालिकापुराणे। एकादशीयदापूर्णापर

नोद्वादशीभवेत्तत्रोपोष्याद्वादशीतत्रतिथिर्हिःप्रशस्यतइति।गारुडपुराणे।पूर्णाभवेद्यदानंदाभद्राचेत्क्षयिवर्धते।तदोपोष्या
तुदशमीयुताभद्रास्यात्तिथिर्हिःप्रशस्यतइति।तादृशानिसर्वाणिवेष्णवविषयाणि।द्वित्रयविषयकाणिकानिचिद्वचनान्युपलभ्यं
ते।नारदः।यदिदैवात्तुसंसिध्येदेकादश्यांदिनत्रयं।तत्रक्रतुशतंपुण्यंद्वादशीपारणंभवेदिति।कूर्मपुराणे।द्विस्पृशैकादशी
यत्रतत्रसन्निहितोहरिः।तामेवोपवसेत्कामंश्रकामोविष्णुतत्परइति।अत्राद्यंतयोर्दशमीद्वादश्योर्मध्येएकादशीत्येतद्दिनत्र
यंयदाप्नोतितदापरतोद्वादशीद्विस्पृशेसुभयंसंभवति।तत्रयद्यद्विस्तथादायेयोक्तंदिनत्रयमुपोष्यं।तदुक्तंस्कंदपुराणे
।दिनत्रयंभवेत्तत्रविनोपोष्यादशमीयुता।सैवोपोष्यासदापुण्यापरतश्चेत्रयोदशीति।द्वादशीद्विस्पृशैकादशीयदाकुत्रचित्तेनैवन्या
यवचनेनपरेद्युरुपवासइतिपूर्वमेवनिर्णीतं।यदात्वाद्यंतयोरेकादशीत्रयेदशीमध्येद्वादशीसैवनादशंविषयंदिनत्रयंतदाना
रदेनस्मर्यते।एकादशीद्वादशीचरात्रित्रिस्पृशेत्रयोदशी।त्रिस्पृशानामसाप्रोक्तात्रत्सहत्याव्यपोहतीति।तदेतद्वैष्णवविषयंयति
विषयंवाद्रष्टव्यं।गृहस्थस्तुननिषिद्धं।तथाचकूर्मपुराणे।एकादशीद्वादशीचरात्रित्रिस्पृशेत्रयोदशी।उपोष्यैवंविधंकुर्यात्पुत्रपौत्रसम
न्वितइति।पद्मपुराणेपि।एकादशीद्वादशीचरात्रित्रिस्पृशेत्रयोदशी।अहस्स्पृक्तदहोरात्रंनोपोष्यंतत्सुतार्थिभिरिति॥यत्तुक्र
व्यश्चंगेणोक्तं।अविधानेनिषिद्धेश्वनलभ्यंतेदिनानितु।मुहूर्तैःपंचभिर्विद्धाग्राह्यैवैकादशीतिथिः।तदर्थविधानिन्य
त्यानिदिनान्युपवसेन्नरः।बुधः।पूर्वविद्धानकर्तव्याषष्येकादश्ययाष्टमी।एकादशीतुकुर्वीतनशीर्यतेद्वादशीयदीति।अत्र
निषेधोयतिविषयः।विधिर्गृहस्थविषयःवैधबाहुल्यनेहयत्तत्रांकामाभूदितिपंचभिर्मुहूर्तैरित्युक्तं।तदेवंनानाविधव्य
वचनव्यवस्थापनप्रकारोस्मत्पादितः।अनयास्मत्पक्षमंदबुद्धिरपिव्यवस्थापयितुंशक्नोत्येव॥ ॥इत्युपवासतिथिर्निरूपि श्रीगजानन

ता॥ ॥अथाधिकारीनिरूप्यते॥ ॥तत्रनारदः।अष्टाब्दाधिकोमर्त्योह्यूर्णाशीतिहायनः।भुंक्तेयोमोहनंवोमोहादेकादश्यांसपा
पकृदिति।कात्यायनोपि।अष्टवर्षाधिकोमर्त्योह्यशीतिन्यूनवत्सरः।एकादश्यामुपवसेत्पक्षयोरुभयोरपीति।गृहस्थस्यतुशुक्लैका
दश्यामेवनित्योपवासः।तथाचकूर्मपुराणे।एकादश्यांनभुंजीतपक्षयोरुभयोरपीति।वानप्रस्थयतिभ्यांचशुक्लेभवसदा
गृहीति।भविष्योत्तरेपि।एकादश्यानभुंजीतपक्षयोरुभयोरपीति।ब्रह्मचारीचनारीचशुक्लेभवसदागृहीति।नारीविधवा।तस्या
एवयतिधर्मत्वात्।पतिमत्यास्तूपवासंनिषेधति।विष्णुः।पत्योजीवतियानारीउपोष्यव्रतमाचरेत्।आयुष्यंहरतेभर्तुर्नरकंचै
वगच्छतीति।मनुः।नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषणमिति।मार्कंडेयः।नारीखल्वननुज्ञातामर्त्यापित्रासुतेनवानिष्क
लंनुभवेन्नस्वर्गफलेतिव्रतादिकमिति।आदिशब्दाद्वस्त्रालंकारगंधधूपांजनानांउपसंग्रहः।तदाहमनुः।पुष्पालंकारव
स्त्राणिगंधलेपोपनुलेपनमिति।पत्युरनुमत्यानुपत्नीव्रतादिष्वधिकारिणीभवति।कात्यायनः।भार्यापत्युर्मतेनैवव्रतादीना
चरेत्सदेति।शुक्लेभवेत्येवकारःकृष्णैकादश्यामुपवासनिषेधपरः।तथाचकूर्मपुराणे।संक्रांत्याकृष्णपक्षेचरविशुक्रदि
नेतथा।एकादश्यांनकुर्वीतउपवासंचपारणमिति।गौतमोपि।आदित्येहविसंक्रांत्यामसितेकादशीषुच।अतीपातेकृ
तश्राद्धेपुत्रीनोपवसेद्गृहीति।अत्रपुत्रीतिविशेषणंपुत्रवतोदोषविशेषप्रदर्शनार्थं।तथाचपद्मपुराणे।संक्रांत्यामुप
वासेनपारणेनयुधिष्ठिर।एकादश्यांवकृष्णायांज्येष्ठःपुत्रोविनश्यति।नारदीयेपि।दुःखयाऽसंक्रांत्योरेकादश्यां
सितेतरे।उपवासंनकुर्वीतयदीच्छेत्संततंध्रुवमिति।अत्रसंक्रांत्यादिरूपवासस्यनिषेधः।संक्रांत्यादिनिमित्तकस्य।
तथाचकात्यायनः।एकादशीशुक्लकृष्णासूरविसंक्रमणेतथा।चंद्रसूर्योपरागेचनकुर्यात्पुत्रवानरहीति।तत्रयुक्तोपवासस्य

निषेधोयमुदाहृतः।प्रयुक्तस्यंतरयुक्तस्यनविधिर्ननिषेधनमिति।जैमिनिरपितन्निमित्तोपवासस्यनिषेधोयमुदाहृतः।नानु
संगकृतोग्राह्योयंतेनिसमुपोषणमिति।अयमर्थः।एकादश्युपवासस्यनित्यत्वात्संक्रांत्युपवासस्यचकाम्यत्वात्काम्योप
वासनिषेधेननित्योपवासनिषेधःसिध्यतीति।संक्रांत्यादिनिमित्तकोपवासःसंवर्तेनोक्तः।अमावास्याद्वादशीचसंक्रांति
श्चविशेषतः।एताःप्रशस्तातिथयोभानुवारस्तथैवच।अत्रस्नानंजपोहोमोदेवतानांचपूजनं।उपवासस्तथादानमेकैकं
पावनंस्मृतमिति।गृहस्थस्यशुक्लायामेवनित्योपवासःशुक्लं।नैमित्तिककाम्योपवासौतुकृष्णायामपिकर्तव्यौ।तत्रनैमित्ति
कःस्मृत्यंतरेपठ्यते।श्रवणीबोधनीमध्येयाकृष्णैकादशीभवेत्।सैवोपोष्याग्रहस्थेननान्यैकृष्णाकदाचनेति।काम्यस्तुस्क
न्दपुराणे।पित्रर्थंगतिमन्विच्छन्कृष्णायांसमुपोषयेदिति।सनत्कुमारः।भानुवारेणसंयुक्ताकृष्णासंक्रांतिसंयुता।एका
दशीसदोपोष्यासर्वसंपत्करीतिथिरिति।मत्स्यपुराणेपि।एकादश्यांतुकृष्णायामुपोष्यविधिवन्नरः।पुत्रान्नयुःसमृद्धिंच
सायुज्यंचसगच्छतीति।दिनक्षयेपुत्रवतोग्रहस्थस्योपवासोनिषिध्यः।तथाचपितामहः।एकादश्यांदिनक्षयेउपवासंक
रोतियःतस्यपुत्राविनश्यंतिमघायांपिंडतोयथेति।मत्स्यपुराणे।दिनक्षयेर्कसंक्रांतोग्रहणेचंद्रसूर्ययोःउपवासंनकु
र्वीतपुत्रपौत्रसमन्वितइति।वसिष्ठोपि।एकस्मिन्भावनेलब्धितिथीनांत्रितयंयदा।तदादिनक्षयःप्रोक्तःतत्रसाह्निकंफलमिति
फलमत्रोपवासव्यतिरिक्तदानादिजन्यंद्रष्टव्यं।उपवासस्यनिषिध्यत्वात्।ईदृशेविषयेकिंकर्तव्यमित्याकांक्षायांवामनपुराणे
पठ्यते।उपवासेनिषिध्येतुभक्ष्यंकिंचित्प्रकल्पयेत्।नदुष्यत्युपवासेनउपवासफलंलभेत्।नक्तंहविष्यान्नमनोदनंवाफलंतति ६७
लाःक्षीरमथांबुचाज्यं।यत्यंचगव्यंयदिवापिवायुःप्रशस्तमत्रोत्तरमुत्तरंचेति।उपवासासमर्थस्तुएकभक्तादीनिकुर्यात्।तथाश्रीगजान

चस्मृतिः।उपवासेत्वशक्तानांअशीतेरूर्ध्वजीविनां।एकभक्तादिकंकार्यंआहवोधायनोमुनिरिति।मार्कंडेयपुराणे।एकभक्तेन
कोननक्तेनतथैवाया।चितेनवाउपवासेनदानेनननिर्दहशिकोभवेदिति।कूर्मपुराणेपि।एकभक्तेननक्तेनस्त्रीणद्वक्षातुरःक्षिपेत्।पयोमू
लंफलंवापिननिर्दहशिकोभवेदिति।×नातिक्रमेद्दादशीतुउपवासव्रतेनवेति।स्मृत्यंतरेपि।एकभक्तेननक्तेनवालवृद्धातुरः।क्षिपेत्×
भविष्यपुराणे।एकादश्यामुपवसेन्नक्तंवापिसमाचरेदिति।नित्यकाम्ययोरशक्तौक्रमेणविधिंकारयेयुः।तथाचविष्णुरहस्ये।
असामर्थ्यशरीरस्यव्रतेचसमुपस्थिते।कारयेद्धर्मपत्नीवांपुत्रंवाविनयान्वितइतिशैवेनसिः।भार्यापुत्रैःकुर्याद्वार्चावा
श्वपतिव्रतं।असामर्थ्येपरस्ताभ्यांव्रतभंगोनजायतइति।स्कंदपुराणे।पुत्रंवाविनयोपेतंभगिनींभ्रातरंतथा।एतामभा
वेकन्यांब्राह्मणंविनियोजयेत्।भ्रातरंभगिनींशिष्यंकारयेद्ब्राह्मणादिभिरिति।स्मृत्यंतरेपि।पित्रोर्मातरंपतिंभ्रातरंश्वश्रूर्गु
रूंवाभूमुजां।अदत्त्वार्थंसुपोषितास्वयंचफलभाग्भवेदिति।कात्यायनः।पित्रोर्मातरंस्वस्रोर्भ्रातुर्गुरोर्धर्मेविनियोक्तव्यः।उपवासंप्र
कुर्वाणःपुण्यंशतगुणंलभेत।दक्षिणानात्रदातव्याशुश्रूषाविहितावुधा।नारीवपतिमुद्दिश्यएकादश्यामुपोषिता।पु
ण्यंशतगुणंप्राप्तुमिच्छःपारदर्शिनः।उपवासफलंतस्याःपतिःप्राप्नोत्यसंशयं।एवमस्त्रीक्षत्रियार्थेवएकादश्यामुपोषि
तः।पुत्रोधाःक्षत्रियस्यार्धंफलंप्राप्नोत्यसंशयं।पित्रादीनुद्दिश्यएकादश्यामुपोषिते।फलेनतुतत्फलंविप्रास्त
मश्नंफलमाप्नुयुः।कर्तादशगुणंपुण्यंप्राप्नोत्यत्रनसंशयः।यद्दिमुह्यकृतंसोपिसंपूर्णंफलमाप्नुयादिति।अतिनिधो
वकश्चिद्विष्णोः स्मर्यते।काम्यप्रतिनिधिर्नास्तिनित्येनैमित्तिकेवसः।काम्यंपुत्रक्रमाद्वंकेवित्प्रतिनिधिंविदुरिति।अ
यमर्थः।नित्यंनैमित्तिकंचप्रतिनिधिनाप्युपक्रम्यकारयेत्।काम्यंतुस्वसामर्थ्यंपरीक्ष्यस्वयमेवोपक्रम्यकुर्यात्।असामर्थ्येउ

पक्षमादूर्ध्वं प्रतिनिधिना पितत्कारयेत्। उपवासाकरणेप्रायश्चित्तं स्मर्यते। अष्म्यांचचतुर्दश्यांदिवा भुक्त्वेदंवरेत्। एकादश्यांदि
वारात्रौनक्तंचैवतुपर्वणीति। स्मृतिसंतरे। अर्केपर्वद्वयेरात्रौचतुर्दश्यमावसी दिवा। एकादश्यामहोरात्रं भुक्त्वाचांद्रायणंचरेत्। अथका
म्योपवासक्रमः। तत्रांगिराः। सायमाद्यंतयोर्होः सायंप्रातश्चमध्यमे। उपवासफलंत्रेसुर्जघाद्भक्तचतुष्टयमिति। देवलः। दश्म्या
मेकभक्तंतुरमांसमैथुनवर्जितः। एकादशीमुपवसेत्पक्षयोरुभयोरपि। देवतास्तस्यतुष्यंतिकामितंतस्यसिध्यतीति। बृहस्पति
रपि। दिवानिद्रांपरान्नंचपुनर्भोजनमैथुने। क्षौद्रंकांस्यामिषंतैलंद्वादश्यामष्टवर्जयेदिति। कूर्मपुराणे। कांस्यंमांसंमसूरां
श्चणकान्कोरदूषकान्। शाकंमधुपरान्नंचत्यजेदुपवसंस्त्रियमिति। स्मृत्यंतरेपि। श्राद्धकृन्मांसमसूरांश्चपुनर्भोजनमैथुने
। द्यूतमद्यंदुष्पानंचदश्म्यांवैष्णवस्त्यजेत्। विष्णुधर्मे। असंभाष्यानहिंसाभाष्यमुक्तस्यनसिकादलं। आमलक्याफलंवापिपाराणे
प्राश्यशुध्यति। असकृज्जलपानंचदिवास्वापंचमैथुनं। तांबूलंचनवर्णमांसंवर्जयेद्व्रतवासरइति। वसिष्ठः। उपवासेतथाश्राद्धे
नखादंतधावनं। दंतानांकाष्ठसंयोगोहंतिसप्तकुलानिचेति। दंतधावनप्रायश्चित्तंविष्णुरहस्ये। अथोपवासदिवसस्य
दिवादंतधावनं। गायत्र्याःशतसंपूतमंबुप्राश्यविशुध्यतीति। हारीतः। पतितपाखंडिनास्तिकसंभाषणमनृताश्लीलादि
कमुपवासादिकेषुवर्जयेदिति। कूर्मपुराणे। न हिंस्रामांसजात्सूतिंपतितंचरजस्वलां। नस्पृशेन्नाभिभाषेतनेक्षेतव्रतवासरे
इति। विष्णुरहस्ये। स्मृतिलोकनृगंधादिस्वादनेपरिकीर्तनं। अन्नस्यवर्जयेत्स्वंग्रासानाचाभिक्षणं। गात्राभ्यंगंशिरोभ्यंग
तांबूलंचानुलेपनं। व्रतस्थोवर्जयेत्स्वंचान्यत्रनिराकृतमिति। अत्रांडपुराणेपि। कांस्यंमांसंसुरांक्षौद्रंलोभंवितथभा
षणं। आयासंचप्रवासंचदिवास्वप्नंतथांजनं। तिलपिष्टंमसूरांश्चश्राद्धेतानिवैष्णवः। द्वादश्यांवर्जयेन्नित्यंसर्वपापैः प्रमुच्यत श्रीगजानन

६८

इति। एकादश्यांश्राद्धंकृत्वापिनभोक्तव्यंतदाहकात्यायनः। उपवासोयदानित्यःश्राद्धंनैमित्तिकंभवेत्। उपवासंतदाकुर्यादाद्यापि
त्सेवितमिति। वचनंचैवं। श्राद्धंकृत्वातुयोविप्रोनभुंक्तेपितृसेवितं। हविर्देवानगृह्णंतिकव्यंचपितरस्तथेति। तदेकादशीव्यतिरिक्त
विषयं। आद्यापेनापिभोजनकार्यसिध्यति। नस्वभोजनकार्यविधानात्। अथमिहव्रतानुष्ठानक्रमः। प्रथमंदश्म्यामेकभक्तंकृत्वा
ऽनंतरंदंतधावनंकुर्यात्। तथाचस्मर्यते। दश्म्योमेकभुग्भूत्वारात्रौदंतधावनमिति। तदनंतरंदश्म्यांरात्रौनियममत्रस्मरणंकुर्यात्
। तदुक्तंब्रह्मवैवर्ते। प्राप्तेहरिदिनेसम्यग्विधायनियमंनिशि। दश्म्यामुपवासस्यत्रकुर्याद्वैष्णवंव्रतमिति। नियमोनारदीये।
स्मर्यते। असारलवणाःसर्वेहविष्यान्ननिषेविणः। अवनीतल्पशयनाभिषासंगविवर्जिताइति। ततःप्रातरुत्थायैकादश्यांवा
द्यभ्यंतरशुचिंविदध्यात्। तत्रकारस्तु। शरीरमंतःकरणोपघातंवावश्चविष्णुर्भगवान्नरेशं। शमंनयत्सुमेहशमेपापादनंते
हृदिसंनिविष्टं। अंतःशुचिंबहिःशुचिंश्रुधोधर्मूयोच्युतः। सकरोतुममैतस्मिन्शुचिरेवास्तुसर्वदा। व्याघोपघातानघपोमौक्षांश्रम
गयानजः। शमंनयत्वनंनात्माविष्णुश्चेतसिसंस्थितः। अनंतरंप्रातःसंकल्पंकुर्यात्। तदुक्तंवाराहपुराणे। गृहीत्वोदुंबरेपात्रेवारि
पूर्णमुदङ्मुखः। उपवासंतुगृह्णीयाद्यावार्यवधारयेत्। औदुंबरंताम्रपात्रंसंकल्पमाहविष्णुः। एकादश्यांनिराहारःस्थित्वाहमपरेह
नि। भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत। इत्युच्चार्यततोविद्वान्भुवांजलिमथापयेत्। इति। अनंतरंतत्पात्रंगतंजलं
पिबेत्। तदाहकात्यायनः। अष्टाक्षरेणमंत्रेणत्रिर्जप्तेनाभिमंत्रितं। उपवासफलंत्रेसुपिबेत्पात्रगतंजलं इति। त्रिसैकादश्यु
पवासेएत्रौसंकल्पः। तथाचनारदीये। विष्णोपवासेसकलंदिनंस्यात्कालसमाप्तहितः। एत्रोसंपूजयेद्विष्णुंसंकल्पंचतदाचरे
दिति। मध्यरात्रादुपरिदश्मीयुक्तैवेदेकादशीतस्यांमध्याह्नोपरिसंकल्पः। तथाचस्मृतिः। दश्म्याःसंगदोषेणमध्यरात्रात्परे

णतु। वर्जयेच्चतुरो यामान्संकल्पार्चनयोः सदेति। एकादश्यांदेवस्योपरि पुष्पमंडलंकारयेत्। तदुक्तंब्रह्मपुराणे। एकादश्यांशुभेपक्षनिराहारः समाहितः। नानापुष्पैर्मुनिश्रेष्ठ विचित्रंपुष्पमंडपं। कृत्वाचावरणंपश्चात्जागरंकारयेन्निशीति। तस्मिन्मंडपेदेवमर्चयेत्। तदुक्तंब्रह्मपुराणे। एकादश्यांशुभेपक्षनिराहारः समाहितः पुष्पैर्गंधैस्तथा धूपैर्दीपैर्नैवेद्यकैःपरैः। उपचारैर्बहुविधैर्नृपहोमैः प्रदक्षिणैः। स्तोत्रैर्नानाविधैर्दिव्यैर्गीतनाद्यैर्मनोहरैः। दंडवत्प्रणिपातैश्च जयशब्दैस्तथोत्तमैः। एवंसंपूज्यविधिवत्प्रजागृत्यकृतांनिशां। यातिविष्णोः परंस्थानंनरोनास्त्यत्रसंशयः। हादश्यांकर्तव्यमाह कात्यायनः। प्रातः स्नात्वाहरिंपूज्यउपवासंसमर्पयेत्। अज्ञानतिमिरांधस्यव्रतेनानेन केशव। प्रसादसुमुखोनाथ ज्ञानदृष्टिप्रदोभव। मंत्रंजपित्वाहरयेनिवेद्योपोषणंव्रती। हादश्यांपारणंकुर्यात्वर्जयित्वाद्युपोदकीमिति। स्मृतिकौस्तुभेदानार्चनरहितउपवासमात्रंकुर्यात्। तदुक्तंकूर्मपुराणे। काम्योपवासेप्रक्रांतेसंतरान्मृतसूतके। तत्रकाम्यव्रतंकुर्यादानार्चनविवर्जितमिति। वाराहपुराणे। सूतकेचनरः स्नात्वाप्रणम्यमनसाहरिं। एकादश्यांनभुंजीतव्रतमेवंनलुप्यते। मृतेकेपिनभुंजीतएकादश्यांसदानरः। हादश्यांतुसमश्नीयात्स्नात्वाविष्णुंप्रणम्येति। तत्रपरिसंख्यंदेवार्चनंसूतकांतेकुर्यात्। तदुक्तंमत्स्यपुराणे। सूतकांतेनरः स्नात्वापूजयित्वाजनार्दनं। दानंदत्त्वाविधानेनव्रतस्यफलमश्नुयादिति। स्त्रीणांरजोदर्शनेपिनव्रतत्यागः। किंतुदेवार्चनरहितंसूतकादाविवोपवासमात्रंकार्यं। तदाहचौशनसः। एकादश्यांनभुंजीतनारीदर्शेरजस्यपि। अप्यष्टमंगोपि। संप्रदत्तेपिवाजसिन्त्याज्यंहादशीव्रतमिति। स्मृत्यंतरेपि। प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत्। तत्रापिव्रतस्यास्यादुपरोधः कथंचनेति। सौम्यंतरंदेवतार्चनादिकंकुर्यात्। तथाचस्मृतिः। स्नातोभक्तुश्चतुर्थेहि भुक्तास्यात्तत्रिवारणे। पंचमेहनिभुक्तास्यादेवपित्र्येकर्मणी। श्रीज्ञानन

नित्योपवासोविष्णुरहस्येभिहितः। अथनित्योपवासीचेत्सायंप्रातर्भुजिक्रियां। वर्जयेन्नतिमान्विप्रः संप्राप्तेहरिवासरइति। त्रयोदश्यामेवतेपि। इतिविज्ञायकुर्वीतावश्यमेकादशीव्रतं। विशेषनियमासक्तोहरव्रतंभुक्तिवर्जितः। निग्रहीतेंद्रियग्रामोहरयेविष्णुतत्परः। उपोष्यैकादशीपापान्मुच्यतेनात्रसंशयः। शक्तोसत्यांनियमानाचरेत्। तथाचकात्यायनः। शक्तिमांस्तुपुनःकुर्यान्नियमंसविशेषणमिति। यदाहादश्यांश्रवणंनक्षत्रंभवेत्तदाशुद्धैकादशीमपिपरित्यज्यहादश्यामेवोपवसेत्। तथाचनारदीये। शुक्लापायदिवाकृष्णाहादशीश्रवणान्विता। तयोरेवोपवासश्चत्रयोदश्यांतुपारणमिति। तथा। एकादश्यांतविद्धायांसंप्राप्तश्रवणेतदा। उपोष्याहादशीशुद्धासर्वपापक्षयावहेति। यदात्रयोदश्यांहादश्याःकलाहयंवाचुदयेसंभवतितदाहादशीकलएवपारणंकार्यं। तदुक्तंनारदीये। भवेद्यत्रत्रयोदश्यांहादश्याश्चकलाहयं। हादशहादशीहंतित्रयोदश्यांतुपारणं। कलाहयंत्रयंवापिहादशीनातिक्रमेत्। पारणेमरणेस्त्रीणांनेतिथिस्तात्कालिकीस्मृतेति। नन्वहादश्यातिक्रमेपिनास्तिदोषः। स्मृतिथिःसकलाग्रेयतिवचनेनसाकल्याभिधानादितिचेत्। नैवं। साकल्यस्यस्नानादिविषयत्वात्। नाम्यशेषेस्नानदानजपादिष्वित्यभिधानात्। पारणेतिनसाकल्यवचनंप्रकर्षार्थमेवं। तिथिस्तात्कालिकीस्मृतेतिवचनात्। हादशीकालेयद्यपारणंतदातत्तःप्रागेवसर्वाःक्रियाःकर्तव्याः। तदुक्तंनारदीये। अल्पायामथविप्रेंद्रहादश्यामरुणोदये। स्नानार्चनक्रियाःकार्याहोमादिसंयुताः। एतस्मात्कारणाद्विप्रःप्रत्यूषेस्नानमाचरेत्। पित्रतर्पणसंयुक्तंस्वल्पांहादशीं। महाहानिकरांह्येषाहादशीलंघितात्मनां। करोतिधर्महरणंश्रस्नातेवसरवर्तिनी। गारुडपुराणेपि। यदास्वल्पाहादशीस्याद्यदाकर्षेभुजेभवेत्। प्रातर्मध्याह्निकस्यापितत्रस्यादपकर्षणमिति। स्कंदपुराणेपि। यदाभवेदतीवाल्पाहादशीपारणा

दिने।उषःकालेदृश्यंकुर्यात्पात्तर्ह्मीध्याद्रिकंतदेति।तत्रपारणासंभवेऽद्रिःपारणंकुर्यात्।तदाहकात्यायनः।संध्यादिकंभवेद्यत्र
संपारणंतुनिमित्ततः।अद्रिःस्नुपारयित्वातुभुनैस्यकांतेभुजिर्भवेदिति।देवलोपि।संकटेविषमेप्राप्तेदृश्यांपारयेत्कथं।
अद्रिस्नुपारणंकुर्यान्नदोषकृदिति।महाकलयापिहादशीनास्तिनदात्रयोदश्यामपिपारणंकुर्यात्।तदुक्तंनारदीये।त्रयोदश्यां
नुमुत्थायपारणंदृष्ट्वीफलं।शतयज्ञादिकंवापिनरःप्राप्नोत्यसंशयमिति।पारणंचनैवद्यतुलसीमिश्रितंकुर्यात्।तदुक्तं
स्कंदपुराणे।रूलाचैवोपवासंतुयोश्नातिहादशीदिने।नैवेद्यंतुलसीमिश्रंस्त्रीकोटिविनाशनमिति॥ ॥अथैकादशी
महिमा॥ ॥तत्रवसिष्ठः।एकादशीसमुत्थेनवह्निनापातकेधनं।भस्मतांयातिराजेंद्रअपिजन्माशतोद्भवमिति।नेदृशंपा
पमंकिंचिन्नरणांभुविद्यते।यादृशंपन्नानाम्यदिनंपातकहानिदं।तावत्पापानिदेहेस्तिष्ठंतिमुनिजाधिप॥मा
वृन्नोपवसेज्जंतुःपद्मनाभदिनंशुभं।अश्वमेधसहस्राणिवाजपेयशतानिच।एकादशुपवासस्यकालांनार्हंतिषोडु
शीं।एकादशीद्रियेःपापंयत्कृतंभवतित्रभो।एकादशुपवासेनतत्सर्वंविलयंव्रजेत्।एकादशीसमंकिंचित्पापघ्राणं
नविद्यते।स्वर्गमोक्षप्रदाह्येषाराज्यपुत्रप्रदायिनी।सुकलत्रप्रदाह्येषाशरीरारोग्यदायिनी।नगंगानृगयाभूपनका
शीनचपुष्करं।नचापिकोरवक्षेत्रंनरेनारदेविका।यमुनाचंद्रभागाचतुल्याभूपहरेर्दिना।अनायासेनराजेंद्रप्राप्य
तेवैष्णवंपदं।चिंतामणिसमाह्येषाह्यथवापिनिधेःसमा।संकल्पादोषप्रध्वंसादेवदेवोपमातथेति।अस्यामेकाद
श्यांयान्युपवासप्रतिनिधिरूपाणिएकभक्तनक्तायाचितादीनितेषांप्रतिपदुक्तन्यायेनोपवासस्तिथावशुद्धानं।
यानितुस्वतंत्राण्येकभक्तनक्तादीनितेषांपूर्वोक्तन्यायेनमध्याह्नादिव्यापितिथिग्रहणप्राप्तोदशमीविद्धाप्रति श्रीगजानन

DR SHAU DAJI MEMORIAL

विद्धातेहादशीकल्पे।पूर्वाविद्धांदिनार्धेनंदांपूर्णामपित्यजेत्।यदीच्छेदात्मसंतानंनित्यमेमुक्तुमिच्छपि।नोद्धिसंचनतंचैनेकभक्तमयाचि
तं।नंदायांपूर्वविद्धायांकुर्यादैश्वर्यमोहितः।एकादशीयुताश्नाद्याहादश्यासमुपोषणं।नक्तंकायाचितंनित्यंनकभक्तंतथानघ॥
नक्तंकायाचितंतातनैकभक्तमथाहरेत्।दशमीसहितंदानंमनर्थंहरिवासरः।इति।दिनार्धेनसार्धसप्तमुहूर्तेरित्यर्थः।एतदेवा
भिप्रेत्यदिरूपंचदशभिस्त्यक्त्वेत्युदाहृतं।तथासार्धसप्तमुहूर्तेस्तुवेधोयंबाधतेत्रनमितिवाहृतोन्यूनवेधस्तिथ्यवयवमध्याह्नादि
व्यासिर्गृह्यतेत्यर्थः॥ ॥इतिकादशीनिर्णयः॥ ॥अथद्वादशीनिर्णीयते॥ सात्रयुग्मादिशास्त्रेणद्वादशीविधायाद्याःस्कंदपुराणे
पि।द्वादशीचप्रकर्तव्याएकादश्यायुताविभो।सदाकार्याचविद्धाहिविष्णुभक्तैश्चमानवैरिति।उभयदिनेसंभवतिषेधतिद्वह्नि
द्धः।द्वितीयापंचमीवेधादशमीचत्रयोदशी।चतुर्दशीचोपवासेहत्युर्वेत्रिरतिथीहति।नन्वेवंसतिकादश्युपवासोद्वादशु
पवासश्चेत्युभयमेकस्मिन्दिनेप्राप्नोति।सत्यं।तथापिनोभयस्यान्योन्यंविरोधाभावात्सहेनानुष्ठानंभविष्यतीति।यथा॥नन्वेकंत्र
तंसमाप्यव्रतांतरमनुष्ठानुमशक्यं।असमाप्तेव्रतेपूर्वंनैवकुर्याद्व्रतांतरमितिशास्त्रात्।नैवं।इदंहिशास्त्रमेषव्रतस्यमध्ये
व्रतांतरेपक्रमंनिषेधति।प्रकृतेतुव्रतद्वयस्यापिसहैवोपक्रमइतितंत्रेणानुष्ठानंभविष्यति।।नन्वस्त्वंवंद्वादशीथोसंपूर्ण
तिथौतेकादशीद्वादशुपवासोहैनेरंतर्येणप्राप्तुतः।तत्रपारणमंतरेणप्रथमोपवासस्यासमाप्तत्वात्।द्वितीयोपवास
स्यप्रक्रमोनसंभवतीतिचेत्।नैवं।अद्भिःपारणंकृत्वाद्वितीयोपवासस्यप्रक्रममितुंशक्यत्वात्।तादृशंतुपारणम
द्भितानशितोभयात्मकं।तत्राशितरूपत्वात्पूर्वोपवासंपरिसमापयति।अनशितरूपत्वेनोत्तरोपवासंनविहंति।ए
तच्चात्मकसंदेहपूर्णमासप्रकरणेमाजमान्नाह्मणश्रुतेः।यदानाश्नात्युपवसेत्क्षीरेधुकःस्याद्वरश्रीमाद्रुद्रोस्यपशू

नभिमन्येतापोश्नातितन्नेवाशितंनक्षोभुकोनापनिनास्यरुद्रःपश्नभिमन्यतइति।तस्मादुदकपारणेनोपवासदृढयनिर्वाहः॥
एतच्चसर्वतिथिसाधारणं।प्रकृतेत्वेकादशीद्वादश्योर्वयादुदकपारणमंतरेणापिनकश्चिद्दोषः।अतएवस्मर्यते।एकादशीमु दैवते
पोष्यैवद्वादशीसमुपोषयेत्।नतत्रविधिलोपःस्यादुभयोर्देवतंहरिरिति।उपवासदृढयार्थंकेवलद्वादश्युपवासेना
भयोःफलंसिध्यति।तथाचस्मृतिः।एकामेकादशीशुक्लांद्वादशीसमुपोषयेत्।पूर्वेपिवासजंपुण्यंसर्वप्राप्नोत्यसंशयमि
ति।द्वादश्यांतुकाम्योपवासोमार्कंडेयेनदर्शितः।द्वादश्यामुपवासेनसिध्यार्थीभूपसर्वभ।चक्रवर्तित्वमतुलंसंप्राप्ता
अतुलंश्रियइति॥ ॥इतिद्वादशीनिर्णयः॥ ॥अथत्रयोदशीनिर्णीयते॥ ॥साचशुक्लकृष्णपक्षभेदेनभवतिष्ठते
नत्रशुक्लत्रयोदशीपूर्वविद्धाग्राह्या।तदुक्तंब्रह्मवैवर्ते।त्रयोदशीप्रकर्तव्याद्वादशीसहितामुने।मूतविद्धानकर्तव्याद्शैःपू
र्णाकदाचन।वर्जितामुनिश्रेष्ठसावित्रीव्रतमुत्तममिति।अथशुक्लत्रयोदश्याःपरविद्धायाःवाचनिकलात्पूर्वविद्धतायाःशुक्लपक्षविषयतंपरिक्ष्यते।सांयकालत्रिमुहूर्तमात्रव्यापित्वेनपूर्वविद्धतायांप्राप्तायां।शि
प्रतिपदइवापरद्वंद्वसंबंधोपेक्षितइतिद्रष्टव्यं।तदुक्तंस्कंदपुराणे।त्रयोदशीप्रकर्तव्यायाभवेदापरा द्विकीति।कृष्णत्रयो
दश्याःपरविद्धमुक्तंनिगमे।षष्ठ्यष्टमीअमावास्याकृष्णपक्षेत्रयोदशी।एताःपरयुताःपूज्याःपराःपूर्वसुतास्त्यजेति॥
अतुद्वद्वसिद्धः।द्वितीयापंचमीवेधादशमीचत्रयोदशी।चतुर्दशीचोपवासेद्वंपूर्वेनिरतिथौरितिं।तच्छुक्लपक्षवि
षयं।मदनुकृष्णपक्षेपरविद्धानकृत्यतेतदाहूर्वविद्धाग्राह्या।तदाहवसिष्ठः।एकादशीत्रयोदशीचतुर्दशीत्रयोद
शी।एवंविद्धापिकर्तव्यायदिनस्यात्परेहनीति।अनंगत्रयोदशीपूर्वविद्धा।तदाहसंवर्तः।कृष्णाष्टमीमृहूर्तपासाविद्धीव

रंधेत्कृष्णे।अनंगत्रयोदशीरंभाउपोष्याःपूर्वसंयुताइति।अनंगत्रयोदशीभविष्यत्पुराणेदर्शिता।मार्गशीर्षेमलेपक्षेरसुपक्ष
म्यत्रतंविधायअनंगेनसहितांगत्रयोदशीसुपसंहारात्।नक्षमलेपक्षइतिशुक्लपक्षएवतद्व्रतंविहितं।तथाचत्रयोद
शीप्रकर्तव्याद्वादशीसहितेत्यनेनसामान्यशास्त्रेणैव अनंगत्रयोदश्याःपूर्वविद्धंप्राप्तं।प्राप्ते।तदेवानेनविशेषशा
स्त्रेणविस्पष्टीक्रियते॥ ॥इतित्रयोदशीनिर्णयः॥ ॥अथचतुर्दशीनिर्णीयते॥ ॥अत्रापिशुक्लकृष्णपक्षभेदेनव्य
वस्थाभवति।तत्रयुग्मशास्त्रेणशुक्लचतुर्दशीपरविद्धाग्राह्या।तथाव्यासोपि।शुक्लीचतुर्दशीग्राह्यापरविद्धासदाव्रत
इति।पूर्वविद्धाप्रतिषेधउत्तरविद्धाविधिश्चेत्युभयंभविष्यत्पुराणेपठ्यते।सदाकार्यात्रयोदश्यानतुत्यक्ताचतुर्दशी।षोर्ण
मासीयुतासास्याच्चतुर्दशीचदूर्णिमेति।नारदीयेपि।तत्रीयैकादशीषष्ठीशुक्लपक्षेचतुर्दशी।पूर्वविद्धानकर्तव्याकर्तव्यापर
संयुतेति।यत्तुशुक्लचतुर्दश्यामनंतव्रतंभविष्योत्तरेभिहितं।तत्रपूर्वविद्धापरविद्धाभाद्ध्याह्नव्यापिनीग्राह्येतिकेचिदाहुः॥ भाद्रपद
लिंगंचतत्रप्रमाणत्वेनोदाहरंति।मध्याह्नेभोज्यवेलायांसमुत्तीर्यसरिन्नदं।ददर्शलोशीसास्त्रीणांसमूहंरक्तवाससां
चतुर्दश्यामर्चयंतंभक्त्यादेवंपद्मधरंहरिं।इति।अत्रमध्याह्नेभोज्यवेलायामितिसनेनमध्याह्नस्यकर्मकालत्वंप्रतीयते
अतस्तद्व्यापिनीतिथिर्ग्राह्या।नैतत्सारं॥यथाविनायकव्रतेमध्याह्नपूजायंत्रूपेतिमध्याह्नःकर्मकालत्वेनविहितः।नात्र
तद्व्यापित्वविधिरस्ति।उदाहृतेतुलिंगमर्थवादत्वेगतत्वान्नस्वातंत्र्येणकस्यचिदर्थस्यत्रमापकंकिंतुसतिप्रमाणांतरेतस्योपो
कर्म द्बलकंभवति।नचात्रप्रमाणांतरंपश्यामः।अतोनमध्याह्नेकालः।तथासतिद्वोदयिकीग्राह्येतिवचनेनयुग्मशास्त्रा

रिमिश्रोदयव्यापिनीग्राह्या। सर्वत्रिमुहूर्त्यंतरवह्निमुहूर्तेतिमुख्यः कल्पः। द्विमुहूर्तेत्यनुकल्पः। एवंसतिशिष्टाचारोप्यनुगृहीतो
भवति। चैत्रश्रावणचतुर्दश्योःशुक्लपक्षे अपिरात्रियोगिन्योर्ग्राह्येति॥ तथाचबौधायनः। मधोःश्रावणमासस्यशुक्लायांतुच
तुर्दशीसारात्रिव्यापिनीग्राह्या परापूर्वाकुर्यादिति। परामासांतर्वर्तिशुक्लचतुर्दशी। कृष्णपक्षेतुपूर्वविद्धैवग्राह्या। त नी
धाकापस्तंबः। कृष्णपक्षेष्टमीचैवकृष्णपक्षेचतुर्दशी। पूर्वविद्धातुकर्तव्याऽपरविद्धानस्येकेचिदिति। अपराकृत्या
पिलेतुशुक्लचतुर्दश्यपिपूर्वविद्धाग्राह्या। तथास्कंदपुराणे। चतुर्दशीचकर्तव्यात्रयोदश्यायुताविभो। ममभक्तैर्महा
बाहोभवेद्यात्कापराह्निकी। दर्शेविद्धानकर्तव्याराकाविद्धाकदाचनेति। अत्रममभक्तैरितीश्वरोक्तिर्लिंगाच्छिवचतुर्दशी
विषयत्वंद्रष्टव्यं। तदेवंव्रतांतरेषुचतुर्दशीनिर्णीता॥ ॥ अथशिवरात्रिव्रतंनिर्णीयते॥ ॥तत्रेदंचिंत्यते॥ ॥किमयंशि
वरात्रिशब्दोरूढः। किंवायौगिकः। उतलाक्षणिकः। किंवायोगरूढइति। किंतावत्त्रयाणांरूढइति। तिथिविशेषेशिवरा
त्रिशब्दस्यसंज्ञारूपेणस्मरणात्। तथाचनागरखंडेमाघमासस्यशेषेयाप्रथमाफाल्गुनस्यच। कृष्णाचतुर्दशीसातु
शिवरात्रिःप्रकीर्तितेति। कामिके। माघमासिसितेपक्षेविद्यतेयाचतुर्दशी। तद्रात्रिःशिवरात्रिःस्यात्सर्वपुण्यशुभावहे
ति। यद्यपित्रशिवस्यरात्रिःशिवरात्रिरित्यवयवार्थःप्रतीयतेतथापियोगरूढेर्बलवत्त्वाद्योगोत्रनगृह्यः। वैश्वानल्यंचाश्व ७२
कर्णादिशब्देष्ववगम्यते। अश्वस्यकर्णइत्यवयवार्थेत्रतीतावपितमुपेक्ष्यरूढ्या। रूढविशेषवाचित्वस्वीकारात्। ननु
काकदंतपरीक्षासमानो। मंविचारः। यद्ययंशिवरात्रिशब्दोरूढःमद्दिवायौगिकः। उभयथाप्यनुष्ठानेविशेषाभावात्। श्रीगजानन

र्णेयं। अस्त्येवमहान्विशेषः। यौगिकस्तेशिवसंबंधित्रतंजातंसर्वस्यांरात्रावनुष्ठीयतेसासर्वाशिवरात्रिःस्यात्। माघमासादिपदंच
तदानीमुपलक्षणंभवेत्। रूढिपक्षेतुमाघमासादेर्विशेषणत्वात्। नहिविशेषणस्यैकस्यैवतिथेःशिवरात्रित्वं। अतःकर्तव्यएव
विचारः। तत्राहीनन्यायेनरूढिमेवाद्रियामहे। तस्यचन्यायस्यसंग्राहकोवेदोक्तिर्लोकोभवतः। अहीनस्यहादशीतिप्रकृता
विकृताऽपि। नहीनकृतियोगेनप्रकृतौतद्विकल्पतां। शीघ्रधीहेतुनारूढेरहीनेविकृताविदं। उत्कृष्यतांहादशत्वंसाकूतात्
कृतकर्मणः। अत्यमर्थः। ज्योतिष्टोमश्रूयते। तिस्रएवसाकूस्योपवासदोहादशहीनस्यसत्रस्यसवीर्यत्वायेति। अकूःसह
वर्तीनकृतिसाकूः। एकदिनतिष्याद्योज्योतिष्टोमः। तस्यप्राचीनेषुत्रिषुदिनेषुगतेनानुष्ठेयाहामउपसच्छब्दवाच्याः। तास्ति
स्रउपसदोविधायपुनरहीनशब्दवाच्यस्यकर्मणोद्वादशोपसदोविधीयंते। तत्रसंशयः। किमिदंद्वादशोपसत्वंत्रिरात्रा
द्यहीनप्रकृतिभूतेसाकूशब्दवाच्येप्रकृतेज्योतिष्टोमेनिविशते। आहोस्विदहीनशब्दवाच्येविकृतिरूपेद्विरात्रादावुत्कृष्य
नयतीति। तदर्थमिदंचिंत्यते। अहीनशब्दोयौगिकोरूढोवेति। तत्रनहीनकृतिव्युत्पत्तेर्विस्पष्टंप्रतिभासाद्यौगिकएवायं। तदर्थश्च
प्रकृतावुपपन्नः। सांगप्रधानस्यसर्वस्यसाक्षाद्वाचकशब्देरेवोपदिष्टत्वेनहीनताभावाद्विकृतौतुविशेषएववाचकशब्दे
रुपदिश्यते। इतरत्सर्वमतिदेशेनाप्यते। अतउक्तिसंकोचात्विकृतेर्हीनत्वं। एवंचसहीनशब्दस्यज्योतिष्टोमेप्रकृति
संभवात्तत्करणानुग्रहणाच्चतत्रैवद्वादशत्वंनिर्दिश्यते। कल्पसूत्रवाक्यविहितेनत्रिलेनबाधःशंकनीयः। वाक्ययोःसमानबलत्वे
नत्रीह्यवयवहिकल्पोपपत्तेः। तस्माज्योतिष्टोमएवद्वादशविधिरितिप्राप्तेरुच्यते। विकृतिरूपेद्विरात्रादावितिद्वादशत्वंवि

भीयते। कुतः। अहीनशब्दस्यश्रौतप्रयोगबाहुल्येनतत्रैवरूढत्वात्। रूढिश्चशक्तिग्रहेतुलेनयोगाद्बलीयसी। योगेत्ववयवार्थप्रथमतो निश्चित्यपश्चात्समुदायार्थो निश्चेतव्यइतिविलंबः। नचात्रप्रकरणविरोधःशंकनीयः। बलीयसावाक्येनप्रकरणस्यबाधितत्वात्। तस्मा दिदंहादशंप्रकृतज्योतिष्टोमादुत्कृष्यविकृतिषुद्विरात्रादिषुनिवेशनीयमिति। अत्रयथारूढोहीनशब्दस्तथाऽत्रिशब्दोपिरूढ श्रुतिप्रथमः पक्षः। अपरआह। योगिकएवायंशिवरात्रिशब्दः कुतः शिवसंबंधमुपजीव्यतच्छब्दस्यप्रवृत्तत्वात्। तथाचस्कंदपुराणे माघस्यकृष्णपक्षेयातिथिश्चैवचतुर्दशी। शिवरात्रिस्तुसाख्याता सर्वपा निधूदनी। तस्यरात्रिःसमाख्याताशिवरात्रिःशिवप्रि या। तस्यांसर्वेषुलिंगेषुसदासंक्रमतेहरः। यानिकानिचलिंगानिचराणि स्थावराणिच। तेषुसंक्रमतेदेवितस्यांरात्रौयतोहर। शिवरात्रिस्ततःप्रोक्तोतेनसाहरवल्लभेति। शिवरहस्ये। तत्रभद्रेये तुदेवर्षेमाघकृष्णचतुर्दशी शिवरात्रिःसमा ख्याताप्रियेयंत्रिपुरद्विषइति। अवंतिखंडे। माघफाल्गुनयोर्मध्येत्र सितायाचतुर्दशी। शिवरात्रिस्तुसाख्याता सर्वपापनिषूदनी। तस्माच्छिवसंबंधिनीरात्रिः शिवरात्रिरितियौगिको र्घः। प्रोक्षणीयेत्यनगृहीतव्यः। तस्यचन्याय स्यसंग्राहकोवेतोक्लोकौ। संस्कारजातियोगेषुकंश्रुतेप्रोक्षणीरिति। सं स्कारंसार्वभौमलाज्जातिमेवाऽजानोक्तितः। अन्यो न्याश्रयतोनायोनजातिःकल्प्यशक्तितः। यौगिकःकृत्सशक्तिलाकृत्सियो करणेस्थिता। अमर्थःदर्शपूर्णमासांगतयाश्रूय ते। प्रोक्षणीरासादयंतीति। तत्रसंशयः। किमयंप्रोक्षणीशब्दोभिमंत्रणासादनाद्युदकसंस्कारंश्रुते। किंवाजलावांतरजातिवि शेषंआहोस्वित्प्रोक्ष्यंतेपात्राण्याभिरितियोगं। तत्रसंस्कारंश्रुतइतिनावत्प्राप्तं। कुतः सार्वभौमलात्। सर्वेषु हिसंस्कारविधि श्रीगजानन

वाक्यादिप्रदेशेषुप्रोक्षणीशब्दःश्रूयते। प्रोक्षणीरासादयेध्मावहिरासादयेप्रोक्षणीरुपसादयेप्रेषवाक्यप्रयोगः। प्रोक्षणीरासाद यतीतिविधिवाक्ये। एवंसतिनवाक्यानिउदाहरणीयानि। तस्मात्संस्कारंश्रुतइतिपक्षांतरं। लोकेहिजलक्रीडा सुप्रोक्षिणीभिरुदेजितइत्युदकजातेप्रयोगोदृश्यते। तत्रनावत्संस्कारंश्रुतइत्याद्यःपक्षउपपद्यते। कुतः। अन्योन्याश्रयत्वात्। नापिजातिंश्रुतइतिद्वितीयःपक्षोयुक्तः। उदकजातेप्रोक्षणीशब्दशक्तेर्यवहारपूर्वमकल्पनेनातःपरंशक्तेःकल्पनीयत्वाप्रसंगात्। अथयोगेपिशक्तिःकल्पनीया। व्याकरणेनैवकृसलात्। व्याकरणेहिउक्षसेचनेत्यस्मात्क्तोःकरणेल्युट्श्रूयतेयेनशब्देोत्पादितः। तथा सतिप्रकर्षेणयोक्ष्यंतअनेनयोगेनसेचनसाधनमुदकादिकंसर्वंप्रोक्षणशब्देोवाच्यंसंपद्यते। प्रकृतेतुस्त्रीशब्दत्वाच्यानामपांसेचनसाध नत्वातद्वचनस्यप्रोक्षणशब्दस्यङीप्रत्ययांतस्यप्रोक्षणीरितिद्वितीयाबहुवचनांतःशब्दोनिष्पद्यते। ननुहीनाधिकरणेरूढेः प्राबल्यमु क्तं। प्रोक्षण्यधिकरणेचयोगस्यप्राबल्यमुपपद्यते। अतःपरस्यविरोधः। मैवं। ऊध्वात्मिकाहिरूढिर्वेगमुपजनयंतीहरतीति। कथंप्रोक्ष णीशब्दे रूढिर्लभ्यते। रूढ्यवयवहरणजात्यभावात्युत्पादितत्वात्। अहीनशब्देोविहिरात्रादिषुनरूढेर्युक्तादितरत्रेति चेन्न। व्याकरणेयुत्पादि तत्वात्। अकृःखःकृताविसनेनवार्तिकेनाहनशब्दात्खत्रत्ययमुत्पाद्यतस्येनादेशंकृत्वाकृतुविषयतयायुत्पादितेत्वात्। ही नशब्दः। ननुएवंसतिघटकुटीप्रभात्यामखवमसज्ञेनयतोहीनशब्देयोगंपरिहर्तुकामेनभवताव्याकरणमुपजीव्ययोगेपर्यवसानंकृ तं। कामंदोषः। पूर्वंपक्षिणोभिमतेसमासलक्षणेयोगेपर्यवसानस्यानभिधानात्। नचनञ्समासोपिव्याकरणेयुत्पादित इतिशंकनीयं। नञ्समासस्वीकारेसतिअयंदोषोवाएषरात्रादिर्हीनशब्दस्यघटादिभसंज्ञात्। मध्योदात्तोह्ययंशब्दआम्नायते। तस्मा

त्यक्षद्वयेयोगसाम्येपिसमासरूपयोगंदूषयक्षाभिमतंनिरूढ्यस्यश्रोतरूढिःसिध्यतिनासमाश्रिता।तामेवरूढिंप्रकटयितुंवररुचिनावा
र्तिककृतंप्रतःसत्यपिप्रत्ययप्रकृतिविभागेयौगिकत्वंनशंकितुंशक्यते।तथोगालजातोरूढस्यविगोशब्दस्योणादिकसूत्रेषुगमे
डेरितिप्रत्ययप्रकृतिविभागंकृत्वागौतीतिगोरितिव्युत्पत्तिःप्रदर्शिता।तद्वदत्रापयवगंतव्यं।श्रोक्षणीशब्दस्तुनरूढिज्ञापनायकिंवि
त्सूत्रंसतंत्रंविहितमास्ति किंतर्हिसर्वधातुसाधारणेनभावार्थव्युत्पादकेनत्सुट्प्रत्ययेनव्युत्पादितत्वात्।यौगिकएवायंश्रोक्षणीश
ब्दः।तस्मात्श्रोक्षणीशब्दवच्छिवरात्रिशब्दोयौगिकइतिद्वितीयःपक्षः।अन्येतुपुनर्मन्यंते।काक्षणिकोयंशिवरात्रिशब्दः।तिथिवा
केनतेनशब्देनतत्तिथौक्रियमाणस्यव्रतविशेषस्यलक्ष्यमाणत्वात्।।अतएवेशानसंहितायांउक्तं।शिवरात्रिव्रतंनामसर्वपाप
क्षयंकरं।सर्वेषांचैवभूतानांभुक्तिमुक्तिप्रदायकं।अर्धरात्रादयश्चोर्ध्वंयदियुक्काचतुर्दशी।तत्रनिश्चयेनैवकुर्वीतशिवरा
त्रिव्रतंतु।शिवरात्रिव्रतंकार्यंभूतान्वितमहानिशि।शिवरात्रिव्रतंदेवकरिष्येशिवसन्निधौ।निर्विघ्नंकुरुमेदेवभक्त्याह्यमरे
श्वरेति।नारदीयसंहितायां।अर्धरात्रयुताचत्रमाघकृष्णाचतुर्दशी।शिवरात्रिव्रतंतत्रकुर्याज्जागरणंतथेति।पद्मपुराणे
पि।अर्धरात्रादयश्चोर्ध्वंयदियुक्काचतुर्दशी।तत्रनिश्चयतःकुर्यात्शिवरात्रिव्रतंव्रती।स्कंदपुराणे।शिवरात्रिव्रतंदेवकथ
यस्वमहेश्वरेति।नचकालवाचकस्यशब्दस्यलक्षकत्वमदृष्टचरमितिशंकनीयं।कालवाचकाभ्यांमासाख्यापौर्णमासी
शब्दाभ्यांयागत्रयरूपयोपरिष्टात्तत्कालसंबंधिन्योरुपलक्षितत्वात्।अतएवश्रुते।यएवंविद्वान्पौर्णमासींय
जतेयएवंविद्वानमावास्यांयजतइति।स्मृतिष्वपिसर्वत्रतिथिवाचकैःशब्दैस्तत्संबंधिनोव्रतविशेषालक्ष्यंते।स्कंदपुत्रीगजानन

DR BHAU DAJI

राणे।।जन्माष्टमीनेवरूपाकाचिकल्पायुतंपच्यतेरौरवेधिति।श्रुत्यर्थंगोपि।एकादशीतुकुर्वीतश्रीयतेहादशीयदेति।एवमन्यत्राप्युदाहार्यं।।
तस्माच्छ्रोक्षणिकोयंशिवरात्रिशब्दइतितृतीयःपक्षः।अथसिद्धांतक्रमः।योगरूढएवायंशिवरात्रिशब्दः।योगोहितीयपंक्त्यासेनद र्शो
र्शितः।रूढिस्त्वथभेदेनन्यासेन।तत्रैकस्यस्वीकारेसत्यन्यविषयंशास्त्रमेतदनुग्राहकउदाहृतोन्यायस्त्रबाध्येत।नचयौगिकत्वेसति
शिवव्रतोपेतेषुत्रयोदश्यादितिथ्यंतरेषुशिवरात्रितंत्रप्रसज्येतेतिवाच्यम्।तस्यातिप्रसंगस्यरूढ्यानिवारणात्।अथापंकजशब्देवं
काज्ज्ञायतइतियोगंस्वीकृत्यभेकादितिप्रसंगोरूढिस्वीकारेणनिवार्यते।तद्वदत्रापियोगरूढत्वान्नकोप्यतिप्रसंगः।नचमुख्ये
संभवतिलक्षणाश्रयणमुचितं।अथोच्यते।लक्षणायामभावेव्रतविषयत्वंनस्यादिति।तन्न।बहुव्रीहिस्वीकारेयोगेनैवतात्पर्ये
शिवस्यत्रिणात्रियस्मिन्व्रतेंगसेनविहिता।तद्व्रतंशिवरात्र्याख्यंतस्मान्निर्मथ्यस्योक्तनात्रयोगरूढःशिवरात्रिशब्दःरतस्यात्र
न्यात्रस्यसंग्राहकःश्लोकः।।निर्मथ्योयौगिकोयोगरूढोवायोगभाजनात्।योगिकोचिरजातेर्योनियतंयोगरूढिभाक्।।तस्मा
यमग्नेःपुरुषाच्चयनेश्रूयते।निर्मथ्येनेरकाःपच्यंतीतितत्रसंशयः।किमयंनिर्मथ्यशब्दोयौगिकःकिंवायोगरूढइति।निःशेष
णमथ्यतइतियोगस्यव्रतीयमानत्वात्तोयणीन्यायेनयोगरूढिरेवेतिपक्षः।अत्रहरदत्तीविषेतेचिरनिर्मथितः।चिरनिर्मथि
तः।चयनंप्रकृत्योर्वानिर्मथितस्यानुरक्षायांकंचित्कालंधारणायोग्निर्निर्मथ्यतेसोचिरनिर्मथितः।तेनेरकाःपच्यंते।तस्ये
वप्रशस्तत्वात्।तथाचमथनस्याग्निहोत्रयज्ञेषाधारण्येपचिरनिर्मथितमग्निंनिर्मंतुंरूढिरश्रणीयाः।यथावानावनीतंघृत
मित्यत्रनवनीतजन्यसंयोगस्यचिरंचिरयोरुभयोःसाधारण्येपिनूतनेनैवघृतेनावनीतशब्दोलोकेप्रसिद्धेनियम्यते।तद्वदत्राप

वृगंतव्यं।तथाचसतिप्रतीयमानयोगस्यापरिहृतत्वात्त्रियतेरूढिस्वीकाराच्चयोगरूढोमंनिर्मथ्यइति सूक्तांतः।अन्येनैवन्यायेनशिवरात्रि
शब्देपियोगरूढिराश्रीयते।तत्रशिवस्यरात्रिःशिवरात्रिरितितत्पुरुषसमासेनयोगेनप्रवर्तमानःशब्दोरूढ्याफाल्गुनकृष्णचतुर्दशीरूपे
कालेविशेषेनियम्यते।शिवस्यरात्रिर्यस्मिन्व्रतेइतिबहुव्रीहिसमासेनयोगेनप्रवृत्तःशब्दोरूढ्याव्रतविशेषेनियम्यते।तच्चशिवरा
त्रिव्रतमेकादशीव्रतवत्संयोगपृथक्त्वन्यायेननित्यंकाम्यंचेतुभयविधं।तत्रनित्यत्वकारणंश्रुत्यवायवीप्सानित्यनिश्चलशब्दैर्
वृगंतव्यं।तत्राकरणेप्रत्यवायःस्कंदपुराणेपठ्यते।परात्परतरंनास्तिशिवरात्रिःपरात्परं।नह्यजयतिभक्तस्यशंभुर्त्रिभुवनेश्वरः।जंतु
र्जन्मसहस्रेषुभ्रमतेनात्रसंशयः।वीप्सापितत्रपठिता।वर्षेवर्षेमहादेवंनरोनारीपुतिव्रता।शिवरात्रौमहादेवंकामंभक्त्याप्रपूज
येदिति।नित्यनिश्चलशब्दोवृतत्रैवमाघकृष्णाचतुर्दश्यांयःशिवंशंसितव्रतःमुमुक्षुःप्रजयेन्नित्यंसलभेदीप्सितंफलमिति।अर्जोवोयदि
वाप्युच्चैःक्षीणतेहिमवानपि।मेरुमंदरलंकाश्चश्रीशैलोविंध्यएवच।चुलंलतेकदाचिद्वैनिश्चलंहिशिवव्रतमिति।काम्यत्वंचफलश्रवणा
दवृगंतव्यं।तत्रस्कंदपुराणे।शिवंचपूजयित्वायोजागर्तिचतुर्दशीं।मा।तुःपयोधरसंभवंपिबेत्सकदाचन।यदिच्छेच्छिवा
न्भोगान्स्थिरंदेवमनोरमान्।आगमोक्तविधिंकृत्वाप्राप्नोतिपरमंपदं।ममभक्तस्तथादेविशिवरात्रिंसुपोषकः।गणत्वमश्नुतेदि
व्यंश्रुत्वंशिवप्रसादनं।सर्वान्भुक्त्वामहाभोगान्ततोमोक्षंनसंशयः।काम्यव्रतस्यज्ञानसंहितायांवर्षसंख्यापठ्यते।
एवमेतद्व्रतंकुर्यान्नित्यंवत्सरंव्रती।दत्वाशक्तिकमेतत्स्याद्वतुर्विंशाद्विकंतुवा।सर्वान्कामानवाप्नोतित्रैलोक्यंवहतेनरः
ति।नित्यकाम्यरूपस्यास्यव्रतस्यसर्वाधिकारिकलभीक्षणसंहितायामुक्तं।शिवरात्रिव्रतंनामसर्वपापप्रणाशनम्॥श्रीगजानन

श्रावंडालमनुष्याणांभुक्तिमुक्तिप्रदायकमिति।अधिकारिनियमाःस्कंदपुराणेदर्शिताः।माघमासेतुकृष्णायाफाल्गुनादोचतुर्दशी
साचपुण्यातिथिर्ईशायासर्वपातकनाशिनी।अहिंसासत्यमक्रोधोह्रीश्चार्यंदयाक्षमा।शौंतात्माकोधहीनश्चतपस्वीप्रियदर्शकः।
तस्मैदेयमिदंदेविगुरुपादानुगोयदि।अन्यथायोददातीदंसतदानरकंव्रजेदिति।उक्ताधिकारिणानुष्ठेयंव्रतंस्वरूपंत्रिविधं॥
उपवासोजागरोर्चनंचतदुक्तंनागरखंडे।उपवासप्रभावेनबलादपिचजागरात्।शिवरात्रेस्तथास्यलिंगस्यापिचपूजया।
अक्षयान्सुप्रभेभोगान्शिवसायुज्यमाप्नुयादिति।सह्यखंडे।स्वयंचलिंगमभ्यर्च्यसोपवासःसजागरः।अजानन्नपिनिष्पा
पोनिषादोगणतांगतः।अत्रेदंविचार्यते।किमत्रोपवासजागरपूजाव्रतस्यस्वरूपेणैवविकल्पंते।उतसमुच्चितानेवेति।तत्रविक
ल्पंतेइतितावत्प्राप्तं।कुतः।एकैकस्येतरनिरपेक्षतयाविधानात्।तथाहिस्कंदपुराणे।केवलोपवासविधिःपठ्यते।अत्रंदिन
त्रयेतोयंहिशिवरात्रेर्नुपोषयेत्।सर्वान्कामानवाप्नोतिशिवेनसहमोदतइति।तथाकेवलजागरणंपठ्यते।कश्चित्पुण्यविशेषेण
व्रतहीनोपिमःपुमान्।जागरंकुरुतेतत्रसरुद्रसमतांव्रजेत्।तथाकेवलपूजापठ्यते।यःपूजयतिपापघ्नंशंभुनंकफलतांव्रजे
दिति।तस्मादुपवासादयस्त्रयोपिविकल्पंते।यद्विनागरखंडउक्तयोःसमुच्चयविधिरस्तित्वुच्यते।तद्धिस्वेकंवासमु
दायोवाप्रत्येष्टमनुष्ठीयतामितिप्राप्तेब्रूमः।वैश्वानरविद्योपासनन्यायेनसमुदायएवात्रानुष्ठेयः।तस्यचन्यायस्यसंग्राह
कावेतौश्लोकौ।वैश्वानरंतुसंपाप्यत्रयंतेकंसमुदायतः।विकल्पःसमुदायोवानियतोहिविधाद्विधेः।विकल्पइतिचेन्नैवं
समुदायप्रतीतितः।अवघुसानुवादेनप्रत्येकंयुपपत्तितइति।अयमर्थः।उद्गीथोराम्नायते।वैश्वानरंउपास्महइति।वि

पुल्लोकादित्रयवाच्याकाशोदकपृथिवीरूपैःषड्भिरवयवैरुपेतोवयवीसदीत्मकोविराट्पुरुषोवैश्वानरशब्दवाच्यः।तत्रसंश
यः।किंत्रिपुल्लोकाद्यवयवावयवीचत्रयेकंविकल्पेनोपास्याउतावयवेवनियमेनोपास्यइति।विकल्पइतिनावत्पक्षः।कुतःद्विविधस्य
विधेःश्रूयमाणत्वात्।प्राचीनशालसत्ययज्ञइंद्रद्युम्नजहिजिडोदालकनामभिःषड्भिर्महर्षिभिःक्रमेणदिपुल्लोकादयःषडवयवाःक्रमेणो
पासिताः।तद्ज्ञातकथनपरेवाक्येषुषण्णामवयवानांत्रयेकमुपास्तिविधेवानियमाश्रवफलं सहितायुपलभ्यंते।पुनश्चैतेषड्भ्यः
तेभ्योमहर्षिभ्योश्वपतीराजासमुदायोपास्तिमवोचत्।अतोद्विविधविधिवलेनयथेष्टंविकल्पइतिप्राप्तेब्रूमः।समुदायएवात्र
नियमेनोपासयितव्यः।कुतः।श्रुतत्वात्।अवयवोपास्तिवाक्यान्यवयवानुवादरूपत्वेनाणुपपद्यंते।तस्मात्समुदायोपास्यइति
प्राप्तौतः।अनन्यायेनत्रयाणांसमुदायस्यैवव्रतरूपत्वं।ननुक्वचिदुपवासादित्रयंविधायपुनःपक्षांतर
रूपेणोपवासत्रयातिरिक्तद्वयंपठ्यते।अथवाशिवरात्रिश्चरजाजागरणेनैवेतिनाद्यः दोषः।अथवैसनुकल्पोपक्रमेणाशक्तविष
यत्वोपपत्तेः।अत्रव्रतेविहितानांत्रयाणांपरस्परमंगांगिभावबोधकप्रमाणाभावादाग्नेयादिषड्वागवत्प्रत्येककालसंभवावि
धानात्फलविधानाच्चसमग्राधान्यंद्रष्टव्यं।अस्यैवोपोद्बलकंलिंगमभिधीयते।लुब्धकस्यभद्राश्वजन्मत्रासक्षतोदबाससा
सहसंवादपठ्यते।कृष्णपक्षेचतुर्दश्यांकिंचिन्मगयासदान्।अण्वपिप्राणरक्षार्थंक्षुधासंपीडितोवसूदित्युपक्रम्यधनुः
कोद्वाहतान्येवबिल्वपत्राणिमानद।पतितानिमहाराजशंभोःशिरसिभूतले।तत्रैवतस्थौरजेंद्रसर्वरात्रमतंद्रितः।स
त्रिशंकुस्तिष्ठतोव्याधस्तथादृष्टिरनामयः।प्रभातेविमलेजातेदृष्ट्वातत्रैवशंकरं।बिल्वपत्रैरनस्रष्वकंदमूलैश्चपारितइति॥७श्रीगजानन

एतस्मिन्यथोक्तनिथिनिर्णेतुमिदंविचार्यते।किंत्रयंतंतरेणिवावाप्युदयास्तमयवेधग्राह्यं।किंवाप्रदोषवेधः।वाहोस्विन्निशीथइ
ति।तत्रहर्षेघुरुदयेनयोदशीवेधःपरेणुस्तमयेदर्शवेधइत्युदयास्तमयेधीयुक्तः।तस्यव्रतांतरेणकूतत्वात्।कूतस्यचकल्पाद्बलीय
स्त्वात्।भेदेसामान्याद्विशेषस्यबलीयस्त्वात्।सामान्यरूपोह्युदयास्तमयवेधः।सर्वतिथिषुसमानत्वात्।विशेषरूपोप्रदोषनिशीथ
वेधो।कृष्णाचतुर्दशीलक्षणेतिथिविशेषेशिवरात्र्याख्यंव्रतंविशेषमुपजीव्यप्रवृत्तत्वात्।एतदेवाभिप्रेत्यशानसंहितायामुक्तं।उदये
त्रिधाःकविद्धाःकविदस्तमयेन्विताः।अतिप्रशस्तियायस्माद्भूयिताव्रतंतिदमिति।अस्मिंस्तुव्रतेत्रदोषवेधोवामुपुराणेरशि
तः।त्रयोदश्यस्तमेसूर्येचतस्रश्चेवनाडिषु।भूतविश्वातुचातत्रशिवरात्रिव्रतंचरेदिमिति।स्मृत्यंतरेपि।प्रदोषव्यापिनीग्राह्याशि
वरात्रिचतुर्दशी।रात्रौजागरणंयस्मात्तस्मात्तांसमुपोषयेदिति।कामिके।आदित्यास्तमयेकालेअस्तिचेच्चतुर्दशी।तद्रात्रिःशिवरा
त्रिःस्यात्तंभवेदुत्तमोत्तमेति।निशीथवेधोनारदीयसंहितायांदर्शितः।अर्धरात्रगतायत्रमाघेकृष्णाचतुर्दशी।शिवरात्रिव्रतंतत्र
सोश्वमेधफलंलभेदिति।स्मृत्यंतरेपि।भवेद्यत्रत्रयोदश्यामर्धरात्रेचभूतगाहानिशा।शिवरात्रिव्रतंतत्रकुर्याज्जागरणंतथेति।ईशान
संहितायां।माघकृष्णचतुर्दश्यामादिदेवोमहानिशि।शिवलिंगतयोभूतःकोटिसूर्यसमप्रभः।तत्कालव्यापिनीग्राह्याशिवरात्रि
व्रतेतिथिः।अर्धरात्रादधश्चेदर्धयुक्तायत्रचतुर्दशी।तत्रैवकुर्याच्छिवरात्रिव्रतंव्रती।नार्धरात्रादधश्चोर्ध्वयुक्तायत्रचतुर्द
शी।नैवतत्रव्रतंकुर्यादन्यैश्वर्यहानिदेति।व्याघार्थिरात्रं यूस्यांतुलभ्यतेचतुर्दशी।तस्यामेवंकार्यमत्रसादार्थिभिश्च
नरैः।पूर्वेद्युर्वापरेद्युर्वामहानिशिचतुर्दशी।व्याप्तासादृश्यतेयस्यांतस्यांकुर्याद्व्रतंनरः।लिंगाविर्भावकालेतुव्याप्तायच्छो

चतुर्दशी। तदूर्ध्वा धोन्वितास्ता साकार्याप्रतिभिःसदा। ममप्रियकरीह्येषामाघकृष्णचतुर्दशी। महा निशान्विताया स्तुतत्रकुर्यादिदं
व्रतमिति। एवंसतिपूर्वेद्युरेवयत्नतोदोषनिशीथोभयव्याप्तिस्तत्रमाचरणीयं। पूर्वेद्युरेवोभयव्याप्तौ स्कंदपुराणपद्मते। त्रयोदशीयदा
देवीदिनभक्तिप्रमाणतः। जागरेशिवरात्रिस्यान्निशीथेपूर्णाचतुर्दशी। दिनभुक्तिरतमयः। परेद्युरेवोव्याप्तौकामिकेपद्मते। निशा
द्वयेचतुर्दश्याद्यर्धात्ताजयापरासुभवति। दिनद्वयेशुभयव्याप्तिस्तुनसंभाव्यते। यामद्वयेह्येकैकभावात्। दिनद्वयेशुभयव्याप्त्यभावे
पिनसंभाव्यते। यामद्वयस्यसत्त्वाभावात्। एकैकस्मिन्दिनएकैकव्याप्तौतुकथमितिचेत्तत्साहचर्यात्तज्जेत। पर्वेधुर्नि शीथव्याप्ति
:परेद्युःप्रदोषव्याप्तिरिति। तत्रैकव्याप्तौदिनद्वयेसमानत्वेपिजयायोगस्यप्रशस्तत्वादर्शयोगस्यनिंदितत्वाच्चपूर्वेद्युरेवोपवा
सः। जयायोगप्राशस्त्यंवानेकवचनेराद्धत्वादवगम्यते। तथाचस्कंदपुराणेपद्मते। कृष्णाष्टमीस्कंदषष्ठीशिवरात्रि चतुर्दशी। एताः
पूर्वयुताःकार्यास्तिथ्यंतेपारणंभवेत्। जन्माष्टमीरोहिणीचशिवरात्रिस्तथैवच। पूर्वविद्धैवकर्तव्यातिथिभांतेचपारणं। श्रावणी
दुर्गानवमीतथादूर्वाष्टमीचया। पूर्वविद्धानुकर्तव्याशिवरात्रिःप्रियेति। त्रस्तवेवर्ते। रुद्रव्रतानामपिपापानांदृष्टेवेनिर्बलेदिनमि
ति। जयंतीशिवरात्रिश्चकार्तिकीभद्राजयान्विते इति। नागरखंडे। माघफाल्गुनयोर्मध्येआसीताचाचतुर्दशी। अवंगेनसमायुक्ता
कर्तव्याचसदा तिथिरिति। पद्मपुराणे। अर्धरात्रात्पुरस्तात्त्रेज्जायायोगोयदाभवेत्। पूर्वविद्धैवकर्तव्याशिवरात्रिः शिवप्रियैरि ७७
ति। त्रस्तवेवर्ते। रुद्रव्रतेषुसर्वेषुकर्तव्यासुमुखीति श्रीः। अन्येषुव्रतकल्पेषुपरयुक्तामुपावसेदिति। दर्शयोगनिंदाचपूर्व
णेदर्शिता। महतामपिपापानांदृष्टेवेनिष्कृतिःपुरा। नदृष्टाकुर्वतांपुंसांकुतःसुक्तांशिवांतिश्रिमिति। अन्यान्यपिश्रीगजानन
स्मर

यानिकानिचिद्दर्शयोगनिंदावचनानितत्रतत्रस्मर्यंते। तानिसर्वाण्यस्मिन्विषयेयोजनीयानि। यदापूर्वेद्युर्नि शीथादूर्ध्वंप्रवृत्ताचतुर्द
शीपरेद्युःक्षयवशान्निशीथादर्वागेवसमाप्तातदापूर्वेद्युःप्रदोषनिशीथव्याप्त्योरुभयोरप्यसंभवात्परेद्युःप्रदोषव्याप्तेरेकस्याः
सद्भावात्परविद्धैवग्राह्या। एतदेवाभिप्रेत्यस्मर्यते। माघासितेभूतदिनंकदाचिदुपैतियोगंयदिपंचदश्या। जयाप्रयुक्तांनतुजातु
कुर्याच्छिवस्परविधैवग्राह्या। एतदेवाभिप्रेत्यस्मर्यते। यदापूर्वेद्युःप्रदोषादूर्ध्वंप्रवृत्तात्चतुर्दशीत्परेद्युःक्षयवशात्प्रदोषादर्वागेवसमाप्तातदा
परेद्युर्व्याप्तिह्यभावात्पूर्वेद्युर्निशीथव्याप्तेःसद्भावाज्जयायोगात्परेद्युरेवोपवासः। अथावंशिवकःसंपन्नः। दिनद्वयेनिशीथ
व्याप्तौतदप्यासौवप्रदोषव्याप्तिर्नियामिका। तथादिनद्वयेपिप्रदोषव्याप्तौतदप्यासौवनिशीथव्याप्तिर्नियामिका। एकैकस्मि
न्दिनएकैकस्यांप्राजयायोगोनियामकइति। अस्याशिवरात्रिव्रतस्याहोरात्रसाध्यत्वेनाहनिरात्रैवसंबंधेसाधारणेसतित्र
यंधमुपेक्ष्यप्रदोषनिशीथयोरेवकुतःशास्त्राणांप्रवृत्तिरितिचेत्। रात्रेरत्रप्रधानत्वादितिब्रूमः। तत्राधान्येनचोपनिः। स्कंद
पुराणेपद्मते। निशिभ्रमंतिभूतानिशक्तयःसूलभृद्यतः। अतस्तस्यांत्रयोदश्यांसंपूर्णदिनंभवेदिति। तस्यांत्रयोदश्यामितिम
धिकरणेसप्तम्यो। तथाचापमर्शः संपद्यते। ऐत्रयोदशीनिशीथेतत्स्याच्चतुर्दश्यांविद्धमाजायांशिवपूजनंभवेदिति। नागरखंडे
ऽपि। माघमास्यसितेकृष्णायांचतुर्दश्यांसुरेश्वर। अर्धरात्रेशिवेलिंगेषुवरेषुस्नानरेषुच।
संक्रमिष्याम्यसंदिग्धंवर्षमात्रविशुद्धये। एत्रोक्तस्माद्हिमेहजायः करिष्यतिमानवः। मंत्रैरेतैःसुरश्रेष्ठविपापःसभविष्यती
ति। साचशिवा त्रिचतुर्दशीत्रिधाभवति। एकतिथ्यात्मिका। तिथिद्वयात्मिका। तिथित्रयात्मिकाचेति। तत्रसूर्योदयमारभ्यप्रवृत्ता

परदिनोदयपर्यंतनैकतिथ्यात्मिका। सावेधदोषाभावात्प्रशस्ता। तिथिद्वयात्मकलंचद्वयाभवति। जयायोगेनच। तत्रयोगद्वयमेकैकस्मिन्वि
षयेप्रशस्तं। सचविषयविशेषः पूर्वमेवोदाहृतः। तिथित्रयात्मकलंलतिप्रशस्तं। तेएवदेवाभिप्रेत्यपुराणेपठ्यते। त्रयोदशीकलाप्येका
मध्येचैवचतुर्दशी। अंतेचैवप्रतीवाली त्रिस्पृशीशिवमर्चयेत्। यथात्रिस्पृशीत्रिप्रशस्तातथाआवार विशेषेणयोगविशेषेणचत्रि
प्रशस्ताभवति। तथाचस्कंदपुराणेपठ्यते। भाद्रकृष्णाचतुर्दश्यांरविवारेस्यादाभवेत्। भौमोवाथभवेद्दिनकर्तिभंव्रततमुत्तमं। शिवयो
गस्ययोगेवैतद्व्रतेदुत्तमोत्तमं। शिवरात्रिव्रतंलोकेतद्वदुत्तमोत्तममिति। ननुयदाहर्विशायमुपवासस्तदापरेद्युः किंतिथ्यंतेपा
रणंभवति किंवातिथिमध्ये। शास्त्रंतुपक्षद्वयेपिसमानं। तत्रतिथ्यंतपारणवचनानिदर्शमुदाहृतानि तिथिमध्यपारणवचनं
स्कंदपुराणेपठ्यते। उपोषणंचतुर्दश्यांचतुर्दश्यांतुपारणं। कृतेःसुश्रलसेश्रलभ्यतेवाथवानवा। ब्रह्मास्वयंचतुर्वक्त्रैः पंचव
क्त्रश्चथाप्यहं। सिक्थेसिक्थेफलंतस्यशक्रोवक्तुंनपार्वति। ब्रह्मादोद्रमध्येतुयानितीर्थानिसंतिवै। संस्थितानिभवंतीह
भूतायांपारणेकृते। तिथीनांभवसर्वासांमुपावासव्रतादिषु। तिथ्यंतेपारणंकुर्याद्विनाशिवचतुर्दशीमिति। वाढं। अस्तिहिदु
र्विधंशास्त्रं। तस्यचद्विविधस्यशास्त्रस्यप्रतिपत्तिकरणेकल्पवस्थाद्वयं। यद्यामत्रयदर्वागेवचतुर्दशीपरिसमाप्यते
तदातिथ्यंतेपारणं। यदातुचतुर्दशीयामत्रयमतिक्रमतितदाचतुर्दशीमध्येदर्वीलोपारणंकुर्वंति॥ इतिचतुर्दशीनिर्णयः॥
॥ अथपंचदशीनिर्ण्ययते॥ ॥साद्विविधा॥ पौर्णमास्यमावास्याच। तत्रपौर्णमास्यापरस्परविरुध्यानिवाक्यान्युपलभ्य
तत्रपरविद्धायांग्राह्यं विष्णुधर्मोत्तरे। एकादश्यष्टमीषष्ठीपौर्णमासीचतुर्दशी। अमावास्याचतृतीयाचउपोष्याःस्युःपरा ७८
न्विता। परविद्धानिषेधः परविद्धाविधिश्चात्रत्यपुराणपद्मपुराणयोः। षष्ठ्येकादश्यमावास्यापूर्वविद्धास्तथाष्टमी। पूर्णिमापरश्रीगजानन

श्राद्धस्यचपार्वणरूपत्वमपराह्णस्यतत्कर्मकालत्वंकुतपस्यप्रारंभकालत्वमितेतन्नितयंप्रतिपत्तिकरणेत्रास्माभिर्निर्णीयेप्रपंचितं॥
तथासतिअपराह्णस्यकर्मकालत्वात्पूर्वेद्युरेवापरेद्युरेववापराह्ण्यापिन्यभावास्याग्रहीतव्या।तत्रापराह्ण्यापिन्याःपूर्वतिथ्यग्राह्यता
माहहारीतः।यस्यासंध्यागतःसोमोमध्णालंनिवर्तते।अपराह्णेतुयात्तस्यांपिंडानांकरणंध्रुवं।यत्तुकाण्वोक्तं।भूतवि
द्धामममावास्यांमोहाद्यानंतोपिवा।श्राद्धंकर्मणिये कुर्युस्तेषामायुःप्रहीयतइति।तदपराह्ण्याप्यभावविषयंद्रष्टव्यं।अपरा
ह्ण्यापिन्याउत्तरतिथ्यग्राह्यतामाहहारीतः।अपराह्णःपित्रर्थानुयापराह्णानुपायिनी।तस्याग्राह्यापित्रर्थंपूर्वास्तानुयायिनी
ति।उभयत्रापराह्ण्यापित्वंद्वैधाभिधत्ते।एकदेशेनकालीभवेति।एकदेश्यास्तिस्रोद्वेधाभिधत्ते।वैषम्येणसाम्यनवेति।तत्रवैष
म्येणैकदेश्याश्लोकमद्वयेनानिर्णीतव्यो।तथाचस्मृतिः।अपराह्णेव्याप्तिसमभावास्यायदाभवेत्।तत्रात्पत्वमहत्वाभ्यांनिर्णयःपित्र
र्थकर्मणीति।महत्वंअग्रेत्यभिप्रायः।सर्वशिवराघवसंवादेस्पष्टमभिहितः।अल्पापराह्णाजाजासाग्राह्यास्याद्याधिकाभवेदिति।साम्ये
नैकदेश्यात्तोरवर्वादिशब्देननिर्णयः।साम्येनोभयत्रैकदेश्यास्तिस्रश्चतत्तिथिगतद्वित्वेत्रयसाम्येस्त्रेधाभिधत्ते।तथाहि।पूर्वेद्युर
पराह्णस्थद्वितीयघटिकामारभ्यपरेद्युरपराह्णस्यपंचघटिकापर्यंतंयदातिथिर्वर्तततदापूर्वापराह्णस्यप्रथमघटिकाद्वितीयामपरा
ह्णस्यचरमघटिकांविहायाष्टासुपंचसुवर्तमानत्वात्साम्येनैकदेश्यास्तिस्रोभवंति।तिथिश्चतदाघटिकाचतुष्टयेनवर्धते।यदाचपू
र्वापराह्णस्यचरमघटिकायामुत्तरापराह्णस्यचरमघटिकायांतिथिर्वर्ततेतदापिसाम्येनैकदेश्यास्तिस्रोभवंति।घटिकाचतुष्टये ७९
नतिथिःक्षीयते।यदापूर्वापराह्णस्यचरमघटिकात्रयंद्वितीयापराह्णस्यचप्रथमघटिकात्रयंतिथिर्वर्ततेतदासाम्येनैकदेश्यास्तिस्रोश्रीगजानन

तिस्रोदश्स्था।तिथिस्तुनवधर्तेनाक्षीयतेकिंतुसमेव।ईदृशेविषयेरवर्वादिवाक्यान्निर्णयः।तत्रचरवर्वादिवाक्यंसर्वतिथिसाधारण्ये
नप्रवृत्तत्वादमावास्यायामपिप्रवर्तते।तथामावास्यायोमवदिशेषेणशिवराघवसंवादेस्पष्टमेवोदाहृतिः।अमावास्यातुयाहिस्याद
पराह्णव्याप्तिसाक्षयचरीपराह्णेसाम्यपिचपरास्पृशेतति।स्पृशंतेरपि।तिथिश्चयासिनीवाली तिथिश्चोकुहूर्मता।सोम्यपिच
कुहूर्ईयावेदवेदांगपारगैरिति।चतुर्दृष्टेमिश्रासिनीवालीप्रतिपन्मिश्राकुहूः।तथाचव्यासः।दृष्टेंदुरासिनीवालीविक्लीनश्चेंदुकु
हूर्मतेति।कालेनोभयत्रापराह्णव्याप्तावपितिथिरधिकाकुहूरेवग्राह्या।यदाह्यनुदयेपराह्णेनष्टश्चंद्रइतितदासाम्येनैकदे
श्यव्याप्तेरुक्त्या।तदाहजाबालिः।अपराह्णेमाद्यापियदिदृष्टेंदुस्तिथिस्त्रयं।ग्राहितामैःसिनीवाली निरुक्तादिःकुहूर्मतेति।आ
दिशब्दात्लीपुंसयोरविग्रहणं।तदाहलोगाक्षिः।सिनीवालीहिजैःकार्यासाग्निकैःपित्रकर्मणि।स्त्रीभिःसद्भिःकुहूःकार्यातथाज्ञान
ग्निकैर्हिजैरिति।एवंगतस्यार्थस्यव्यवस्थितेसतियानिवृद्धिविधानिवाक्यानितानिसर्वाणिप्रोक्तेषमावास्यांभेदेअन्यतमविधयते
नयथायोगंयोजनीयानि।तथाहि।तत्रतावद्वैधायनश्राह।मध्याह्नात्परतोयत्रचतुर्दश्यनुवर्ततेतोसिनीवालीनुसाह्नेयापित्रा
र्थेनुनिष्फलेति।बृहस्पतिरपि।मध्याह्नाद्यातमावास्यापरस्तात्संप्रवर्तते।भूतपिशाचानुसाह्नेयानसापंचदश्यांभवेदिति।मध्या
ह्नादूर्ध्वमपराह्णमतिक्रम्यपरस्तादमावास्याप्रवर्ततइतिवाख्येयं।तदेतद्वचनद्वयंपरेद्युरपराह्णव्याप्तौयोजनीयं।वसुकृ
त्योमनवचनंपिंडान्वाहार्यकंश्राद्धंक्षीणेराजनिरुच्यते।वासरस्यतृतीयेंशेनातिसंध्यासमीपतइतिपिंडानांपिंडपितृयज्ञो
गभूतानामनुपश्चादाक्रियतेक्रियतइतिपिंडान्वाहार्यकंश्राद्धममावास्यंतत्क्षीणेराजनीदोकतेयं।वासरस्यतृतीयेंशइति

कालमाधव
८०
मावास्या

अनेनषष्ठ्यूनोपराह्णः सायाह्नसहितोभिधीयते। तत्रमातिसंख्यासमीपतद्वृत्तिसायाह्नस्यप्रतिषेधेसत्यपराह्णः कर्मकालेनपरिग्रह्यते। तथाचकर्मकालव्यापिनीतिथिर्ग्राह्येत्युक्तं। तत्रेदमुक्तंयस्यचतुर्दश्याष्टमेप्रहरेत्रारंभः। अमावास्यायाःसप्तमेप्रहरेसमाप्तिः। तदेतदुभयंकालायनएवाह। अष्टमेंशेचतुर्दश्याःक्षीणोभवतिचंद्रमाः। अमावास्याष्टमेंशेचपुनःकिलभवेदणुरिति। वसुजा दालिनोक्तं। प्रतिपत्तत्वर्थंपूर्वाह्णव्यापिग्राह्या। भूतविशेषेवसाकार्यापित्र्येकर्मणिसर्वदेति। अत्रपूर्वाह्णव्यापिनीतिथिरितिविशेष कथनादपराह्णव्यापिनेनास्तीतिलभ्यते। तादृशीचद्विविधा। दर्शेपुरपराह्णव्यापिनीतद्रहिताच। आद्यपक्षेसर्वैरपिभूतविशेषेवका र्यीत्यनुहारीतेनोक्तं। पूर्वाह्णेदेवपावास्यादपराह्णेचचतुला। प्रतिपद्यधिकर्तव्यंश्राद्धंश्राद्धविदोविदुरिति। तद्विचसद्भावेपराह्ण व्यापित्वाभावेसतिनिरग्निकविषयं। यदुक्तंहारीतेनोक्तं। भूतविशायामावास्यांप्रतिपन्मिश्रितापिवा। पित्र्येकर्मणिविद्वद्भिर्ग्राह्या कुतपकालिकीति। तदेकोद्दिष्टविषयं। एकोद्दिष्टस्यकुतपप्राधान्यंप्रतिपत्प्रकरणेप्रपंचितं। यद्वात्रप्रतिपन्मिश्रायाःश्रेष्ठपराह्ण व्यापित्वाभावेनिरग्निकेरप्यहेयत्वंशंकायांग्राह्येसकुतपव्याप्तिरनुकल्पतेनाभिधीयते। अपराह्णव्याप्तिःपार्वणेमुख्यःकल्पः। कुतपव्याप्तिरनुकल्पः। तथाचमुख्यासंभवेनुकल्पस्योपादेयत्वान्निरग्निकैःप्रतिपन्मिश्रितापिग्रहीतुंशक्यते। भूतविशायां कुतुपकालिकलेसतिअपराह्णिकलक्षणभंगप्रसंगेसिध्यं। तथासतिमुख्यानुकल्पयोरुभयोरप्यसद्भावात्कुतपस्यत्रारंभकाल लाच्चप्रतिपद्धिकमकरणोदाहृतेदंवस्वामिवचनानुसारेणोपक्रमोपसंहारेकालव्याप्तिर्दर्शिताभवति। तत्रात्रदर्शांतेनोपन्य स्यते। यत्रकुतपव्याप्तिनीभूतवि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

कालमाधव
८०
मावास्या

द्वितीयपक्षेतुसाग्निकैरेवभूतविद्धाकार्या

अनेनपर्वणोपराह्णः सायाह्नसहितोभिधीयते।तत्रनातिसंध्यासमीपतयातिसायाह्नस्यत्रतिषेधेसत्यपराह्णः कर्मकालतेनपरिग्रह्यते।यथाचकर्मकालव्यापिनीतिग्रहणंतुक्तंतत्रेदुक्तंयस्यचतुर्दश्याष्टमेप्रहरेत्रारंभः।अमावास्यायाःसप्तमेप्रहरेसमाप्तिः।तदेतदुभयंकात्यायनएवाह।अष्टमेंशेचतुर्दश्याःक्षीणोभवतिचंद्रमाः।अमावास्याष्टमेंशेचपुनःकिलभवेदणुरिति।चतुर्दालिनाक्तं।प्रतिपत्स्वर्थंपूर्वाह्णव्यापिनीग्राह्या।भूतविद्धैवसाकार्यापित्र्येकर्मणिसर्वदेति।अत्रपूर्वाह्णव्यापिनीतिग्रहणंतिथिविशेषकथनादपराह्णव्यापित्वंनास्तीत्यवगम्यते।तादृशीचद्विविधा।दर्वीहोमपराह्णव्यापिनीतद्रहिताच।आद्यपक्षेसर्वैरपिभूतविद्धैवकार्याचतुर्दशीनिरग्निकविषया।वह्निहारीतेनोक्तं।भूतविद्धायमावास्याप्रतिपन्मिश्रितापिवा।पित्र्यंकर्मणिविद्वद्भिर्ग्राह्या कुतपकालिकीति।तदेकोद्दिष्टविषयं।एकोद्दिष्टस्यकुतपप्राधान्यप्रतिपत्त्यकरणेप्रपंचितं।महत्यप्रतिपन्मिश्रायाअप्यपराह्णव्यापित्वाभावेनिरग्निकैरपिहेमलंबकायांग्राह्यंतेकुतपव्याप्तिरनुकल्पतेनाभिधीयते।अपराह्णव्याप्तिःपार्वणेमुख्यःकल्पः।कुतपव्याप्तिरनुकल्पः।तथाचमुख्यासंभवेनुकल्पस्यापादेयत्वान्निरग्निकैःप्रतिपन्मिश्रितापिग्रहीतुंशक्यते।भूतविद्धायांकुतुपकालिकेसतिआपराह्णिकत्वंनभग्नंसिद्धं।तथासतिमुख्यानुकल्पयोरुभयोरप्यसद्भावेकुतपस्यत्रारंभकालत्वाच्चतत्रादिकर्मकरणेदाहतेदंस्वतंत्रवचनानुसोरणोपक्रमापसंहारेकालव्याप्तिर्दर्शिताभवति।तत्रात्रर्षांतेनोपन्यस्यते।यथाकुतपव्याप्तिनीभूतवि